KASHMIR SERIES OF TEXTS AND STUDIES.

No. XXXVIII.

THE

SVACCHANDA-TANTRAM

WITH COMMENTARY

BY

KSHEMA RĀJA.

Vol. II.

EDITED BY

THE RESEARCH DEPARTMENT,

JAMMU AND KASHMIR STATE

Under Authority of the Kashmir Darbar.

SRINAGAR, KASHMIR.

1923.

SRI PRATAP COLLEGE

LIBRARY

Class No. 891.238

Book No. Sv96K. Pt.V2.

Accession No 3494.

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. XXXVIII.

THE

SVACCHANDA TANTRAM

WITH COMMENTARY

BY

KSHEMA RĀJA.

EDITED WITH NOTES

BY

PANḌIT MADHUSUDAN KAUL SHĀSTRĪ, M. A., M. O. L.
Superintendent Research Department,
JAMMU AND KASHMIR STATE,
SRINAGAR.

Published under the Authority of the Government of
His Highness Lieut.-General Mahārājā
Sir PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

Volume II.

BOMBAY:
PRINTED AT THE 'NIRNAYA-SAGAR' PRESS.
1923.

891.238.
K~~~~~~~
Su96 K
acc. no: 3491.

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३८

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतम् ।

श्रीभारतधर्ममार्तण्ड-काश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये
तदध्यक्ष-पण्डित-मधुसूदन-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतम्

(द्वितीयो भागः)

संवत् १९७९ ख्रैस्ताब्दः १९२३.

काश्मीर-श्रीनगर

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

(All rights reserved).

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
23, Kolbhat Lane, Bombay.

**Published by Pandit Madhusudan Kaul Shastri, M. A. M. O. L.
for the Research Department,
Jammu and Kashmir State, SRINAGAR.**

अथ

स्वच्छन्दतन्त्रम् ।

श्रीमहामाहेश्वराचार्यश्रीक्षेमराजविरचितोद्द्योताख्य-
व्याख्योपेतम् ।

(चतुर्थः पटलः)

दीक्षाज्ञानक्रियाप्लुष्टदुष्टपाशवनावलिः ।
महाज्योतिर्जयत्येको ह्लादी भैरवहव्यभुक् ॥

अधिवासानन्तरभाविनीं दीक्षां प्रस्ताव-
यितुं श्रीभैरव उवाच

प्रत्यूषे विमले कृत्वा
शौचाद्यान्पूर्ववत्क्रमात् ।
सकलीकरणं कृत्वा
पूर्ववत्प्रविशेद्गृहम् ॥ १ ॥

पटलसंगत्या प्रकृत आचार्यः, शौचाद्यानि-त्यादिशब्दात् स्नानादि, पूर्ववत्प्रविशेदिति द्वारदेवतार्चां कृत्वा

शिष्यश्च शुचिराचान्तः
पुष्पहस्तः············· ।
प्रविशेत् ।
स च
·············गुरुं ततः
प्रणम्य शिरसा
तत्प्रणामादेव च
················हृष्टो
गुरोः स्वप्नान्निवेदयेत् ॥ २ ॥
तांश्च
शुभान् स्वप्नान्प्रवक्ष्यामि
अशुभांश्च वरानने ।
स्वप्नेषु[1] मदिरापान-
माममांसस्य भक्षणम् ॥ ३ ॥
क्रिमिविष्ठानुलेपं च
रुधिरेणाभिषेचनम् ।

---

१ क० पु० स्वप्ने त्विति पाठः ।

भक्षणं दधिभक्तस्य
श्वेतवस्त्रानुलेपनम् ॥ ४ ॥
श्वेतातपत्रं मूर्धस्थं
श्वेतस्रग्दामभूषणम् ।
सिंहासनं रथं यानं
ध्वजं राज्याभिषेचनम् ॥ ५ ॥
रत्नाङ्गाभरणादीनि
ताम्बूलं फलमेव च ।
दर्शनं श्रीसरस्वत्योः
शुभनार्यवगूहनम् ॥ ६ ॥

क्रिमिर्लाक्षा, एतत्सर्वं श्रेष्ठम् ॥ ६ ॥

किं च

नरेन्द्रैर्ऋषिभिर्देवैः[1]
सिद्धविद्याधरैर्गणैः ।
आचार्यैः सह संवादं
कृत्वा स्वप्ने प्रसिद्ध्यति ॥ ७ ॥

सम्यक् वादः संवादः ॥ ७ ॥

---

१ ख० पु० ऋषिदेवैश्चेति पाठः ।

तथा च

नदीसमुद्रतरण-
माकाशगमनं तथा ।
भास्करोदयनं चैव
प्रज्वलन्तं हुताशनम् ॥ ८ ॥
ग्रहनक्षत्रताराणां
चन्द्रबिम्बस्य दर्शनम् ।
हर्म्यस्यारोहणं चैव
प्रासादशिखरेऽपि वा ॥ ९ ॥
नराश्ववृषपोतेभ-
तरुशैला[1]ग्ररोहणम् ।
विमानगमनं चैव
सिद्धमन्त्रस्य दर्शनम् ॥ १० ॥
लाभः सिद्धचरोश्चैव
देवादीनां च दर्शनम् ।
गुटि[2]कां दन्तकाष्ठं च
खड्गपादुकरोचनाः ॥ ११ ॥

१ ख० ग० ङ० पु० दोलाग्रेति पाठः । २ ख० पु० गुडिकामिति पाठः ।

उपवीताञ्जनं चैव
अमृतं पारतौषधीः ।
शक्तिं कमण्डलुं पद्म-
मक्षसूत्रं मनःशिलाम् ॥ १२ ॥

प्रज्वलत्सिद्धद्रव्याणि
गैरिकान्तानि यानि च ।
दृष्ट्वा सिद्ध्यति स्वप्नान्ते
क्षितिलाभं [1]व्रणं तथा ॥ १३ ॥

सिद्धो जपादिक्रमेण मन्त्रो यस्य, व्रणमिति स्वदेहेऽस्रजं, स्वप्नान्ते इति नतु स्वप्नस्याद्यमध्ययोः । यथोक्तमन्यत्र

'प्राङ्निमित्तं दिवा ग्राह्यं रात्रौ ग्राह्यं तु पश्चिमम् ।'

इति ॥ १३ ॥

किं च

क्षतजार्णवसंग्राम-
तरणं विजयं रणे ।

---

१ क० पु० भवेद्ध्रुवमिति पाठः ।

ज्वलतिपतृवनं रम्यं
वीरवीरेशिभिर्वृतम् ॥ १४ ॥
वीरवेतालसिद्धैश्च
महामांसस्य विक्रयम् ।
महापशोः संविभागं
लब्ध्वा देवेभ्य आदरात् ॥ १५ ॥
आत्मना पूजयन् देवं
जपन् ध्यायन् स्तुवन्नपि ।
सुहुतं चानलं दीप्तं
पूजितं वा प्रपश्यति ॥ १६ ॥
हंससारसचक्राह्व-
मयूरशवरोहणम् ।
मातृभिर्भैरवैश्चैव
मातृरुद्रगणैः सह ॥ १७ ॥
भैरवं भैरवीं दृष्ट्वा
सिद्ध्यत्यत्र न संशयः ।

वीरवेतालसिद्धैश्चेति सहार्थे तृतीया । मा-

तृरुद्रा देवविशेषाः, महापशुः पुरुषपशुः, सारसः सरस्येव य आस्ते हंसविशेषः । सिद्ध्यतीति तत्स्वप्नानुसारिणीमुत्तमादिरूपां सिद्धिं प्राप्नोतीत्यर्थः । यद्यपि

'दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ।
भावितो दोषजश्चेति स्वप्नः सप्तविधः स्मृतः ॥'

इति निमित्तान्तरजोऽस्ति स्वप्नः, तथापीह भगवद्भुर्वधिष्ठिते यागधाम्नि मन्त्रादिमाहात्म्या-द्भाविफलानुरूप एव दृश्यतेऽसावधिवासे॥१७॥

एवम्

शुभाः स्वप्ना मयाख्याता
अशुभांश्च निबोध मे ॥ १८ ॥

तानाह

तैलाभ्यङ्गस्तथा पानं

तैलस्यैव च ।

विशनं च रसातले ।
अन्धकूपे च पतन-
मथ पङ्के निमज्जनम् ॥ १९ ॥

१ ख० पु० पङ्के च मज्जनमिति पाठः ।

वृक्षवाहनयानेभ्यः
पतनं हर्म्यपर्वतात् ।
कर्तनं कर्णनासाभ्या-
मथ वा हस्तपादयोः ॥ २० ॥
पतनं दन्तकेशाना-
मृक्षवानरदर्शनम् ।
वेतालक्रूरसत्त्वानां
तथैव[1] कालपूरुषाः ॥ २१ ॥
कृष्णोर्ध्वकेशा मलिनाः
कृष्णमाल्याम्बरच्छदाः ।
रक्ताक्षी स्त्री च यं स्वप्ने
पुरुषं त्ववगूहयेत् ॥ २२ ॥
म्रियते नात्र संदेहो
यदि शान्तिं न कारयेत् ।
गृहप्रासादभेदं च
शय्यावस्त्रासनेषु[2] च ॥ २३ ॥

१ ख० पु० तथा वै इति पाठः । २ ख० पु० अशनेष्विति पाठः ।

आत्मनोऽभिभवं संख्ये
आत्मद्रव्यापहारणम् ।
खरोष्ट्रश्वसृगालेषु
कङ्कगृध्रबकेषु च ॥ २४ ॥
महिषोलूककाकेषु
रोहणं च प्रवर्तनम् ।
भक्षणं पक्वमांसस्य
रक्तमाल्यानुलेपनम् ॥ २५ ॥
कृष्णरक्तानि वस्त्राणि
विकृतात्मा प्रपश्यति ।
हसनं वल्गनं स्वप्ने
म्लानस्त्रग्दामधारणम् ॥ २६ ॥
स्वमांसोत्कर्तनं बन्धं
कृष्णसर्पेण भक्षणम् ।
उद्वाहं च तथा स्वप्ने
दृष्ट्वा नैव प्रसिध्यति ॥ २७ ॥

क्रूरसत्त्वं व्याघ्रादि, संख्ये संग्रामे, विकृ-

तात्मा विघ्नव्याकुलचित्तो भीषणाकृतिर्वा, हसनोद्ग्राहादि आत्मनः, वल्गनं नृत्तम् ॥२७॥

उपसंहरति

अशुभा ह्येवमाख्याता
विज्ञेया दैशिकोत्तमैः ।

विज्ञेया इति कालस्वरूपाधिकार्यनुसारेणैव एषां बलाबलचिन्ता कार्येत्यर्थः ॥

तत्र

शुभास्तत्रानुमोद्यास्तु[1]
अशुभेषु तु होमयेत् ॥ २८ ॥
अष्टोत्तरशतं धाम्ना

तथा सति दीक्षान्तरायोपशान्तेः ॥ २८ ॥

प्रायश्चित्ताद्विशुद्ध्यति ।

अत्र विधिमाह

पूर्ववत् सकलीकृत्य
विघ्नोच्चाटनरक्षणम् ॥ २९ ॥

---

१ ख० पु० वै इति पाठः ।

वेष्टनं पूर्ववत् कुर्या-
च्छिवाम्भः शिवहस्तकम् ।
लोकपालांस्तु संपूज्य
शिवकुम्भं च स्थण्डिलम् ॥३०
अग्निकार्यं यथापूर्वं
पूर्णाहुतिप्रपातनम् ।
प्रायश्चित्तं ततः पश्चा-
दुःस्वप्नार्थं यदुक्तवान् ॥ ३१ ॥

तत् कुर्यादिति शेषः । वेष्टनं कवचेन, शिवाम्भ इति प्रोक्षणादिकं[द्यर्थं], शिवहस्तः कर्मणो दीप्त्यापत्त्या सम्यक् प्रायश्चित्तशान्त्यर्थं, स्थण्डिलमिति तदाधेयं भैरवम् ॥ ३१ ॥

एतदुपसंहरन् प्रकृतं प्रस्तावयति

एवं पूजादिकं कृत्वा
विसृज्य स्थण्डिलाच्छिवम् ।
निर्माल्यापनयं कृत्वा
भूमिं संशोध्य पूर्ववत् ॥ ३२ ॥

१ अधीशमिति पाठः ।

नित्यकर्म ततः कुर्या-
त्पूजाहोमजपादिकम् ।
नित्याह्निके समाप्ते तु
नैमित्तिकमथाचरेत् ॥ ३३ ॥

नित्यकर्म स्वानुष्ठानविषयम् । तत्र प्रायश्चित्तिनो नाधिकार[1] इति तच्छुद्ध्यन्ते तस्याभिधानं; नैमित्तिकं दीक्षाख्यान्निमित्तादागतम् ॥ ३३ ॥

तदुपक्रमते

उपलिप्य शिवाम्भोभि-
र्ब्रह्मस्थानं[2] प्रपूजयेत् ।
भावेन गन्धपुष्पाद्यैः

भावेन प्रणवेन ।

ततो मण्डलमालिखेत् ॥ ३४ ॥

तद्विधिरग्रे भविष्यति ॥ ३४ ॥

---

१ ख० पु० अनधिकार इति पाठः ।

२ क० पु० मन्त्रस्थानमिति पाठः ।

अथ

करणीं खटिकां चैव
भैरवेण प्रपूजयेत् ।
धाम्ना तु रजसां पातः

भैरवः सकलः, धाम्नाभिमन्त्रितानां रजसां पश्चात् पातो निर्मन्त्रक एव, अन्यथा भाविरजोदोषोक्त्यनुपपत्तिः ॥

स च रजसां पातः

सिताद्यश्चागमोदितः ॥ ३५ ॥

सितं रजः पात्यमानमाद्यं यस्य, आगमे बृहत्तन्त्रे उदितः ॥ ३५ ॥

अथ

निष्पन्ने मण्डले स्नात्वा
नित्यकर्म समाचरेत्[1] ।

अपरेऽह्नि, इत्यर्थः ॥

नित्यकर्मसमाप्तौ तु
कुर्यान्नैमित्तिकं बुधः ॥ ३६ ॥

---

१ ख० पु० समारमेदिति पाठः ।

तन्नित्यकर्मानूद्य नैमित्तिकमादिशति

स्नानादि पूर्ववन्मन्त्रैः
सकलीकरणादिकम् ।
आत्मरक्षास्त्रप्राकार-
द्वारपालादिपूजनम् ॥ ३७ ॥
विघ्नोच्चाटनदिग्बन्धौ
भूपातालखवासिनाम्[1] ।
अस्त्रप्राकारमारोप्य
कवचेनावगुण्ठनम् ॥ ३८ ॥
उदङ्मुखं तूपविष्टः
करशुद्ध्यादि पूर्ववत् ।
शिवाम्भः शिवहस्तं च
अर्घत्रयप्रकल्पनम् ॥ ३९ ॥

कृत्वेति शेषः । आत्मरक्षार्थो[2]ऽस्त्रप्राकारः । भूपातालखवासिनां विघ्नानामुच्चाटनमिति व्यवहितः संबन्धः आगमप्रामाण्यात्, अस्त्र-

१ क० ग० पु० गामिनामिति पाठः ।

२ ख० पु० रक्षार्थमस्त्रेति पाठः ।

प्राकारमिति यागगृहविषयम्, उदङ्मुखमिति बुभुक्षुदीक्षाया अपि मुक्तिपर्यवसायित्वात् दक्षिणास्यस्य चाशेषपाशदाहकत्वात् दीक्षाप्रारम्भे च अत्राचार्यस्योदङ्मुखत्वमेवोक्तं; करशुद्ध्यादीत्यादिशब्दात् देहशुद्ध्यादिकम्। शिवाम्भ इति प्रोक्षणाद्यर्थं शिवमन्त्रितमम्भोऽर्घपात्रात् पृथक्, तच्च प्राक्पटलयोरनुमन्तव्यं पात्रत्रये विधिनिरोधपशुप्रयोजनमर्घत्रयम् ॥ ३९ ॥

ततः

लोकपालांस्तु संपूज्य
शिवकुम्भं प्रपूजयेत् ।

ततोऽपि

मण्डलस्याग्रतो भूत्वा
मण्डलं प्रोक्ष्य चासिना ॥४०॥
वर्मणा वेष्टयेत् पश्चात्
प्रणवेनाभिमन्त्रयेत् ।
अष्टोत्तरशतं धाम्ना
रजोदोषैर्विशुद्ध्यति ॥ ४१ ॥

मण्डलस्याग्रत इत्यनेन दीक्ष्यजनातिशयेन मण्डलस्य दिगन्तराभिमुखत्वमपि ध्वनति। प्रणवेन धाम्नेति प्रणवपूर्वेण निष्कलेनेत्यर्थः॥ ४१॥

इत्थं च संस्कृतस्य मण्डलस्य

चतुर्दिक्ष्वस्त्रं संपूज्य
द्वारे गन्धादिभिः क्रमात्।
प्राकारं भावयेदस्त्रं

द्वार इति जातावेकवचनं, तेन वक्ष्यमाणनवनाभमण्डलस्य चतुर्दिक्षु यान्यष्टौ[1] द्वाराणि तत्रेत्यर्थः॥

मण्डलं प्रविशेत् ततः॥ ४२॥

पूजामत्रारभेत इत्यर्थः॥ ४२॥

तत्र

गुरून् संपूज्य विघ्नेशं
पुष्पाद्यैः प्रणवेन तु।

पूर्वं गणपतिं वायव्यकोणे संपूज्य गुरून्

१ ख० पु० यथाष्टाविति पाठः।

प्राच्यां दिशि प्रपूजयेत् । यथोक्तं तृतीय-पटले

'ब्रह्मस्थानस्य पूर्वेण गुरून् पूज्य विनायकम् ।
वायव्ये....................... ॥' (स्व० ३–४२)

इति ॥

ततः

अनन्तमासनं प्राग्व-
च्छिवान्तं प्रणवेन तु ॥ ४३ ॥
मूर्त्यादि पूर्ववन्न्यस्ये-
द्धृदाद्यावरणान्तगम् ।
पूर्वोक्तविधिना पूज्य
नैवेद्यानि निवेदयेत् ॥ ४४ ॥
निरोधार्घेण चार्घं तु
दत्त्वा चैव निरोधयेत् ।
जपध्यानादिकं कृत्वा
अग्निष्ठं भैरवं यजेत् ॥ ४५ ॥
नाडीसंधानकं त्रिष्ठं
कृत्वा संतर्पयेद्विभुम् ।

अग्नाविति शेषः ॥ ४५ ॥

तत्र तावन्नाडीसंधानमाह

आत्मनो निष्कलोच्चारं
कृत्वा कुम्भे निवेशयेत् ॥४६॥
कलशस्थस्य वामेन
रेचयेत् पूरयेत्ततः ।
मण्डलस्थस्य सव्येन
पुनर्वामेन रेचयेत् ॥ ४७ ॥
अग्निष्ठस्य तु तत्तेजो
दक्षिणेन विशन् स्मरेत् ।

मन्त्रकलशाद्भिर्ग्रन्थिभेदक्रमेण ऊर्ध्वद्वादशान्तमाश्रयन् ततोऽपि हृदयमागत्य तत्र विश्रम्य प्रदक्षिणं भ्रामित्वा सोममार्गेण निःसृत्य कलशस्थस्य दक्षिणेन प्रविशेत्, तत्राप्यमुमेव क्रममास्थाय तद्वामेन निर्गत्य मण्डलस्थस्य दक्षिणेन प्रविश्य प्राग्वद्वामेन निर्गत्य वह्निस्थस्य दक्षिणेन प्रविशेत् प्राग्वदेव च हृदये विश्राम्येत्।एवमधिकरणचतुष्टयैक्यापत्त्या वह्नावग्नीषोमसूर्यतेजःसामरस्येन स्थेयं नतु ततः स्वहृ-

दयमागन्तव्यमग्निष्ठ एव भवति यागस्य प्रस्तुतत्वात्प्राधान्येनैव अवस्थितेर्युक्तत्वात् ४७

यदाह

एवं संधानकं कृत्वा
ततस्तर्पणमारभेत् ॥ ४८ ॥

एवमित्यग्निविश्रान्त्यंन्तम्[1] ॥ ४८ ॥

ततश्च

दशभागविभागेन
हुत्वा पूर्णाहुतिं क्षिपेत् ।

मूलहोमात् पूर्वोक्ताद्धकाराणां दशमांशेन हुत्वेत्यर्थः ।

अथ

प्रायश्चित्तविशुद्ध्यर्थं
कुर्यादष्टोत्तरं शतम् ॥ ४९ ॥
विधेः पूर्णातिरिक्तस्य
धाम्ना पूर्णाहुतिं ततः ।

धाम्नेति काकाक्षिवत् ॥ ४९ ॥

---

१ ख० ङ० पु० विश्रान्त्यर्थमिति पाठः ।

किं च

आचार्योऽथार्घहस्तस्तु
　　मण्डलं प्रविशेत्ततः ॥ ५० ॥
संपूज्य परमेशानं
　　पुष्पाद्यैरर्घपश्चिमम् ।
मुद्रां बद्ध्वा प्रणम्यादौ
　　जानुभ्यामवनिं गतः ॥ ५१ ॥
विज्ञापयेत पश्वर्थं
　　प्रारब्धोऽयं मखोत्तमः ।
स्नानाधिवासनाद्यं य-
　　न्मण्डलेऽग्नौ च यत्कृतम् ॥५२
विधानं पुष्कलं सम्यक्
　　त्वत्प्रसादादिहास्तु तत् ।

परमेशानं विज्ञापयेत् पश्वर्थमिति संगतिः ॥ ५२ ॥

अनुष्ठितकर्मविषयां विज्ञप्तिं कृत्वा, अनुष्ठास्यमानविषयामप्याह

इदानीं शिष्यदेहे तु
सकलीकरणादिका ॥ ५३ ॥
योजन्यन्ताध्वशुद्धिस्तु
त्वत्प्रसादात् प्रसिद्ध्यतु ।

ततः कर्मप्रारम्भनिष्पत्त्यन्तं[1] केवलमन्तर्मुखक्रमेण यावन्निश्चितप्रतिपत्त्यापि भगवदधिष्ठितिमात्मनः स्फुटयेदिति विज्ञप्तेराशयः ५३

अत एव

एवमस्त्वित्यनुज्ञातः
परमेशेन वीरराट् ॥ ५४ ॥
लब्धानुज्ञः प्रहृष्टात्मा
निष्क्रामेन्मण्डलाद्बहिः ।

वीरराडिति परमेश्वराधिष्ठितः एवं लब्धाशेषनिर्दलना[2]त्मकभैरवीभावोऽत एव तत्समावेशात्प्रहृष्टात्मा, बहिरिति जवनिकान्तरिते यागधाम्न्येव ॥ ५४ ॥

पश्वर्थाय कृतं यत्तु
तद्गृहीत्वार्घपात्रकम् ॥ ५५ ॥

---

१ क० पु० निष्पत्त्यर्थमिति पाठः । २ ख० पु० निर्मलात्मकेति पाठः ।

धाम्नस्तु दक्षिणे भागे
कारयेन्मण्डलं गुरुः ।

दक्षिण इति दक्षिणास्यस्य पाशप्लोषक[1]त्वात् ॥ ५५ ॥

अथात्र

प्रणवासनं कुशैर्न्यस्य
शुचिं शिष्यं निवेशयेत् ॥ ५६
शिवाम्भोऽस्त्रेण संताड्य
भस्मना च कुशैः क्रमात् ।
मण्डले कल्पिते शिष्यं
मूर्तिभूतं प्रकल्पयेत् ॥ ५७ ॥

शुचिं स्नातमस्त्रेणेति त्रिषु योज्यम् । कल्पित इति आसनत्वेन, अत्र च मूर्त्यादीनां पूर्वोक्तैव व्याप्तिः । एवमुत्तरत्रापि ॥ ५७ ॥

अथास्य

उपविश्य करन्यासं
निर्दाहाद्यस्त्रपूर्वकम् ।

---

१ क० पु० पापप्लोषकेति पाठः ।

सबाह्याभ्यन्तरं न्यासं
मन्त्रसंधानमेव च ॥ ५८ ॥

गुरुः कुर्यात् ॥ ५८ ॥

ततः

शिवहस्तः प्रदातव्यो
ध्यात्वा देवं सुजाज्वलम् ।

गुरुणा ॥

एवं गुरुरस्य

मूर्ध्नि संपातयेत्तेजः
पाशाङ्कुरविनाशनम् ॥ ५९ ॥

पाशानामङ्कुराः संसारप्ररोहहेतव आद्या उद्भेदास्तेषां नाशनम् । यथोक्तमन्यत्र

'ब्रह्मपञ्चकसंयुक्तः शिवेनाधिष्ठितः शिवः ।
पाशच्छेदकरः क्षेमी शिवहस्तः प्रकीर्तितः ॥
अनेनालब्धमात्रस्तु देही निर्मुक्तबन्धनः ।
प्रयाति शिवसायुज्यं निर्मलो निरुपप्लवः ॥'

इति ॥ ५९ ॥

उत्थाप्य चं ततो नीत्वा
मण्डलं तु प्रवेशयेत् ।

---

१ ख० ० घ० ङ० पु० तं तत इति पाठः ।

इन्द्रियाणां बाह्यप्रसरप्रशमनेन भगवदेकाग्रतामाधातुं बद्धनेत्रस्य मण्डलदर्शनमुचितमित्याह

वस्त्रं संप्रोक्ष्य तोयेन
कवचेनावगुण्ठयेत् ॥ ६० ॥
पूजयेद्गन्धपुष्पाद्यै-
र्भैरवेणाभिमन्त्रयेत् ।
नेत्रे बद्ध्वा तु नेत्रेण

नेत्रेणाभिमन्त्रिते[1] नेत्रमन्त्रोच्चारपूर्वं सर्वेन्द्रियप्रसरपुरःसरभूते[2] नेत्रे बद्ध्वा ॥

शिष्यस्य

पुष्पं पाणौ प्रदापयेत् ॥६१॥

स च

अकामान्निक्षिपेत्पुष्पं
देवस्याभिमुखं स्थितः ।

तदनन्तरं बुभुक्षोः

पुष्पपातवशान्नाम
कुर्याद्वै साधकस्य च ॥ ६२ ॥

---

१ क० ख० ग० पु० मन्त्रितेनेति पाठः ।

२ क० ख० पु० भूतेनेति पाठः ।

वक्त्राङ्गादिपूर्वं शिवान्तं पुंसः, स्त्रियस्तु शक्त्यन्तम् ॥ ६२ ॥

यस्तु निष्कामस्तस्य

मुमुक्षोर्गुरुरिच्छातः

यथारुचि कुर्याद्वा न वेत्यर्थः[1] ॥

पूर्वोक्तस्य साधकदीक्षादीक्ष्यस्य

नाम वै साधकस्य वा ।

वाशब्दो निश्चये कुर्यादेवेत्यर्थः ॥

अथ

मुखमुद्घाट्य तं शिष्यं

शिवाय प्रणिपातयेत् ॥ ६३ ॥

शाक्तमार्गोद्घटनव्याप्त्या मुखमस्य लाघवेनोद्घाटयेत् यथासावुद्भूतफुल्लन्यायेन विकसतीति गुरवः ॥ ६३ ॥

किंच

प्रदक्षिणमतः कृत्वा

मण्डले[2]ऽग्नौ प्रणम्य च ।

---

१ ख० पु० न कुर्यादिति पाठः ।

२ ख० ग० घ० ङ० पु० कलशे इति पाठः ।

अग्निकुण्डसमीपे तु
आचार्यः पशुना सह ॥ ६४ ॥

भवेदिति शेषः । प्रदक्षिणादिकर्तृत्वं द्वयोरपि । अत्र च पूर्वोक्ता कराकर्षणयुक्तिः स्मर्तव्या ॥ ६४ ॥

आत्मसव्येऽथ[1] दिग्भागे
मण्डलं प्रणवेन तु ।
पूर्ववन्नाडिसंधानं
तदर्थं चाहुतित्रयम् ॥ ६५ ॥
संपाताभिहुतिं कृत्वा
अणुतर्पणमेव च ।
पूर्णाहुतिं ततो दत्त्वा
प्रायश्चित्तानि होमयेत् ॥६६॥
धाम्ना चाष्टशतं

'पिङ्गला मध्यमा नाडी शिष्यदेहाद्विनिर्गता ।' (स्व०३।१४९)
इति प्रागुक्तस्थित्या शिष्यकरगुरुजङ्घासङ्ग-

---

१ क० पु० अपसव्ये इति पाठः ।

तदभ्र्युक्त्या नाडीसंधानम्, अणवो मूलाद्या मन्त्राः ॥ ६६ ॥

एतत् कृत्वा

पश्चात्
पातयेदाहुतित्रयम् ।
जात्युद्धारे ध्रुवेणैव
द्विजत्वापादने तथा ॥ ६७ ॥

ध्रुवं प्रणवमुच्चार्य 'अमुकस्य जात्युद्धारं करोमि स्वाहा' इति प्रयोगेण पशुदेहसंबद्धाया जातेरुद्धारे तिस्र आहुतीः पातयेत् । ततोऽपि 'द्विजत्वापादनं करोमि स्वाहा' इति प्रयोगेण भाविरुद्रांशापादनयोग्यतार्थाचिन्त्यशक्तिभिः मन्त्रैः शुद्धविद्यापदजननयोग्यतात्मकद्विजत्वापादनायाहुतीस्तिस्रः पातयेत् । अतश्च यत्किंचिदूचुः—द्विजत्वापादनमेतन्न वर्तमानशरीरविषयम् । तत्र तद्रूव्या[देहा]श्रितायाः शूद्रादिजातेरेव स्थितत्वात् द्विजत्वजातेश्च परस्या नित्याया जन्यत्वाभावादिति कर्मान्तरवशसंभाव्यमानद्विजदेहापेक्षयैवैतद-

ष्टाचत्वारिंशत्संस्कारापादनेन द्विजस्यैव कार्यमिति तदेषां जातिग्रहग्रस्ततयाननुन्मिषितविवेकत्वादविदितपरमेशशास्त्रार्थसतत्त्वमभिधानमुपेक्ष्यमेव । यतो भाविद्विजदेहविषयमेतदित्यत्रार्थे श्रुतिरस्ति[1] । यथा च वर्तमानस्य पशुशरीरस्याचिन्त्यशक्तिमन्त्रप्रभावात् दाहादिकं जात्युद्धारश्च क्रियते तथा शुद्धतत्त्वमयदेहान्तरोत्पत्तिर्द्विजत्वापादनं च यद्यन्तजात्या[न्त्यजा]देरपि क्रियते तन्न काचिदनुपपत्तिः, श्रुतिस्तर्ह्यत्रार्थे यथाभिहितरूपा सेतिकर्तव्यता स्पष्टै[2]वास्ति । श्रूयते हि एतद्यथाद्यापि योगिन्यो मन्त्रादिप्रभावेन देहजात्यादि आत्मनः परस्य च परिवर्तयन्तीति । माहेश्वरे च नये तदुक्तप्रक्रिययापि शिवपुंमायाभ्योऽन्यत्तत्त्वजात्यादि सर्वमेवानित्यम् । यत् तु भुवनाध्वनि अष्टचत्वारिंशत्संस्काराधानेन द्विजत्वापादनं क्रियते तत्पुत्रकस्य वागीश्यां गर्भाधानादियुक्त्या

---

१ ख० ग० घ० ङ० पु० न श्रुतिरिति पाठः ।

२ ख० पु० स्रष्टेति आमृष्टेति च पाठः प्रतिभाति ।

तत्तत्त्वसंभाव्यमानभूतसर्गभोगशुद्धिमध्ये द्विजभोग[1]शुद्ध्यर्थम्, इदं तु समयिनो वर्तमानदेहविषयं तस्य तत्त्वशुद्धेरचोदितत्वात् । अतश्चैतदेव यतो दीक्षितानाम्

'एकैव सा स्मृता जातिर्भैरवीया शिवाव्यया ।'
(स्व० ४।५४१)

इति वक्ष्यमाणस्थित्या न शूद्रादिजातीयत्वमस्ति, प्रत्युत प्राग्जात्युदीरणात् प्रायश्चित्तित्वं शास्त्रसमये स्थितानामुक्तं; द्विजस्यापि चैतदलौकिकं द्विजत्वापादनं कार्यमेव । यत्तु

'............येनेदं तद्धि भोगतः ।' (किरणा०)

इति देहस्थि[2]त्यां वर्तमानदेहे मन्त्रयोजनं (न) कार्यमित्याहुः, तदारब्धदेहकर्मशुद्ध्यर्थं न कार्यमिति यद्युच्यते तद्युक्तं, शोषदाहाप्यायजात्युद्धाराद्यर्थं तु वर्तमानदेहेऽपि चोदितत्वात् कर्तव्यमेव । अन्यथा

'मन्त्रशक्तिभिरुग्राभिः शोषनिर्दहनादिभिः ।
शरीरं शोषितं यै[3]स्तात्तदर्थमभिषेचनम् ॥'(स्व० ४।४४७)

इत्यसंगतं स्यात् ॥ ६७ ॥

---

१ ख० ग० पु० भूतशुद्धीति पाठः । २ ख० पु० स्थित्येति पाठः ।
३ शोष्यते ताभिरिति मूलस्थः पाठः ।

अत्र द्विजत्वापादने कर्तव्यान्तरमाह

बीजाहारे तथा देश-
भावशुद्धौ द्विजो भवेत् ।

प्रणवपूर्वं 'बीजाहारदेशभावशुद्धिममुकस्य करोमि स्वाहा' इत्यत्र प्रयोगः । इह

'ब्राह्मण्यं बीजशुद्ध्या स्यात् सा च स्त्रीषु व्यवस्थिता ।
तासां तु चपलं चित्तं चण्डालेष्वपि धावति ॥'

इति मुकुटसंहितोक्तन्यायान्न क्वचिद्बीजशुद्धिर्वास्तवी संभाव्यते,–इति सा मन्त्रैरेव संपाद्या, आहारस्य श्रुतिस्मृत्युक्तप्रक्रियया अनिर्वाहादशुद्धिरस्ति, देशस्यापि म्लेच्छादिसंपर्कात्, भावस्यासत्यानार्जवादियोगादिति शुद्धिराधेयैव ॥

अत्रैवमस्य मन्त्रैः शुद्धविद्यायां जननेनापादितलोकोत्तरद्विजत्वस्य

प्रणवेनाहुतीस्तिस्रो
रुद्रांशापादने तथा ॥ ६८ ॥

प्रणवपूर्वं 'रुद्रांशो भव स्वाहा'इति प्रयोगात् भाविभैरवीभावभूमिकाग्रहणाय रु-

द्रांशत्वापादनमस्य कार्यं येनाधिगतशास्त्रार्थो रुद्रध्यानैकनिष्ठः स्यात् ॥ ६८ ॥

तत्रेतिकर्तव्यतां दर्शयितुमाह

अस्त्रेण प्रोक्षयेच्छिष्यं
पुष्पयुक्तेन ताडयेत् ।
रेचकेन ततो गत्वा
शिष्यदेहे विशेद्धृदि ॥ ६९ ॥

पुष्पेति अस्त्रजप्तेन पुष्पेणेत्यर्थः । रेचकेनेत्यूर्ध्वमार्गिकेण ॥ ६९ ॥

अथ तत्र

ओंकारादि शिवं जप्त्वा
अस्त्रमन्त्रं फडन्तगम् ।
विश्लेषकरणं कृत्वा
चैतन्यस्य विधानतः ॥ ७० ॥
छेदयेदस्त्रमन्त्रेण
कवचेनावगुण्ठयेत् ।
अङ्कुशेन समाकृष्य
द्वादशान्ते तु कारयेत् ॥७१॥

तत्रस्थः पुद्गलो ग्राह्यः
संपुट्यैव ध्रुवेण तु ।
संहारमुद्रया सम्यक्

शिवं निष्कलं[1], चैतन्यस्येति पुर्यष्टकरूपस्य, विधानत इति पूर्वोक्तरश्मिमात्रावियोगभावनया, अङ्कुशेनेति मूलमन्त्रस्य कुटिलकलाक्रमेण अङ्कुशमुद्राप्रदर्शनेन चेत्यर्थः । पुद्गलो जीवः, सम्यगिति स्वाभेदप्रतीतिदार्ढ्येन । यथोक्तं स्पन्दे

'............अयमेवात्मनो ग्रहः ।' (स्प० २।७)

इति ॥

अथोर्ध्वकेन
पूरकेण विशेद्धृदि ॥ ७२ ॥

स्वस्मिन् ॥ ७२ ॥

तत्र
संस्कुंभ्य[2] सरसीकृत्य
रेचयेत्पुद्गलं पुनः ।

---

१ ख० पु० निष्कलनाथमिति पाठः ।

२ क० संकुभ्येति पाठः ।

त्यजन्तं देवताषट्कं
ततश्चापि स्वकं पदम् ॥ ७३ ॥

समरसीकरणं वक्ष्यमाणस्वाभेदापादनं, रेचनमूर्ध्वोद्वेष्टनक्रमेण, देवता ब्रह्मविष्णुरुद्रेश्वरसदाशिवशिवाख्या हृत्कण्ठतालुभ्रूमध्यललाटब्रह्मरन्ध्रगाः, तत्त्याग एव शिष्यस्य तदधिष्ठिताध्वनि विश्लेषयोग्यताधानहेतुः, स्वामिनि जिते स्वस्यापि जयात्; स्वकं पदं भ्रूमध्यम् । यद्वक्ष्यति

'ऐश्वरं लभते पदम् ।' (स्व० ४।७९)

इति तन्नये[1] तु तत्पदप्रापकात् तदाराधनाद्योग्यतामस्यादधीत । यदुक्तं मृगेन्द्रायाम्

'इति सामयिकं कर्म ....।'

इत्युपक्रम्य

'यत्प्राप्य योग्यतामेति ....॥'

इति ॥ ७३ ॥

तत्रस्थं पुद्गलं गृह्य
संपुट्य च भवेन तु ।

१ घ० ङ० पु० तत्र हेतुरिति पाठः ।

संहारमुद्रयोद्धृत्य
शिष्यस्य हृदि योजयेत् ॥७४॥
भैरवेणाभिमन्त्र्य

भवेन भैरवेणेति निष्कलेनाभिमन्त्रणं च सप्तवारानित्याहुः । तदेतावत्पर्यन्तो रुद्रांशापादनाय ग्रन्थो नतु द्विजत्वापादनायेति भ्रमितव्यम् ॥ ७४ ॥

द्विजत्वापादने तु पूर्वोक्ते वक्तव्यशेषमाह

एव-
मुपवीतं शिशोर्ददेत् ।

एवमिति भैरवेणाभिमन्त्र्य मन्त्रशक्त्यैव इदानीं शुद्धविद्यापदोद्भवात्मकद्वितीयजन्मयोगात् द्विजत्वं भवति । उपवीतमिति, उप आत्मसमीपे विशेषेण[1] मन्त्रसामर्थ्यात्मना इतं संबद्धं वीतं च शुद्धमनन्तमन्त्रदैवतव्यापकशुद्धविद्यात्मकशक्तिसूत्रप्रतिकृतिरूपमेतदुपवीतम्[2] ॥

१ ख० ग० घ० ङ० पु० विश्लेषेणेति पाठः । २ ख० पु० रूपमेवैतदिति पाठः ।

दत्तोपवीतो हि असौ

आधानाद्यावदन्त्येष्टिं

द्विजत्वे संस्कृतो भवेत् ॥७५॥

गर्भाधानादयो वक्ष्यमाणाश्चत्वारिंशच्छुद्धविद्योद्भवात्मकप्रोक्तद्वितीयजन्मोपयोगाय, ते च[1] मन्त्रशक्त्यैव सिद्ध्यन्ति ॥ ७५ ॥

एतच्चत्वारिंशता संस्कारैः

पिण्डस्यापादनं जातेः

भवतीति शेषः ॥

कथमित्याह

आहुतित्रितयेन तु ।

पूर्वं निर्णीतेनैव इत्यर्थः ॥

न केवलमियता संस्कारैः पिण्डस्य जात्यापादनं यावत्

चैतन्यस्यापि संस्कार-

माधानान्त्येष्टितः परम् ॥७६॥

१ ख० घ० ङ० पु० ते चेहेत्येवंविधः पाठः ।

सूक्ष्मविज्ञानतः कृत्वा
द्विजत्वे संस्कृतो भवेत् ।

आधानेनादिभाविना सहितः पर्यन्तवर्ती अन्त्येष्ट्यात्मा चत्वारिंशः संस्कारः, ततः परं वक्ष्यमाणं दयाक्षान्त्याद्यात्मकात्मगुणसंस्काराष्टकं सूक्ष्मविज्ञानत इति भावनया । एवं द्विजत्वापादनार्थं यथोक्तं निर्वर्त्योक्तसतत्त्वं रुद्रांशापादनं कर्तव्यम् ॥ ७६ ॥

तदन्तेऽपि

शतहोमं सहस्रं वा
हुत्वा पूर्णाहुतिं ततः ॥ ७७ ॥

दद्यादिति शेषः । शतादिहोमो मूलमन्त्रस्य तदङ्गानां तु दशांशः इति स्थितमेव ॥ ७७ ॥

तदिदमुपसंहरति

समयी संस्कृतो ह्येवं

एवमिति जात्युद्धारद्विजत्वरुद्रांशापत्तिभिः समयी समयः पारमेशशास्त्रमर्यादावर्तनमस्यास्तीति कृत्वा ।

यदाह

वाचनेऽस्यार्हता भवेत्।
श्रवणेऽध्ययने होमे
पूजनादौ तथैव च ॥ ७८ ॥

वाचनं बुद्ध्याद्यारोहायावर्तनं, श्रवणमर्थावबोधः, अध्ययनं वेदवत्सततपाठ आगमग्रन्थस्य, आदिशब्देन जपध्यानादयः ॥ ७८ ॥

इत्थमयं समयी

चर्याध्यानविशुद्धात्मा
लभते पदमैश्वरम्।

चर्याध्यानाभ्यां समयपालनयोगाभ्यासाभ्यामेव विशुद्ध आत्मा यस्य। दीक्षया हि अस्याध्वशुद्धियोजनेन विना ईश्वरयोगयोग्यतैवाहितेति तद्योगादेव अस्य पाशशुद्धावीश्वरपदाप्तिः। अतश्च यत्कश्चिदीश्वरतत्त्वयोजितस्यास्य पुत्रकादिदीक्षायामधरपदशोधनं न युक्तम् इति ईश्वरपदं

'शुद्धभावस्थितस्यास्य कालरुद्रं निधापयेत्।'

इति किरणवाक्यानुसारेण कालाग्निधाम वा

[मैव] इत्यवोचत् तदसत्, समयिनो योजनिकादेरचोदितत्वात् कैरणस्य वाक्यस्य चास्य पुत्रकाश्रयभुवनदीक्षाविषयत्वात् । किरणायां हि समयिदीक्षान्ते

'..................... ततो दीक्षां समाचरेत् ।'

इत्युपक्रम्य पुत्रकविषयभुवनदीक्षा एतद्वाक्यप्रमुखं निर्वाहितेत्यलम् । ऐश्वरपदलाभोऽपरा मुक्तिः ॥

अथोक्तसमयिदीक्षानन्तरनिर्वर्त्यां प्रथमत एव वा कर्तव्यां पुत्रकादिदीक्षां निर्णेतुं प्रस्तौति

अथ दीक्षाध्वशुद्ध्यर्थं
भुक्तिमुक्तिफलार्थिनाम् ॥७९॥
विधानमुच्यते सूक्ष्मं
पाशविच्छित्तिकारकम् ।

भुक्त्यर्थिनः साधकाः मुक्त्यर्थिनः पुत्रकाचार्याः, तेषां या दीक्षा तस्यामध्वशुद्ध्यर्थं सूक्ष्ममिति भाविव्याप्त्या समूलपाशोन्मूलने[1]

---

1 ख० उन्मूलेन ।

परतत्त्वयोजनिकादिरूपं विधानमुच्यते । समयिनस्तु अधिष्ठातृकारणविश्लेषमात्रपूर्वमीश्वरतत्त्वाराधनयोगयोग्यता,—इति तं प्रति न सूक्ष्मविधानं नापि परा मुक्तिर्नापि मन्त्राराधनक्रमेण भुक्तिरिति भाविपुत्रकादिपदप्राप्तियोग्यताजननमात्रं समयिदीक्षालक्षणम् । यथोक्तम्

'..................समयी राजपुत्रवत् ।'

इति ॥ ७९ ॥

अथ पुत्रकसाधकदीक्षयोर्विषयविभागं सपीठिकाबन्धं करोति

गुरुः संपृच्छते शिष्यं
द्विविधं फलकाङ्क्षिणम् ॥८०॥

द्विविधं बुभुक्षुं मुमुक्षुं वा, फलमिति मोक्षो भोगो वा ॥ ८० ॥

अतश्चेदमस्मै ब्रूयात्

फलमाकाङ्क्षसे यादृ-
क्तादृक् साधनमारभे ।

साधनं दीक्षाविधिः ॥

यतः

वासनाभेदतः प्राप्तिः
साध्यमन्त्रप्रचोदिता ॥ ८१ ॥

साध्य आराध्यो यो मन्त्रः स चिन्तामणिकल्पो वासनानुसारं फलति । अत एव श्रीस्पन्दे

'तदाक्रम्य बलं मन्त्राः ।' (स्प० २।१०)

इत्युपक्रम्य

'सहाराधकचित्तेन ।' (स्प० २।१० ।)

इत्यन्तम् ॥ ८१ ॥

तथा च

मन्त्रमुद्राध्वद्रव्याणां
होमः साधारणः स्मृतः ।

भुक्तौ मुक्तौ च ॥

स तु

वासनाभेदतो भिन्नः
शिष्याणां च गुरोस्तथा ॥८२॥

यदा शिष्यः स्वप्रत्ययी तदा गुरुः तद्वासनानुसारं मुक्तये भुक्तये वा जुहुयात् । यदा तु

गुरुप्रत्ययी तदासौ स्ववासनानुसारं मुक्तय एव तस्य बुभुक्षाभावादित्यर्थलभ्योऽयमत्राशयः ॥ ८२ ॥

अथ वासनाभेदतः शिष्यभेदं प्रतिपादयति

साधको द्विविधस्तत्र
शिवधर्म्यैकतः स्थितः ।
शिवमन्त्रविशुद्धाध्वा
साध्यमन्त्रानियोजितः ॥ ८३ ॥
ज्ञानवांश्चाभिषिक्तश्च
मन्त्राराधनतत्परः ।
त्रिविधायास्तु सिद्धेर्वै
सोऽत्रार्हः शिवसाधकः ॥८४॥

शिवधर्मः शिवशास्त्रोक्तसमाचारः नित्यावियोगेन विद्यते यस्य, अत एव शिवपदेन साध्यमन्त्रेणैव विशुद्धो न तु लोकधर्मिण इव अंशेन स्थापितोऽध्वा यस्य, यस्मिन्नेव च सा-

---

१ ख० पु० नित्ययोगेनेति पाठः ।

ध्यमन्त्रयोजित इत्याचार्येणाराधकत्वेन नियुक्तः। ज्ञानवानिति अधिगतमन्त्रतन्त्ररहस्यः ॥ ८४ ॥

अपरमाह

द्वितीयो[1] लोकमार्गस्थ
इष्टापूर्तविधौ रतः ।
कर्मकृत्फलमाकाङ्क्षन्[2]
शुभैकस्थोऽशुभोज्झितः ॥८५॥

लोकमार्गः श्रुतिस्मृत्याचारः, इष्टं तीर्थस्नानान्नदानादि, पूर्तं कूपतडाकमठादि, फलमाकाङ्क्षन् कर्म शुभमेव करोति न तु मन्त्राराधनम्

'लोकधर्मिण्यसौ दीक्षा मन्त्राराधनवर्जिता ।'
(स्व० ४।१४५)

इति वक्ष्यमाणत्वात् शुभकर्मणैव तु फलस्य साधनात्साधकोऽयं, दीक्षया त्वस्याशुभमात्रमेव शमनीयमित्याह अशुभोज्झित इति ॥८५

---

१ क० ख० पु० द्विविधो लोकेति पाठः। २ ख० पु० साकाङ्क्ष इति पाठः ।

अत एव

तस्य कार्यं सदा मन्त्रै-
रशुभांशविनाशनम् ।

सदेति देहारम्भकर्मवर्जं यद्यदकरोत् करिष्यति वा तत्र मध्ये योऽशुभांशः स सर्वोऽस्य शोध्यः ॥

'···प्रारब्धेकं न शोधयेत् ।' (स्व० ४।१४३)

इति वाक्यस्य प्रायशः सर्वविषयत्वादसंकीर्णाचारेण शिवधर्मिणा भाव्यमित्याह

गृहस्थो वा यतिर्वासा-
वाश्रमैकतमस्थितः[1] ॥ ८६ ॥

श्मशानादिक[2]वृत्तेनैव वा सिद्धिं साधयेत्, गृहस्थवृत्तेन तादृशैरेव द्रव्यैः न तु शवलतया, असाविति शिवधर्मी न त्वन्यः तस्य मन्त्रारा[3]धनेऽनधिकारात् न तु आश्रमानवक्लृप्तिपरमेतत् इहानुपयोगात् ॥ ८६ ॥

---

१ क० ख० पु० आश्रमैक उपस्थित इति पाठः । २ ग० पु० श्माशानिकवृत्तेति पाठः । ३ ख० पु० मुद्राराधनेति पाठः ।

साधकं निर्णीय मोक्षैकनिष्ठं पुत्रकं निर्णेतुमाह

मुमुक्षुर्द्विविधः प्रोक्तो
निर्बीजो बीजवान्पुनः ।

उभयोर्विषयविभागमाह

बालबालिशवृद्धस्त्री-
भोगभुग्व्याधितात्मनाम् ॥८७॥
एषां निर्बीजिका दीक्षा
समयादिविवर्जिता ।

बालिशो मूर्खः, वृद्धोऽनुष्ठानासमर्थः, भोगभुक् उपनतभोगैकसक्तोऽप्यायातशक्तिपातो दीक्ष्य एव । अन्ये त्वालस्योपहतोऽयं न पात्रम्, अतो भोगभुक् अपथ्यपरश्चासौ व्याधित इति योजयन्ति, व्याधितो दुश्चिकित्स्यः, निर्बीजिकेत्यस्य व्याख्यानं समयादिविवर्जितेति आदिशब्दात्पवित्रकादिविधिः । वक्ष्यति च

'समयाचारपाशांश्च निर्बीजायां विशोधयेत् ।'
(स्व० ४।१४९)

इति ॥ ८७ ॥

विद्वद्वन्द्वसहाना तु
सबीजा[1] कीर्तिता प्रिये ॥ ८८ ॥

विदुषां शास्त्रविवेककुशलानां द्वन्द्वसहानां व्रतचर्यादिक्लेशक्षमाणां समयपालनेऽपि शक्तत्वात् ॥ ८८ ॥

दीक्षानुग्राहिका तेषां
समयाचारसंयुता ।

पूर्वाविवेक्यशक्तविषया इयं तु विपरीतविषयेति तात्पर्यम् ॥

अतश्च

विशेषसमयाचारा
मन्त्राख्ये ये प्रकीर्तिताः ॥८९॥
तेऽत्र पाल्याः प्रयत्नेन
मोक्षसिद्धिमभीप्सता ।

मन्त्राख्ये मन्त्रपीठे, अस्मिन् ये

'न निन्देद्भैरवं देवं न च शास्त्रं तदुद्भवम् ।'
(स्व० ५।४५)

१ ख० पु० निर्बीजेति पाठः ।

इत्यादयो वक्ष्यमाणा विशेषसमयाचारा उक्ताः, ते अत्रेति सबीजदीक्षायां प्रयत्नेन पाल्याः, अन्यथा प्रायश्चित्तित्वमिति भविष्यति । मन्त्राख्ये इति विद्यापीठादेरप्युपलक्षणपरम् ॥ ८९ ॥

येयमेव निर्णीता दीक्षा

सबीजा सा तु विज्ञेया
पुत्रकाचार्ययोः स्थिता ॥ ९० ॥

वागीश्या गर्भोद्धृतेः संसारप्रशमनेनानुकम्पितः पुत्रः पुत्रकः, साधकदीक्षायां यद्यपि समयपालनमाम्नातं तथापि न तद्दीक्षा सबीजोच्यते, मुमुक्षुर्द्विविधः इति परिभाषणात् ॥९०॥

एवमस्मिंश्चतुर्विधे दीक्षाकर्मणि प्रथमम्

गृहस्थो वाश्रमी वाथ
यतिः संकल्प्य दीक्षयेत् ।

वाक्यार्थस्यात्र कर्मता पश्य मृगो धावतीतिवत्, तेन गृहस्थोऽयमाश्रमीति ऐहिकभोगस्पृहयालुः, यतिरित्येतद्विपरीतो वेत्येतत्

---

१ ख० पु० अपि इति पाठः ।

प्रथमं संकल्प्य एतदुचितेनैव असंकीर्णेन विधिना दीक्षां कुर्यात् ॥

तत्र पुत्रकदीक्षायां प्रक्रमते

पाशसूत्रकमादाय
शिष्यदेहेऽवलम्बयेत् ॥ ९१ ॥

अधिवासावसरे अधिवास्यकुम्भाग्रे यत्संरक्ष्य स्थापितमवलम्बनं शिखाग्रात्पादान्तं प्राग्वत् ॥ ९१ ॥

अथ

अध्वानं संधयेदग्नौ
धाम्ना चैव विचक्षणः ।

वक्ष्यमाणषडध्वव्याप्तिज्ञो गुरुः प्राधान्यात् शिवाग्नावेव अशेषपाशप्लोषिणि, अध्वानमितीह प्रस्तुतं कलाध्वानं, तत्त्वादिदीक्षायां तु तत्त्वादिरूपं संदधीत ॥

न चाग्नावेव यावत्

कुम्भमण्डलवह्निस्थ-
श्चाध्वात्मस्थः शिशोश्च यः ९२

१ ख० पु० तदुचितेति पाठः ।

सूत्रस्थश्चापि चैकत्र
अध्वसंधिः प्रकीर्तितः ।

आत्मस्थ इति गुरोः ॥ ९२ ॥

एकत्रेत्युक्तमधिकरणं विभजन्नध्वशुद्धिं निरूपयितुमाह

षड्विधस्याध्वमार्गस्य
साधारणगतस्य तु ॥ ९३ ॥
कुण्डे संकल्प्य संशोध्य-
मध्वसंधौ[1] तु होमयेत् ।

वर्णमन्त्रपदकलातत्त्वभुवनभेदात् षड्विधस्याध्वनः तत्तत्पदप्राप्तिहेतुतया मार्गरूपस्य कुम्भादिषु षट्सु अधिकरणेषु साधारणगतस्याभेदेन[2] स्थितस्य तथा ज्ञातस्य च मध्यात् संशोध्यमित्यन्तर्भूताध्वपञ्चकमेकतमं प्राधान्येन शोधयितुमिष्टं, कुण्डे इति तत्स्थे शिवाग्नौ संकल्प्य अध्वसंधिनिमित्तं होमं कुर्यात् ॥ ९३ ॥

१ ख० पु० मन्त्रसंधाविति पाठः । २ ख० अभेदस्थित० ।

कथमित्याह

मूलमन्त्राष्टशतिक-
मध्वसंधानहेतुतः ॥ ९४ ॥

प्रणवमूलमन्त्रोच्चारपूर्वमध्वसंधिर्भवतु स्वाहा इति प्रयोगेनाध्वव्याप्तिज्ञो गुरुरष्टोत्तरं शतं जुहुयादिति यावत् ॥ ९४ ॥

अध्वावलोकनं पश्चा-
द्व्याप्यव्यापकभेदतः ।

अवलोकनं भावनं कुर्यादिति शेषः ॥

व्याप्तिं स्फुटयति

भुवनव्याप्तिता तत्त्वे-
ष्वनन्तादिशिवान्तके ॥ ९५ ॥

अनन्तादिशिवान्तके यानि भुवनानि तद्व्यापकत्वं तत्त्वेषु ॥ ९५ ॥

तानि च तत्त्वानि

व्यापकानि च षट्त्रिंशत्

ये त्वन्ये त्रयोऽध्वानः

मन्त्रवर्णपदात्मकाः ।

वर्णाः पञ्चाशत् पदानि नवात्मसंबन्धीन्येकाशीतिः ॥

ते च

तत्त्वान्तर्भाविनः सर्वे

तत्त्वानि अन्तर्भावयन्तीति कृत्वा ।

कथम्

वाच्यवाचकयोगतः ॥ ९६ ॥

तत्त्वानि वाच्यानि मन्त्रादयो वाचकाः । यथा च अयं वाच्यवाचकभावस्तथाग्रे भविष्यति ॥ ९६ ॥

कलादीक्षायाः प्रस्तुतत्वात् तदन्तर्भावं तावत्पञ्चानामध्वनामाह

कलान्तर्भाविनस्ते वै

निवृत्त्याद्याश्च ताः स्मृताः ।

अस्य सर्वस्य अध्वग्रन्थस्यायं पिण्डार्थः— परमेश्वरश्चिदानन्दघनः स्वतन्त्रभट्टारकः एकादशपटलनिरूपयिष्यमाणस्थित्या उन्मनाख्यया स्वस्वातन्त्र्यशक्त्या शून्यादिक्षित्यन्तमनन्तं

वाच्यवाचकरूपं स्वभित्तौ स्वानधिकमप्यधि-
कमिव युगपदवभासयति । तत्र वाचकं ग्रा-
हकभागावस्थितं परसूक्ष्मस्थूलभेदेन वर्णम-
न्त्रपदात्मकं त्रिधा, वाच्यमपि ग्राह्यभागाभि-
निविष्टं कलातत्त्वभुवनात्मकं, तथैव वर्णा
ह्यभेदविमर्शसाराः किंचित्स्थौल्येन भेदा-
भेदविमर्शनात्मकमन्त्ररूपतामाश्रित्य ततोऽपि
स्थौल्येन भेदविमर्शावगमकपदरूपतया भा-
न्ति । एवं वाच्यरूपा पारमेश्वरी कलाख्या
शक्तिरुत्तरोत्तरवैशिष्ट्येन तत्त्वभुवनात्मतां गृ-
ह्णाति, वस्तुतश्चेयमक्रमैव पारमेश्वरी शक्तिः
स्फुरति, तत्रापि च स्वस्वातन्त्र्यात् दर्पणनगर-
वत् क्रममप्यादर्शयति, क्रमेपि च पूर्वं पूर्व-
मुत्तरत्र व्यापकतया स्थितं मृदिव घटादौ
उत्तरमुत्तरं तु पूर्वत्र शक्त्यात्मना स्थितं वृक्ष
इव स्वबीज इति सर्वं सर्वात्मकमेव । अत
एव पञ्चतत्त्वदीक्षायामनाश्रिततत्त्वपर्यन्ता भू-
तव्याप्तिर्भविष्यति । एवं चैकैकोऽपि प्रमाता
भावो वा वस्तुतः षडध्वस्फाररूपपारमेशश-
क्तिमयादिहान्तपरामर्शसाराहन्ताविश्रान्तिस-

तत्त्वः परभैरवरूप एव, तथात्वापरिज्ञानात् तु तन्मायाशक्तिकृतादपूर्णमन्यः शब्दराशि-कलाविलुप्तविभवत्वात् वर्णादिभिः कलादि-भिश्च तात्त्विकस्वरूपेणास्फुरद्भिः प्रत्ययोद्भव-क्रमेण देहादौ ग्राहिताहंभावो विषयमात्रासु ग्राहितभोक्तृताभिमानश्च खेचर्यादिचक्रचतु-ष्टयस्य भोग्यतां प्राप्तो[1] बद्धः पशुः संपन्न,—इत्यस्य पशुभावशमनाय पारमेश्वरी अनुग्रा-हिका शक्तिः शिवाभिन्नाचार्यहृदये पारमा-र्थिकेन स्वरूपेण स्फुरन्ती शिष्यस्य सर्वम-ध्वानं संकोचकत्वप्रशमनेन असंकुचितस्वश-क्तिसारतया स्फारयन्ती शोधयति दीक्षाज्ञा-नादियोगेन, अत एवमाचार्यस्फारसारा म-न्त्रादयः शोधकाः पश्वात्माभिनिविष्टाः शो-ध्याः, — इति शोध्यशोधकभावेऽपि न काचित् क्षतिः। यतश्चैकैकस्यापि अध्वनः सर्वमयत्व-मस्ति अत एव तत्तदध्वप्राधान्येन दीक्षाया-मन्याध्वपञ्चकमन्तर्भावशोधनमुक्तव्याप्तिसत-त्त्वं कार्यम्। उक्तं च श्रीस्पन्दे

---

१ ख० पु० प्राप्तुमिति पाठः ।

'सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥'
(३।१८)

इत्यलं, केवलं

'यावन्न वेत्ति वै व्याप्तिं कुण्डस्यैवात्मनोऽपि वा ।
साध्यस्यैवं पशोश्चैव पाशानां च षडध्वनः ॥
बालवत् क्रीडते तावत्कार्यं तस्य कथं भवेत् ।' (१६।५४)

इति मृत्युजित्युक्तत्वात् तत्र तत्र व्याप्तिप्रदर्शनायायमस्माकं भरः,—इति न नो वाचालता कल्प्या सचेतोभिः ॥

अथ प्रसङ्गात्कलावाचकान्मन्त्रानाह

हृदाद्या वाचकास्तासां
बीजमन्त्राः प्रकीर्तिताः ॥९७॥

बीजमन्त्रा इति निष्कलाः, हृदाद्या इति हृच्छिरःशिखाकवचनेत्रमन्त्राः क्रमेण निवृत्त्यादीनां वाचकाः ॥ ९७ ॥

एवं चास्मिन् कलादीक्षाविधौ

एकैकस्याः कलायाश्च
पृथग्व्याप्तिं विभावयेत् ।

सा चादूर एव व्यक्तीभविष्यति ॥

---

१ ख॰पु॰ साध्यस्य वा इति पाठः

ता[1]श्च

पृथिव्यादिकला ज्ञेया
ब्रह्माद्याः कारणाश्च ते ॥ ९८ ॥

निवृत्त्याद्याः पृथिव्यादिशक्तिरूपा ज्ञेयाः पृथिव्यादीनामेवानाश्रितपर्यन्तं सूक्ष्मतयावस्थानात् । एतच्च पञ्चतत्त्वदीक्षाविधौ स्फुटीभविष्यति । एता एवमधिष्ठातृरूपतया ब्रह्मविष्णुरुद्रेश्वरसदाशिवशिवाः, अतश्च अधिष्ठातृदेवताशुद्ध्याप्येताः शुद्धा भवन्तीत्यपि सूचितम् ॥ ९८ ॥

उपसंहरति

एवं व्याप्तिं भावयित्वा

प्रतिकलं समनन्तरवक्ष्यमाणव्याप्तिमेवमिति निर्णीतपरसूक्ष्मस्थूलक्रमेणाध्वनो भावयित्वा

अध्वोपस्थापनं भवेत् ।

उपस्थापनमेकतमस्य प्रधानतया शुद्ध्यर्थं संमुखीकरणम् । अत्र च धामादीत्यादिना (स्व० ४।१०१) मन्त्रं वक्ष्यति ॥

---

१ क०ग०पु० एता इति पाठः ।

एवमुपस्थितस्य संनिधानाय

त्रिराहुतिं ध्रुवेणैव

दद्यादिति शेषः ॥

किं च

अध्वशुद्धिरतो भवेत् ॥ ९९ ॥

कथमित्याह

अग्नौ तु पूजिते देवे

अध्वन्यासे कृते सति ।

तदेव पादादारभ्य

पृथिव्यादिक्रमान्न्यसेत्॥१००॥

तदेवेति निवृत्त्यादिरूपं, पादादिति संहारक्रमेण, तत्र गुल्फान्तं निवृत्तिः, नाभ्यन्तं प्रतिष्ठा, तात्वन्तं विद्या, मूर्धान्तं शान्तिः, ब्रह्मरन्ध्रान्तं शान्त्यतीता, – इति भविष्यति । इत्थं च वर्तमानप्राणदेहप्रतिकृतिरूपे सूत्रकदेहानुसारिगुल्फनाभ्याद्यवधिमति अध्वन्यासतच्छुद्ध्यादिकं कृतं देहेऽपि संपन्नमेवेति न तत्र समयदीक्षायामिव पृथक् जात्युद्धारद्विजत्वापत्त्यादि क्रियते पृथगचोदनात् । भाविस्थित्या

तु निष्कृतिहोमान्तर्भावेन भाविदेहाश्रयतयापि चैतन्यस्य तत्कृतं तत्स्थीकरणादियुक्त्या वर्तमानदेहाश्रयस्यापि संपद्यते । एवं समयदीक्षान्तर्भाविपुत्रकदीक्षापक्षे च वर्तमानदेहविषयो दीक्षासंस्कारः पुनरुपयुक्तः ॥ १०० ॥

पूर्वोक्ते उपस्थापने मन्त्रमाह

धामादिः प्रणवादिश्च
निवृत्त्यै च नमः पुनः ।
उपस्थापनमन्त्रोऽयं
व्याप्तिं ध्यात्वाध्वसंस्थिताम् १०१

प्रयोक्तव्य इति शेषः । अत्र च प्रणवधामभ्यामनन्तरं हृन्मन्त्रः पूर्वोक्तः पठनीयः

'हृदाद्या वाचकास्तासां बीजमन्त्रा ......।'

इत्युक्तत्वात् । एवमुत्तरत्रापि ज्ञेयम्[1] ॥ १०१ ॥

यदुक्तम् एकैकस्याः कलायाः पृथग्व्याप्तिरिति तत् स्पष्टयति

निवृत्त्यभ्यन्तरे पृथ्वी
शतकोटिप्रविस्तरा ।

---

१ ख० पु० योज्यमिति पाठः ।

तस्यां च भुवनानां च
शतमष्टोत्तरावधि ॥ १०२ ॥
अष्टाविंशतिः पदानि
वर्ण एकोऽत्र संस्थितः ।
मन्त्रौ द्वावेव विज्ञेयौ

शतकोटीति योजनशतकोटिविस्तारेत्यर्थः । शतमष्टोत्तरावधीति, तत्र कालाग्निः कूष्माण्डो हाटक इति ब्रह्माण्डान्तरधोभागगतास्त्रयः । मध्ये भूलोकाधिपतिः शिवः, तदुपरि सत्यलोकान्तमधिष्ठाता ब्रह्मा, तदुपरि विष्णुरुद्रौ स्वलोकयोरित्यन्तः सप्त, बहिरस्य दशसु दिक्षु स्थितं रुद्रशतं तदुपरि सर्वेषां स्वामी वीरभद्रः, इत्येतदष्टोत्तरं शतम्, पदानि त्वष्टाविंशतिः, भाविनवनाभमण्डलारम्भिभागैकाशीतिनिविष्टवक्ष्यमाणविभागनवात्मवर्णान्येकाशीतिस्तत्त्वा[1]द्विश्रान्तिप्रदत्वात्पदानि; तेभ्यः प्रकृतितत्त्वाधिष्ठितेशादिग्गतभागनवकगतं प्रातिलोम्येनेशोत्तरादिक्रमेण मध्यपदं यावत् ओंका-

१ ख० पु० तत्त्वप्रदेति पाठः ।

राद्यूकारान्तं पदनवकं, तथैव पुरुषतत्त्वाश्रितकुवेरदिग्गतमूकारादियकारान्तं नवकम्, एवं नियतिस्थानस्थवायुदिग्गत[1]मूकारान्तमिति सप्तविंशतिः पदानि; [2]कालतत्त्वास्पदवरुणदिग्गतैशकोणस्थ ऊकारश्चेत्यष्टाविंशतिः पदानि । अत्रैव स्पष्टीकरणार्थमयं प्रस्तारः प्रदर्श्यते ।

सदाशिवः

प्रकृतिः	ओं	ह	र	ऊ	ओं	र	ऊ	ह	ओं	ईश्वरः
	य	ऊ	क्ष	य	ह	क्ष	य	र	क्ष	
	व	ल	म	व	ल	म	व	ल	म	
पुरुषः	ऊ	ह	र	ऊ	ह	र	ऊ	ह	र	शुद्धविद्या
	ओं	य	क्ष	य	ओं	क्ष	य	क्ष	ओं	
	व	ल	म	व	ल	म	व	ल	म	
नियतिः	ऊ	ह	र	ऊ	ह	र	ऊ	ह	र	माया
	य	व	क्ष	य	ल	क्ष	य	म	क्ष	
	ओं	ल	म	व	ओं	म	व	ल	ओं	

कालः

वर्ण एक इति मातृकासंबन्धी प्रातिलो-

१ ख० पु० दिक्स्थयकारादि इति पाठः । २ क० पु० कलेति पाठः ।

म्येन क्षः । यद्यप्ययं पूर्वं वक्त्रभङ्ग्या शान्त्यतीतापरमार्थे ईशानवक्त्रवाचकत्वेन निरूपित इह तु पृथिवीवाचकत्वेन, तथापि आदिक्षान्तस्य शब्दराशेरशेषविश्वशरीरपरभैरवपरामर्शात्मकत्वेन एकैकोऽप्ययंशः

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्प्यश्च ।'

इति स्थित्या विश्वरूपत्वाद्विश्वाभिधायको, वाच्योऽपि चांशः

'एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता ।'

इति नीत्या विश्वात्मकत्वात् सर्ववर्णवाच्यः । ततश्च भगवता शक्तिनियन्त्रणाय एवमत्यणवपि वा तत्तदागमे सिद्धवाचकभावे विचित्रदीक्षादिक्रमोपयोगिनि निरूप्यमाणेऽपि न कांचिदनुपपत्तिः[1] । मन्त्राविति निष्कलसद्योजातौ[2] ॥

एवमस्यां निवृत्तिकलायाम्

अध्वषट्कं विभावयेत् ॥ १०२ ॥

---

१ ख० पु० कदाचिदिति पाठः । २ क० पु० १ नैष्कलहृदये पाठः ।

अथेमां निवृत्तिमन्तर्भावितापराध्वव्याप्तिं पूर्वोक्तक्रमेण[1]

पुष्पगन्धादिना पूज्य

अस्याश्च प्राङ्मन्त्रेण

संनिधावाहुतित्रयम् ।

संनिधानाय आहुतित्रयं दद्यादिति शेषः । कलाद्यध्वान्तर्मलत्रयं शोध्यमिति वक्तुमाह

मायीया भुवनाकारा

मलाः कर्म च संस्थिताः ॥१०४॥

पाशा इति शेषः ॥ १०४ ॥

तत्र

शरीरभुवनाकारा

मायीयाः परिकीर्तिताः ।

भोगहेतुश्च कर्म स्या-

दभिलाषो मलोऽत्र तु ॥१०५॥

भुवनैर्भावभूतादि लक्ष्यते, तेन यत्किंचिद्वेद्यतया[2] भाति स मायीयो मलः, भोगेन

---

१ ख० पु० पूर्वोक्तसत्रेणेति पाठः । २ ख० पु० भेद्यतयेति पाठः ।

तदाक्षिप्तं जन्मापि लक्षितम् । उक्तं च प्रत्यभिज्ञायाम्

'भिन्नवेद्यप्रथात्रैव मायाख्यं............।'

इति । तथा

'...............जन्मभोगदम् ।'

'कर्तर्यबोधे कार्मं तु ।' (ई० प्र० ३।२।५)

इति । 'अभिलाष' इति अपूर्णंमन्यतात्मा लोलिकारूपः नतु किंचिन्मे स्यादितीदृक् रागतत्त्वस्यैवमात्मत्वात् । अत्र त्विति, एतस्मिन्नाणवे भित्तिभूते सति अन्यन्मलद्वयमित्यर्थः ॥ १०५ ॥

अत एव शान्त्यतीतायामपि सूक्ष्मभुवनावस्थितेः प्रतिपादयिष्यमाणत्वात् तावतांशेन मलसंस्कारस्य सत्त्वात् शोध्यतां प्रतिपादयिष्यन्नुपसंहरति

एवं पाशत्रयं भाव्यं
दीक्षायामध्वसंस्थितम् ।

अथैतद्भावयित्वा

तद्विशुद्ध्यै च दीक्षा च
क्रियते सा यथाविधि ॥१०६॥

विविधं तेषां पाशानां विशेषेण संस्कारपर्यन्ततताप्रशमनरूपेण शुद्ध्यर्थं चकाराद्योजनिकाग्रन्थनिर्वर्त्यशिवत्वाभिव्यक्त्यर्थं च दानक्षपणात्मा दीक्षा क्रियते ॥ १०६ ॥

तद्विधिं प्रस्तौति

आदौ शक्तिं न्यसेद्देवि
कलातत्त्वसमन्विताम् ।

शक्तिमाधाररूपां पारमेशीं क्रियाख्यां कलादीक्षाप्रस्तावात् प्रथमं निवृत्तिकलात्मना तत्त्वेनान्तर्भावितापराध्वपञ्चकेन सम्बद्धाम् ॥१०७॥

तथा

हृदा संकल्प्य वागीशीं
व्यापिकां सर्वयोनिषु ॥ १०७ ॥

न्यसेत् । हृदेति काकाक्षिवत् पूर्वत्रापि योज्यम् । उक्तं च

'हृदाद्या वाचकास्तासां………… ।' (४।१।९७)

इति ।

'वागेव विश्वा भुवनानि जज्ञे ।'

इति स्थित्या यथास्याश्चतुर्दशविधभूतसर्गजन्मभूमिव्यापकत्वं तथा निर्णीतमेव ॥१०७॥

निवृत्त्यनुसारेण योनीर्निरूपयति

शतरुद्राद्यनन्तान्तं

योनयो विविधाः स्थिताः ।

विविधाश्चतुर्दशविधभूतसर्गजनिकाः ॥

तासु च

समकालमृतुत्वेन

वागीशीं संनिधापयेत् ॥१०८॥

आयातशक्तिपातं प्रति शुद्धस्रष्टृौन्मुख्यसंपाद्ययुगपदनेकदेहसर्गयोग्यतात्मकार्तवयुक्त्या सा तावत्संनिहिता, आचार्यस्तु तन्मूलबलावष्टम्भात्मना प्रयोजकव्यापारेण तां संनिधिमुद्राबन्धनपूर्वमग्निकुण्डेऽवस्थापयेत् ॥ १०८ ॥

अथ तां

ध्रुवेण पूजयेत्पुष्पै-

र्गन्धधूपैरनुक्रमात् ।

अत्र च प्रणवं हृद्बीजं चोच्चार्य, 'पृथिवीतत्त्वस्थानन्तादिवीरभद्रान्तनानाभुवनगतचतुर्दशविधभूतसर्गविचित्रशरीरहेतवे निवृत्तिव्यापि-

कायै वागीश्यै नमः' इति मन्त्रः संनिधापन-पूजनयोः ॥

अथ

ओंकारेणाहुतीस्तिस्रो
वागीशीसंनिधापने ॥ १०९ ॥

दद्यादिति शेषः ॥ १०९ ॥

दत्त्वा च

शिष्यं संप्रोक्ष्य चास्त्रेण
ताडयेदस्त्रमुच्चरन् ।

प्रोक्षणं हृदयदेशानुसारे पाशसूत्रे शिवाम्भसा, ताडनं तु भस्मना तैरेव वा ॥

ततोऽपि

रेचकेनात्मनो गत्वा
छिन्द्यात्तस्यासिना हृदः ॥११०॥

'शशिमार्गेण शिष्याणां सूर्यस्थः प्रविशेद्धृदि ।'

इति श्रीलक्ष्मीकौलार्णवोक्तनीत्या स्वदक्षिणेन निर्गत्य शिष्यस्य वामेन प्रविश्य पुर्यष्टकरूपं शिष्यात्मानमस्त्रमन्त्रेण भावनया सूत्रस्थं छिन्द्यात् ॥ ११० ॥

छिन्नं च

धाम्नाकृष्य तदात्मानं
द्वादशान्ते निधापयेत् ।

आकर्षणयुक्तिः पूर्वमेवोक्ता । एतच्च

'रश्मिमात्रावियोगेन कार्यम्········ ।'

इत्युक्तम् ॥

अथ

ध्रुवेण तत्स्थं संपुट्य
चैतन्यं मुद्रयात्मनि ॥ १११ ॥
पूरयेद्भैरवेणैव

तत्स्थं द्वादशान्तस्थं, मुद्रयेति दीप्तशिवहस्तकृतया[1] संहाराख्यया, आत्मनीति स्वहृदये, भैरवेण निष्कलेन ॥ १११ ॥

तेनैव च

कुम्भयेद्रेचयेत्ततः ।

नासाक्रमेणैव ॥

---

१ ख० पु० कृतये इति पाठः ।

तत एव च

द्वादशान्तात्तु संगृह्य
योजयेद्भवमुद्रया ॥ ११२ ॥

योजनं वागीशीगर्भे, 'भवमुद्रा' लिङ्ग-मुद्रा ॥ ११२ ॥

योजने इतिकर्तव्यतामाह

आत्मानमीश्वरं ध्यात्वा
मायां वागीश्वरीमपि ।
संयोज्य तस्यां चैतन्यं
शरीराण्यध्वनि सृजेत् ॥११३॥

ईश्वरः क्रियाशक्तिप्राधान्यात् स्रष्टा, प्राङ्निर्णीता तु वागीश्वरी संप्रत्यशुद्धाध्वप्रमातृत्वान्माया, शुद्धाध्वप्रसवे तु एषैव महामायात्मा भविष्यति, मायारूपायाश्चा[1]स्याः शुद्धविद्यास्पर्शो नास्ति, अन्यथा क्रमिककर्मभोगानां युगपच्छुद्ध्यर्थमनन्तदेहसृष्टेरयोगात्, चैतन्यमिति दीक्ष्यस्येति अर्थात्, अध्वनीति प्रकृते निवृत्तिकलाप्रधाने ॥ ११३ ॥

१ ख० पु० अपि चास्य इति पाठः ।

किमर्थं सृजेदित्याह

प्राक्कर्मवासनाशेष-
फलभोगत्वहेतवे।

पूर्वकर्मवासनाहेतुकानि यान्यशेषाणि जन्मायुर्भोगात्मकानि फलानि तेषां भोग्यत्वं भोगसिद्धिर्यथा स्यात् ॥

एतानि च शरीराणि

युगपद्भिन्नभोगानि
देशकालशरीरतः ॥ ११४ ॥
मन्त्रशक्त्या विपच्यन्ते

शरीरमत्र स्वभावः। भिन्नो भोगो येषु, देशादित्रयान्तानि शरीराणि मन्त्रशक्त्या युगपद्विपच्यन्ते फलदानोन्मुखानि संपद्यन्ते ॥ ११४ ॥

न केवलं शरीराणि युगपद्भिन्नभोगानि विपच्यन्ते यावत्

पुद्गलाश्च तथाविधाः।

भिन्नदेहा विसृज्यन्ते[1]
गर्भे वागीशियोनिषु ॥ ११५ ॥

'पुद्गला' इत्यनेनैकस्यापि दीक्ष्यस्य नानाशरीरतया बहुत्वं वदन् भेदवादस्यावास्तवतां ध्वनति । यस्मादेकस्यापि दीक्ष्यात्मनो नानाभोगाश्रयविचित्रदेहशुद्धौ भोग्यवैचित्र्येण नानात्वभावः । 'तथाविधा' इति भिन्नभोगाः, योनिष्विति चतुर्दशविधभूतसर्गापेक्षं बहुत्वं, 'विसृष्टिः'[2] नियतभोगार्थं संयोजनम् ॥ ११५ ॥

तदित्थं शिष्यचैतन्यम्

धाम्ना च योजयित्वा च
जुहुयादाहुतित्रयम् ।

निष्कलोच्चारपूर्वंनिवृत्तिव्याप्तानन्तादिवीरभद्रान्तनानाभुवनगतचतुर्दशविधभूतसर्गसंपत्त्यर्थं देवदत्तस्य वागीशीगर्भयोजनं करोमि नमः इति मन्त्रः । होमे तु स्वाहान्तः । एवमुत्तरत्राप्यूहमन्त्राः स्वयमभ्यूह्याः ॥

---

१ ख० पु० विपच्यन्ते इति पाठः । २ ग० घ० पु० निसृष्टिरिति पाठः ।

एवं संयोजने सति

युगपत्सर्वगर्भेषु

देहा विविधरूपकाः ॥११६॥

भैरवेच्छासुसंपन्नाः[1]

शतरुद्राद्यनन्तगाः ।

भवन्तीति शेषः । भैरवशब्देनात्र भैरवसमावेशशाली आचार्य उक्तः ॥ ११६ ॥

अथ

गर्भेषु गर्भनिष्पत्ति

भैरवेणाहुतित्रयम् ॥ ११७ ॥

हुत्वा तु जननं कार्यं

पुनस्तेनाहुतित्रयात्[2] ।

कर्मनामानुसारी अत्रोहमन्त्रः, गर्भाणां निष्पत्तिर्यत्र आहुतित्रये तद्गर्भेषु गर्भनिमित्तं हुत्वा, जननं गर्भनिःसरणं, तेनेति निष्कलेनैव ॥ ११७ ॥

---

१ ख० पु० सुनिष्पन्ना इति पाठः । २ क० पु० त्रयमिति पाठः ।

शिष्यदेहे । १ पाशसूत्रावलम्बनं । २ षडधिकरणगताध्वसंधानं । ३ तद्धोमः । ४ अध्वव्याप्त्यवलोकनम् । ५ अध्वोपस्थापनं । ६ तत्पूजा । ७ होमः । ८ तदन्तःपाशत्रयचिन्तनं । ९ कला[1]शक्तिसमन्विताधारशक्तिन्यासः । १० वागीश्याः संनिधापनं । ११–१२ तत्पूजाहोमौ । १३–१४ शिष्यसंप्रोक्षणताडने । १५ तच्चैतन्याकर्षणं । १६ द्वादशान्ते स्थापनं । १७ ततो ग्रहणं । १८ स्वहृदि योजनम् । १९ स्वद्वादशान्तप्रापणं । २० वागीशीगर्भे योजनं । २१ नानागर्भनिष्पत्तिहोमः,– इत्येकविंशत्यवान्तरसंस्कारैरुपस्कृतं होमेन जन्माख्यं संस्कारमभिधाय, अधिकाराख्यं संस्कारं वक्तुमाह

सर्वयोनिषु देहास्ते

युगपद्वृद्धिमागताः ॥ ११८ ॥

भाव्या इति शेषः ॥ ११८ ॥

---

१ ख० पु० कलातत्त्वेति पाठः ।

प्रवृद्धदेहानामेव भोगेऽधिकाराद्भोगमाह

भोगनिष्पत्तये कर्म

व्यापारसहकारणम् ।

भाव्यमिति शेषः । पशोरतीतमनागतं च यत् क्रमिकानन्तभोगसंपादकं संभाव्यते शुभादि[1] वासनात्मकं कर्म तत्सर्वं

'अनेकभा[2]विकं कर्म दग्धं बीजमिवाणुभिः ।
भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः ॥'

इति श्रीकिरणोक्तनीत्या मन्त्रयुक्त्या युगपद्भोगनिष्पत्त्यर्थमनुसंधेयम्, कीदृक् 'व्यापारैः' वाङ्मनःकायचेष्टाभिः 'सहकारणं' सहेतुकमित्यर्थः ॥

अवश्यं चैतदन्यथा

तदभावान्न भोगः स्यात्

कर्मैव हि मायीयभोगहेतुः ॥

भोगार्थमेव तत्साधनाहरणाय सर्वे प्रव[3]र्तन्ते इत्याह

तदर्थं मार्जनं स्मृतम् ॥११९॥

---

१ ख० पु० शुभकर्मवासनेति पाठः । २ ख० पु० अनेकमिति पाठः ।
३ ख० पु० प्रयतन्त इति पाठः ।

यस्मात् शुभाद्यनुष्ठानात् भोगसाधने

अर्जिते सति भोक्तव्यो

भोगो दुःखसुखात्मकः ।

एवं भोगं निर्णीय, निवृत्तेऽपि तस्मिन् तत्संस्कारान्तर्मायीयभावरूपमिव लयं वक्तुमाह

लयः परमया प्रीत्या

सुखदुःखादिकेऽप्यलम् ॥१२०॥

दीक्ष्यस्य गुरुणा भाव्य इति शेषः । तदुक्तं श्रीमृगेन्द्रे

'कंचित्कालं लयः············· ।'

इति ॥ १२० ॥

एवमधिकारभोगलयाख्यं संस्कारत्रयं भावनया परिकल्प्य

तिसृभिस्तिसृभिर्होमं

धाम्नैव त्रिषु कारयेत् ।

ऊहमन्त्रान्तेनेत्यर्थात् तिसृभिरित्याहुतिभिः ॥

एवं जन्माधिकारभोगलयान् प्रतिपाद्य, निष्कृत्याख्यं पञ्चमं संस्कारं प्रतिपादयितुमाह

आहुतीनां शतं होम्यं
धाम्ना निष्कृतये पुनः ॥१२१॥

निष्कृतेरदूर एव स्वरूपं निर्वक्ष्यति ॥१२१॥

नन्वस्यां किमिति विशेषेण होमः? इत्यत्र हेतुमाह

यत्कर्मभोग्यरूपं तु
जात्यायुर्भोगलक्षणम् ।
निष्कृत्यन्ते विशुध्येत्त-
द्भूलोकसमवस्थितम् ॥ १२२ ॥

कर्मणा शुभाशुभात्मना भोग्यं रूपं यस्य जात्यायुर्भोगात्मनः फलस्य तत् निष्कृतावेव शुध्यति अतो युक्तोऽस्यां शतहोमः, भुवो लोका वीरभद्रान्तानि भुवनानि, तत्र समवस्थितं भोग्यतां प्राप्तम्, एतच्चेह निवृत्तिशुद्धिप्रसादादेवमुक्तं, तच्च प्रतिष्ठादिव्या-

सतत्त्वान्तर्गतभुवनभोगोपलक्षणपरम् । अत-[न्य]स्तु भूर्लोके इति पठित्वा भूर्लोकैकदेशे कन्याद्वीपेऽर्जितमिति व्याकृतवान् ॥ १२२ ॥

'भोगो दुःखसुखात्मक' इत्युक्त्या भोग इदानीमेव निर्णीतः; आयुः सृष्टिसंहारपटले निर्णेष्यते, – इत्यवशिष्टां जातिं जन्मप्रकार-भेदैरादिशति

संसारा दशचत्वारः

देवमानुषतिर्यग्भेदभिन्नश्चतुर्दशधा भूत-सर्ग एव संसारा नानाजातय इत्यर्थः ॥

भुवनदीक्षायाम्

'अन्त्यजाञ् शूद्रविट्क्षत्रब्राह्मणांश्च विशोधयेत् ।'
(स्व० १०।३८४)

इति सर्वजातिशोधनं वक्ष्यति । इह तु

'एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥' (९।२१)

इति गीतोक्तनीत्या षट्कर्माधिकारित्वेन बन्ध-कर्मत्वान्मनुष्यजातिशुद्धौ ब्राह्मण्यजातिरेव

निष्कृतिहोमेनैवावश्यं शोध्या संक्षिप्तत्वादस्य विधेरिति वक्तुमाह

संस्कारा अष्टभिः सह ।
चत्वारिंशद् द्विजत्वाय
वक्ष्यन्ते भुवनाध्वनि ॥ १२३ ॥
योनिर्बीजं तथा भाव
आहारो देश एव च[1] ।
एतेषां शोधनं देवि

आधानादयोऽन्त्येष्ट्यन्ताश्चत्वारिंशत्, दयादयः स्पृहान्ताश्च अष्टाविति येऽष्टचत्वारिंशत् संस्कारा अग्रे स्फुटीभविष्यन्ति ते तु भुवनदीक्षायां पृथक् शोध्याः, आहाराद्याश्च कलादिदीक्षासु तु निष्कृतिहोमान्तर्भावयुक्त्या, – इति भाविवाक्यसंगत्यात्र[2] पिण्डार्थः । इदं च द्विजजात्यापादनं कर्महेतुकभाविशरीरविषयं, पूर्वं तु समयिनो वर्तमानदेह एव शुद्धविद्याजातियोग्यत्वरूपमन्यदेवेति निर्णी-

---

१ ख० पु० हीति पाठः । २ ख० पु० संगतोऽत्रेति पाठः ।

तम् । अत एव पूर्वं समयिनो रुद्रांशापादनमीश्वरतत्त्वप्राप्तियोग्यतात्मकमुक्तम्, इदं तु शक्तिगर्भानुप्रवेशवशभविष्यद्रुद्रत्वापत्तियोग्यताभावनात्मकं न तु रुद्रत्वापत्त्यात्मकं निवृत्तिपाशानामद्यापि अशुद्धत्वात् । उक्तं च श्रीमृगेन्द्रे

'रुद्राणी शक्तिरुच्यते
तद्गर्भयोग्यतापत्तिरुद्रांशत्वं न रुद्रता ॥'

इति ॥ १२३ ॥

तदेतदीदृशं रुद्रांशापादनं जात्यायुर्भोगशुद्ध्या सह निष्कृतिहोममध्य एव संपाद्यमित्याह

रुद्रांशापादनं तथा ॥ १२४ ॥
अत्रावलोकनं कृत्वा
निष्कृत्यामेव शुद्ध्यति ।

न केवलं जन्मायुर्भोगानां निष्कृतौ शुद्धिराधातव्या यावद्रुद्रांशापत्तिरूपापि शुद्धिर्व्याकृत[1]स्वरूपा तत्रैवाधातव्येत्यर्थः । अत्रेति निष्कृतौ, अवलोकनमिति भावानाम् ॥ १२४ ॥

---

१ ख० पु० व्याख्यातरूपेति पाठः ।

निष्कृतिस्वरूपं व्याचष्टे

विषया भुवनाकारा
ये केचिद्भोग्यरूपिणः ॥ १२५ ॥
भुक्तकर्मफलाशेषा
निष्कृतिस्तेन सा स्मृता ।

भुवनं स्त्र्यादिभावोपलक्षणपरं, तेष्विति श्लोकमध्येऽध्याहार्यं, भुक्तं कर्मफलमशेषं समग्रं यया हेतुना दीक्ष्येण सा तथा, पूर्वनिपातव्यत्यय ऐशः । निःशेषेण कृतिः समस्तकर्मफलभोगसमाप्तिर्यस्यामिति व्युत्पत्त्या निष्कृतिः, स्मृतेति दीक्षायामेव शोध्यत्वेनेति शेषः १२५

अथ

विश्लेषो निष्कृतेर्भोगात्

भोगाद्विश्लेषः पुनर्भोगैरसंबन्धो भोक्तुर्भोक्तृत्वाभावात्, संस्कारोऽपि निष्कृतेः कार्यः ॥

भोगाभावे स हि स्मृतः १२६

नहि भोगसमाप्तिरूपां निष्कृतिं विना संस्कर्तुं शक्यः ॥ १२६ ॥

भोक्तृताभावरूपं विश्लेषं भोक्तृतानुवादपूर्वं वक्तुमाह

भोक्तृत्वं विषयासक्ति-
मलकार्यं प्रकीर्तितम् ।
भोक्तृत्वाभावस्तत्रैव
शरीरेण तु यत्कृतम् ॥ १२७ ॥
विश्लेषः क्रियते तस्य
पशोर्मन्त्रैः शिवाज्ञया ।

शरीरेण यत् कृतं शरीरैर्यदर्जितं किंचित् तत्रैव या विषयत्वेनासक्तिः किंचिन्मे स्यादित्यभिष्वङ्गस्तदेतन्मलकार्यम्, अपूर्णम्मन्यतात्मकाणवमलोत्थापितं भोक्तृत्वं, तस्येदृशस्य भोक्तृत्वस्य पशोः शिवाभिन्नगुर्वाज्ञया मन्त्रैर्विश्लेषः क्रियते, स च यथोक्तस्य भोक्तृत्वस्याभाव उच्यते इति संगतिः ॥ १२७ ॥

अत्र च

धाम्ना चाहुतयस्तिस्रो
विश्लेषकरणाय च ॥ १२८ ॥

अमुकाय निवृत्तिपाशविश्लेषं करोमि स्वाहेत्यत्र[1] मन्त्रः। एवमुत्तरत्रापि स्वयमूहः कर्मणामौचित्येन कार्यः ॥ १२८ ॥

अथ

आहुतित्रितयं धाम्ना
पाशच्छेदेऽपि दापयेत्।

यत्पाशच्छेदनिमित्तमाहुतिस्तत्पाशानाह

पाशा देहे तु मायीयाः
कलाद्या भूतकावधि ॥ १२९ ॥
शरीरकरणाकाराः
पुरुषार्थप्रसिद्धये।

देहे देहनिमित्तं कलाद्या महाभूतान्ता मायीयाः पाशाः, ते च शरीरेन्द्रियाणि तदुपलक्षितांश्च भुवनभावादीन् आकारयन्ति संपादयन्ति पुरुषार्थस्य भोगस्य प्रसिद्ध्यर्थम्। उक्तं च

'कलादिक्षितिपर्यन्तमेतत्संसारमण्डलम्'। (स्व० ११।२९१)

इति। तुशब्दः

1 ख० पु० अस्येति पाठः।

'भोक्तृत्वं विषयासक्तिर्मलकार्यं······।' (स्व० ४।१२८)

इति । तथा तत्रैव

'·········शरीरेण तु यत्कृतम् ।' (स्व० ४।१२९)

इति पूर्वोक्ताणवकार्मपाशवैलक्षण्यं द्योतयति ॥ १२९ ॥

एवं च निष्कृतिविश्लेषरूपात्

भोगाभावाद्विपद्यन्ते
शरीराणि सहस्रधा ॥ १३० ॥

शरीराणीति स्थूलसूक्ष्मादिरूपाणि, सहस्रधेति नानाविचित्रभेदभूतसर्गरूपाणि, 'विपद्यन्ते' अपुनर्भावेन नश्यन्तीत्यर्थः ॥ १३० ॥

यस्य च दीक्ष्यस्यैतानि विपद्यन्ते

पाशच्छेदे विधिस्तस्य
मन्त्रैश्च विधिचोदितैः ।

प्रदर्शिताणवादिपाशव्याप्तिकपाशसूत्रगतनिवृत्तिभागात्मनः पाशस्य च्छेदे विद्यात्मकशास्त्रवाक्यचोदितैर्मन्त्रैर्विधिः कार्यः । स च विधिः

'शिवशक्तिरमोघेयं कर्तरी परिकीर्तिता।'

इति श्रीहंसपारमेशोक्तव्याप्त्या कर्तर्यास्त्रजप्तया शिवं सास्त्रं हुंफडन्तं प्लुतयुक्त्योच्चारयन् पाशान्[१]छिन्द्यादित्येवंरूपः। यथोक्तं श्रीमृगेन्द्रे

'ततः शिवेन सास्त्रेण[२] हुंफडन्तेन सस्वरम्।
छिन्द्यात्स तावतः पाशान्कर्तर्या चास्त्रजप्तया॥'

इति॥

उपसंहरति

एवं पाशत्रयस्यापि
विश्लेषो दीक्षयोच्यते॥१३१॥

एवमिति जन्माधिकारभोगलयनिष्कृत्याख्ययथाप्रतिपादितसंस्कारपञ्चकपूर्वमित्यर्थः। अत्र चोक्तेनैव हुंफडन्तेन मन्त्रेण पूर्णाहुत्या समं छिन्नस्य पाशस्य होमः कार्यः,—इति संहितान्तरोक्तोऽर्थोऽनुमन्तव्यः[३]। यथोक्तं श्रीमृगेन्द्र एव

'ततस्तां स्रुचमापूर्य जुहुयादाज्यसंयुताम्।
तेनैव मन्त्रयोगेन........................॥'

इति॥ १३१॥

१ ख॰ पु॰ शिवशस्त्रमिति तथा प्लुतशक्त्येति पाठः। २ ख॰ पु॰ शस्त्रेणेति तथा सेश्वरमिति पाठः। ३ ख॰ पु॰ अनुसर्तव्य इति पाठः।

एवं विश्लेषान्ते संस्कारषट्के कृते

शरीराशेषभङ्गेन

एकचैतन्यभावना ।

गुरुणा शिष्यस्य कार्येत्यर्थः ॥

अत्र चावसरे

पूर्णाहुतिं शिवेनैव

वौषड्जातियुतेन च ॥१३२ ॥

दद्यादित्यनुषङ्गः ॥ १३२ ॥

अथ पाशाभावात्

शुद्धतत्त्वाग्रसंस्थं त-

च्चैतन्यं कनकप्रभम् ।

तदेकीकृतं चैतन्यं शुद्धस्य निवृत्त्याख्यस्य तत्त्वस्याग्रे उपरि सम्यगनावृततया स्थितं दीप्तं भावयित्वा

उद्धारायाहुतीस्तिस्रः

पुनर्धाम्ना तु दापयेत् ॥१३३॥

'निवृत्तिव्यापात् पृथिवीतत्त्वाद् देवदत्तमुद्धरामि' इति चात्र प्रयोगः ॥ १३३ ॥

अथ

तस्मात् तत्त्वाद्गृहीत्वा तु
चैतन्यं मलसंयुतम् ।
मुद्रया प्राग्विधानेन
आत्मस्थं पूरयेद्धृदि ॥ १३४ ॥

निवृत्तिशुद्ध्या निर्मलमपि कलान्तराणामशोधितत्वात् मलसंयुतं, मुद्रयेति संहाराख्येति प्राग्विधानं प्रणवसंपुट[1]हंसबीजत्वादिरूपम् ॥ १३४ ॥

ततः

कुम्भित्वा रेच्य संगृह्य
द्वादशान्ताद् ध्रुवेण तु ।
शिष्यदेहे निवे[2]शयैत-
न्नाडीरन्ध्रेण पूर्ववत् ॥ १३५ ॥

अथास्मै

तत्स्थीकरणहेत्वर्थं
धाम्ना चैवाहुतित्रयम् ।

---

१ ख० पु० पुटसबीजेति पाठः । २ क० पु० निवेश्येतेति पाठः ।

देयमिति शेषः । 'शोधितचैतन्यं देवदत्तस्य हृत्स्थं करोमि स्वाहा' इत्यन्तोऽत्रायं प्रयोगः ॥

एवं पाशच्छेदस्तद्धोमः, पूर्णाहोमः, चैतन्यस्यैक्यभावनं, तदुद्धारहोमः, पूरकेण हृत्स्थीकरणं, कुम्भनं, द्वादशान्तरेचनं, ततो ग्रहणं, शिष्यदेहे निवेशनं, तदर्थो होमः,—इत्येकादशभिरवान्तरसंस्कारैरुपस्कृतं[1] विश्लेषं निर्वर्त्य तदवशिष्टनिवृत्त्यर्थमाह

कलाशुद्ध्यवसाने तु
ब्रह्माणं कारणाधिपम् ॥१३६॥
स्वनामप्रणवाह्वान-
पूजं संतर्प्य चार्पयेत् ।

ओं ब्रह्मन्नागच्छेति स्वनामप्रणवपूर्वमाह्वानं 'तुभ्यं नम' इति च पूजा यस्येति बहुव्रीहिः । तत्सन्तर्पणं वह्नौ 'स्वाहा' इति प्रयोगात्, ततोऽपि चार्पणं पुर्यष्टकार्पणाय ॥ १३६ ॥

---

१ ख० पु० उपसंस्कृतमिति पाठः ।

तदाह

शब्दस्पर्शौ त्यजेत् तस्मिन्

कथं

वायौ नामसंयुतौ ॥ १३७ ॥

स्वाहाकारप्रयोगेन

तौ ब्रह्मणि निवेदयेत् ।

तिसृभिस्तिसृभिर्होमात्

ओं ब्रह्मणे शब्दमर्पयामि स्वाहेति त्रिर्हुत्वा स्पर्शमर्पयामि स्वाहेति त्रिर्जुहुयात्,—इति वीप्सातोऽवसेयम् ॥ १३७ ॥

एवं चेदमस्मै

पुर्यष्टांशं निवेदयेत् ॥ १३८ ॥

पुर्याः सूक्ष्मदेहस्यारम्भकमष्टकं तन्मात्रमनोऽहंकृद्बुद्धिरूपं, तदंशार्पणविभागेऽभिप्रायं पर्यन्ते स्फुटयिष्यामः ॥ १३८ ॥

किं च

आमन्त्रणविभक्त्या तु

श्रावणां तस्य कारयेत् ।

तस्येति ब्रह्मणः, श्रावणा शिवाज्ञा । यथोक्तं श्रीपूर्वे

'भुवनेश त्वया नास्य साधकस्य शिवाज्ञया ।
प्रतिबन्धः प्रकर्तव्यो यातुः पदमनामयम् ॥'
(मा०वि०।९।६५)

इति ॥

कृतश्रावणं च

ब्रह्माणं पूजयित्वा तु
होमं कृत्वा विसर्जयेत् ॥१३९॥

किं च

ध्रुवेणाभ्यर्च्य वागीशीं
संतर्प्य च विसर्जयेत् ।

विसर्जनं निजपरावागैकात्म्यविमर्शनं, ध्रुवेण निष्कलेन ॥

तदित्थमध्वसंधानात्प्रभृति वागीश्या विसर्जनान्तं

हुत्वावलोकयेत्तत्र
विशुद्धं पाशजालकम् ॥१४०॥

---

१ क० घ० पु० विसर्पणमिति पाठः ।

हुत्वेति, अध्वसंधानम्, अध्वोपस्थानं, वागीशीगर्भयोजनं, तद्गर्भनिष्पत्तिर्जननमधिकारो, भोगो, लयो, निष्कृतिः, विश्लेषः, पाशच्छेदहोमः, पाशहोमः, पूर्णाहोमः, उद्धारहोमः, तत्स्थीकरणं, ब्रह्मतर्पणं, पुर्यष्टकांशार्पणहोमः, पुनर्ब्रह्महोमः, वागीशीहोमः, इत्येकोनविंशतिहोमानुक्तान् कृत्वा, तत्रेति विशुद्धायां निवृत्तिकलायाम्, एवमुत्तरत्रापि संस्कारसंकलना[1] होमकलना च स्मर्तव्या १४०

अत्र[2] च पाशशुद्ध्यवलोकनावसरे

प्राक्कर्मभाविकस्याथ
अभावं भावयेत्तदा[3] ।
मुमुक्षोर्निरपेक्षत्वात्

भाव्येव भाविकमर्थात् कर्म, प्राक्कर्म च भाविकं चेति समाहारः । निरपेक्षत्वात् साधकवत्फलौन्मुख्याभावात् । कैश्चित्तु प्राक्कर्मणा भवतीति प्राक्कर्मभवस्तत्र भवति

---

१ ख० पु० संकल्पनाहोमसंकल्पनेति पाठः । २ ख० पु० अथ पाशेति पाठः । ३ ख० पु० तथेति पाठः ।

यत्फलमिति योजनया प्राक्कर्मभविकस्येति व्याख्यातं तदसत् क्लिष्टं चेत्युपेक्ष्यम् ॥

फलदानोन्मुखस्य वर्तमानस्य का गतिरित्याह

प्रारब्धेकं न शोधयेत् ॥१४१॥

तस्य भोगेनैवातिवाहनादित्यर्थः ॥ १४१ ॥

मुमुक्षोः कर्मशुद्धिवृत्तान्तमुक्त्वा साधकस्य तमाह

साधकस्य तु भूत्यर्थं

भूतिप्रयोजनं भाविमन्त्राराधनरूपं यत्तदपि न शोधयेदित्यर्थः ॥

केवलं

प्राक्कर्मैकं तु शोधयेत् ।

भूत्यर्थाद्यत्प्राग्देहारम्भि शुभाशुभं तत एकमशुभमेवास्य शोधयेत्, एवं हि निर्विघ्नं भोगासिद्धिर्भवति ॥

यत्तु जन्मान्तरसंचितं शुभाशुभं यच्चास्मिञ्जन्मनि करिष्यति, तत्सर्वमुक्तनीत्या मन्त्राराधनवर्जमस्य पुत्रकवच्छोध्यमेवेत्याह

प्राक्कर्मागामि चैकस्थं
भावयित्वा च दीक्षयेत्॥१४२॥

साधकमिति शेषः। एकस्थमिति एकप्रघट्टकतया भावितम्॥

इत्थं च

शिवधर्मिण्यसौ दीक्षा

साधके इति शेषः॥

लोकधर्मिण्यतोऽन्यथा।

कीदृगित्याह

प्राक्तनागामिकस्यापि
अधर्मक्षयकारिणी॥१४३॥
लोकधर्मिण्यसौ ज्ञेया
मन्त्राराधनवर्जिता।

'..................इष्टापूर्तविधौ रतः।
कर्मकृत्फलमाकाङ्क्षन्..................'॥ (स्व० ४।८५)

इति लोकधर्मी प्रागेव निर्णीतः। अधर्मक्षयकारिणीति सापेक्षः समासः। मन्त्राराधनेन पिण्डसिद्धिहेतुना मन्त्रत्वादिप्राप्तिहेतुना च सर्वेणैव[1]

---

१ ख० पु० सर्वे एवेति पाठः।

विवर्जिता विशेषाचोदनात् । श्रीमृगेन्द्राया च वर्तमानसिद्धिहेतोर्मन्त्राराधनस्य शिवधर्मिण्येव प्रतिपादितत्वात् । तथा च तत्रोक्तम्

'शिवधर्मिण्यणोर्मूलं शिवधर्मफलश्रियः ।
हितेतरा विना भङ्गं तनोराविलयाद्ध्रुवाम् ॥'

इति । अस्यायमर्थः—शिवधर्मिणी या दीक्षा साणोः शिवधर्मफलश्रियो मूलं मन्त्रमन्त्रेशत्वादिप्राप्त्यात्मकपारमेशफलसंपदो हेतुरेका, इतरा तु शिवधर्मिण्येव भुवां भोगभूमीनामाविलयात् प्रलयकालं यावत् तनोः शरीरस्य भङ्गं विना हिता यथाभीष्टखड्गपातालरोचनाञ्जनपादुकादिसिद्धिसंपादिकेति । न चेतरेति लोकधर्मिणी व्याकर्तव्या

'भोगभूमिषु सर्वासु दुष्कृतांशे हते सति ।
देहान्तराणिमाद्यर्थं शिष्टेष्टा लोकधर्मिणी ॥'

इति तत्रैव पृथक्त्वस्यानिर्णीतत्वात् । न च मन्त्राराधनं विना साधकत्वं न भवतीति भ्रमितव्यम् इष्टापूर्तफलसाधनेनापि तस्य लाभादित्यलम् ॥ १४४ ॥

एवं लोकधर्मिदीक्षावशात्
प्रारब्धदेहभेदे तु
भुङ्क्ते स ह्यणिमादिकान्॥१४४॥

भोगान्

दीक्षावशादस्य शुभकर्माणिमादिपर्यवसायीत्यर्थः ॥

अथ

भुक्त्वा व्रजेदूर्ध्वं
गुरुणा यत्र योजितः।
सकले निष्कले वापि

'यो यत्राभिलषेद्भोगान्।'

इत्युक्तनीत्या सकले तत्र तत्र भुवनेश्वरे सायुज्याद्यर्थं शुभकर्मभोगान्ते मुमुक्षुर्वा निष्कले शिवे योजितस्तदेव पदं गच्छेत्। यथोक्तं श्रीमृगेन्द्रायाम्

लोकधर्मिणमारोप्य मते भुवनभर्तरि।
तद्धर्मापादनं कुर्याच्छिवे वा मुक्तिकाङ्क्षिणाम्॥'

इति॥

---

१ ख० पु० ईदगिति पाठः।

एतच्चोर्ध्वंव्रजनं योजनं च यथाक्रमम्
शिष्याचार्यवशाद्भवेत् ॥१४५॥

शिष्यस्य गुरोश्चाभिसंधिवशाज्जायते इत्यर्थः । उक्तं च तत्प्रागेव

'फलमाकाङ्क्षसे यादृक् तादृग्यजनमारभे ।'(स्व०४।८१)

इत्यादि ॥

एवं द्विधा भोगदीक्षां निर्णीय मोक्षदीक्षां सबीजां निर्बीजां सद्योनिर्वाणदां च क्रमेण निर्णेतुमाह

निर्वाणेऽपि सबीजायां
कर्माभावाद्विपद्यते ।

निर्वाणनिमित्तं या सबीजा पूर्वं निर्णीता दीक्षा तस्याः

'विशेषसमयाचारा मन्त्राख्ये ये प्रकीर्तिताः ।
तेऽत्र पाल्याः प्रयत्नेन………… ॥' (स्व० ४।९०)

इति पूर्वोक्तं यत्कर्म तस्याभावादननुष्ठानाद्विपद्यते कंचित्कालं शिवमय्याः स्वसत्तातो भ्रंशित्वा[1] क्रव्यादत्वमेतीत्यर्थः ॥ १४६ ॥

---

१ ख० पु० भ्रमित्वेति पाठः ।

यत एवमतः

समयाचारपाशं हि
दीक्षितः पालयेत्तु यः॥ १४६॥
तं पाशं नैव शुध्येत

दीक्षितः समयाचारपाशं पालयेत् यस्मात्तस्मात्तमस्य निर्बीजदीक्षितस्येव न शोधयेत्॥

दीक्षा चैषा

सा सबीजा प्रकीर्तिता।
समयाचारपाशं तु
निर्बीजायां विशोधयेत्॥१४७॥

तच्छुद्धिविधिरग्रे तु भविष्यति॥ १४७॥

अस्य च निर्बीजदीक्षादीक्षितस्य

दीक्षामात्रेण मुक्तिः स्या-
द्भक्तिमात्राद्गुरोः सदा।

गुरुभक्तिमात्रमेवास्य समय इत्यर्थः॥ १४८॥

अस्या भेदान्तरमाह

सद्योनिर्वाणदा दीक्षा
निर्बीजा सा द्वितीयिका॥१४८॥

अतीतानागतारब्ध-
पाशत्रय[1]वियोजिका ।
दीक्षावसाने शुद्धिः स्या-
द्देहत्यागे परं पदम् ॥ १४९ ॥

सद्य इति दीप्ततममन्त्रदीक्षावियोजितदेह[2]-कलावस्थितिसमनन्तरमेव, अत एवारब्ध-कार्यस्यापि पाशत्रयस्य वियोजिका, देहत्यागे देहत्यागसमये दीक्षाया यदवसानं निष्पत्ति-स्तत्रेत्यर्थः । एवं चारिष्टलक्षणादिभिर्निश्चिता-सन्नमरणस्यैवेयं कार्येति तात्पर्यम् । यदुक्तं श्रीमद्गुह्वरे

'दृष्ट्वा शिष्यं जराग्रस्तं व्याधिना परिपीडितम् ।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत् ॥'

इति ॥ १४९ ॥

प्रासङ्गिकं दीक्षाविवेकमुपसंहरति

एवं भावानुसा[3]रेण
शिष्याणां गुरुणा सदा ।

---

१ ख० पु० पाशसूत्रेति पाठः । २ ख० पु० देशकालेति पाठः । ३ ख० पु० नुरूप्येणेति पाठः ।

फलं तु विविधाकारं
निष्पाद्येत सुदीक्षया ॥ १५० ॥

यस्मात्

अचिन्त्या मन्त्रशक्तिर्वै
परमेशमुखोद्भवा ।

परमेशस्य मुखं पराशक्तिस्तदुद्भवत्वादेवाचिन्त्या । शक्तिशब्देन वीर्यसारतां मन्त्राणामाह ॥ १५१ ॥

सा च

क्रिया काले प्रयोक्तव्या
गुरुणा भक्तिपूर्विका[1] ॥ १५२ ॥

क्रिया दीक्षादिका, भक्तिर्मन्त्रस्वरूपामर्शनक्रमेण तद्वीर्यानुप्रवेशमयी सैव ॥

अचिन्त्येत्यादिनेदमाह

विषाणामिव पाशानां
मन्त्रैः कवलनं ध्रुवम् ।

१ क० पु० भक्तिपूर्वकम् इति पाठः ।

करोति मन्त्रतत्त्वज्ञः
शिवावेशी गुरुः क्षणात्[1]॥१५२॥

'पाशाश्च पौरुषाः शोध्या दीक्षायां नतु धीगताः ।
तेन तस्यां दोषवत्यामपि दीक्षा न निष्फला ॥
सुतीव्रशक्तिपाताश्च दोषबीजविनाकृताः ।
अपि भान्ति तुलादीक्षाधटशुद्धिवदीक्ष्यते ॥
पापस्य गुरुता नो चेद्धटशुद्धौ ब्रवीषि[2] किम् ।
तन्मन्त्रशक्त्या दीक्षाणां[3] चित्रत्वं नासमञ्जसम् ।
लिप्यक्षरे कृते यद्वत्ताडनादि नृणां भवेत् ।
मन्त्रशक्त्या तथा सूत्रे पाशानां छेदनं स्फुटम् ॥'

इत्यास्तां तावदेतदग्रे वितत्य निर्णेष्यामः १५२

अथ प्रासङ्गिकं प्रमेयं निर्णीय प्रकृतमनुबध्नन्नाह

कलासंधानकं कुर्या-
च्छुद्धाशुद्धद्विरूपगम् ।

शुद्धनिवृत्तिकलासंधानकं कुर्याच्छुद्धमशुद्धप्रतिष्ठाकलायोगाच्चाशुद्धमत एव द्विरूपगम् ॥ १५३ ॥

---

१ ख० घ० क्षणमिति पाठः । २ ख० पु० करोति किमिति पाठः ।
३ ख० पु० दीक्ष्याणामिति पाठः ।

अत्र च

शुद्धमुच्चारयेद्ध्रस्व-
मशुद्धं दीर्घमेव च ॥ १५३ ॥
एकत्वं भावयित्वा तु
लीनं शुद्धं विभावयेत्।

इह भगवान् निष्कलभट्टारको निःशेषपाशशोधकोऽङ्गब्रह्ममन्त्रैकादशिका तु शोध्या, तथापि च शुद्धाशुद्धकलावाचित्वान्निष्कलनाथः शुद्धतयाशुद्धतयापि च व्यवह्रियते; तच्च[1] शुद्धनिवृत्तिवाचित्वाच्छुद्धं, ह्रस्वमिति प्रशान्ताशेषप्रसरं परबिन्दुव्याप्तिसतत्त्वमुच्चारयेत्, अशुद्धप्रतिष्ठावाचकत्वाच्चाशुद्धं, दीर्घमिति प्रसरोन्मुखं नादव्याप्तिसतत्त्वम्, एकत्वं सामरस्यं भावयित्वोच्चारयेत्। अत्र च शुद्धं लीनमिति प्रतिष्ठां बोधयितुं तद्वाचिमूलमन्त्रेण सहैकीभूतं विभावयेत् ॥ १५४ ॥

---

१ ख० पु० ततश्चेति पाठः।

अथ प्रतिष्ठाकलाशुद्धिः

न चात्र ह्रस्वदीर्घमात्रमुच्चार्यमपि तु

प्रणवादिनिवृत्तिस्तु
प्रतिष्ठा तदनन्तरम् ॥ १५४ ॥
नमस्कारस्तदन्ते तु
कलासंधानकं स्मृतम् ।

'प्रणवं' ह्रस्वं निष्कलं निवृत्तिवाचिनं हृन्मन्त्रं चोच्चार्य तदन्ते निवृत्तये इति पदं, ततोऽपि प्रणवं दीर्घं निष्कलं प्रतिष्ठावाचिनं च शिरोमन्त्रमुच्चार्य 'प्रतिष्ठायै नम' इत्यत्र प्रयोगः । होमे तु स्वाहान्तः ॥ १५५ ॥

इत्थं च

आवाह्य स्थाप्य संपूज्या-
हुतीस्तिस्रः प्रपातयेत् ॥ १५५ ॥
कलासंधानमेतद्धि

कलानां पृथ्व्यादिधारणाध्यानं कार्यमिति केचिद्वदन्ति ।

अथ

व्याप्तिं तस्यावलोकयेत् ।

तस्याः प्रतिष्ठायाः ॥

तत्र

गुल्फादारभ्य नाभ्यन्तं
शिष्यदेहेऽध्वकल्पनम् ॥ १५६ ॥
प्रतिष्ठाया भवेद्व्याप्ति-
श्चतुर्विंशतितत्त्विका ।
षट्पञ्चाशद्भुवनिका
त्रयोविंशतिवर्णिका ॥ १५७ ॥
ज्ञेयैकविंशतिपदा
त्रिमन्त्रा च विधीयते ।

अबादीनि गुणतत्त्वेन सह प्रधानान्तानि चतुर्विंशतिस्तत्त्वानि यस्यां, तथा गुह्यातिगुह्यपवित्रस्थाणुस्थूलदेवयोनियोगाख्यानि सप्ताष्टकरूपाणि भुवनाध्वनि वक्ष्यमाणानि षट्पञ्चाशद्भुवनेश्वराधिष्ठितानि, तावन्त्येवान्तर्भूतभु-

वनान्तराणि प्रधानानि भुवनानि यस्यां, हकारात् टकारान्तानि त्रयोविंशतिवर्णानि यस्याम् । एकविंशतीति पूर्वं कलातत्त्वास्पदवारुणदिग्गतपदनवकादीशकोणस्थ ऊकारो यावदुपयुक्तः, — इति प्रातिलोम्येन तदन्तरस्थाद्यकारादारभ्य लकारान्तमष्टकं, तथा मायातत्त्वाश्रयनैर्ऋतदिक्स्थकोष्ठनवकगतमूकारादिमकारान्तं नवकं, विद्यातत्त्वाधिष्ठितदक्षदिग्गतकोष्ठनवकमध्यादूकारादिलकारान्तं चतुष्टयं चेत्येकविंशतिपदानि यस्यां, त्रयो वाम देवः शिरः शिखा च मन्त्रा यस्यां, न तु हृदयं हृन्मन्त्रस्य निवृत्त्यन्तर्भावात् ॥ १५८ ॥

इत्थं च षडध्वात्मानः

मुख्या ह्येते स्मृताः पाशाः

मुख्यत्वमेषां सर्वाणुसाधारण्यात्, पदवर्णमन्त्रा अपि

'शब्दराशिसमुत्थस्य················ ।' (स्व० ४।१५)

इति युक्त्या वाचकरूपतामश्नुवानाः पाशा एव; अत एव निरुपाधिचिदानन्दघनस्वरूपा-

मर्शपरमार्थमूलमन्त्रातिरिक्तं सर्वमत्र शोध्य-
मेव । यदुक्तमस्मद्गुरुभिः श्रीतन्त्रालोके

'यत्किंचित्परमाद्वैतसंवित्स्वातन्त्र्यसुन्दरात् ।
पराच्छिवादुक्तरूपादन्यत्तत्पाश उच्यते ॥ (तं० ८।२९२)

इति ॥

अत्रैव च

सूक्ष्मानन्तर्विभावयेत् ॥१५८॥

तान् स्फुटयति

अन्यत्तन्त्रप्रसिद्धं तु
तन्मात्रेन्द्रियशोधनम् ।

अत्रान्तर्भाव्यमित्यर्थः । अन्यत्तन्त्रं लाकुलादि । यद्यपि च त्रयोविंशतितत्त्विकैरुक्त्वा तन्मात्रादीन्यन्तर्भावितानि तथापि तानि बाह्यभौवनसंनिवेशव्यापकान्यन्यान्येव, एतानि तु स्थूलसूक्ष्मशरीरसंनिविष्टान्यपराण्येव,-इति न भ्रमितव्यम् ॥ १५९ ॥

किंच

षट्कोशान्विषयान् पञ्च
तदन्तर्भावयेत्सदा ॥ १५९ ॥

असृङ्मांसलोममज्जास्थिस्नाय्वाख्याः षट्-कोशाः सूक्ष्मदेहोपरि कोशाकारतया स्थिताः। सदेति दीक्षाकाले । एवंच वर्तमानेऽपि देह-शोधनं चोदितमेवेति तत्र कर्तव्यं यैरुक्तं ते भ्रान्ता एव ॥

अत एवोक्ताध्वव्याप्तिविमर्शरूपम्

विशेषस्थापनं कृत्वा
पूज्या गन्धादिभिस्ततः ।

तथा

भैरवेणाहुतीस्तिस्रः

दद्यादिति शेषः । भैरवेणेति काकाक्षिवत्, तेन प्रणवनिष्कलप्रतिष्ठाबीजान्युच्चार्य 'प्रति-ष्ठायै नमः' इति मन्त्रेण पूजा, स्वाहान्तेन होमः । एवमुत्तरत्रापि ॥

अथ

तस्या वागीशिकल्पना ॥१६०॥

सा हि विप्रुषि सर्वमन्तःकर्तुं क्षमा । अत्र चादौ शक्तिं न्यसेदित्यादि पूर्वोक्तं स्मर्तव्यम् ॥

किंच

स्वनामावाहनाद्यस्य
अर्घहोमादि पूर्ववत्।
प्रोक्षणं ताडनं छेद
आकर्षग्रहणे तथा ॥ १६१ ॥
धाम्नापूर्य कुम्भयित्वा
छित्त्वाथ ग्राहयेत्पुनः।
योजनं गर्भधारित्वं
जननं पूर्ववत्क्रमात् ॥ १६२ ॥

पूर्ववदित्यतिदेशेन निवृत्त्युक्तं सर्वं विधिक्रममनुस्मरेदिति शिक्षयति ॥ १६२ ॥

अथ प्रसङ्गात्सर्वदीक्षासु वक्तव्यशेषं पूरयति

ऐश्वरीं मूर्तिमास्थाय
ताडनादीनि कारयेत्।

ताडनप्रोक्षणादीनि क्रियाशक्त्यावेशे कार्याणि; इति क्रियाशक्तिप्रधानेश्वराहंभावेनैव युक्तानि ॥

किंच

अधिकारस्तथा भोगो
लयो निष्कृतिरेव च ॥१६३॥
शिवरूपेण कर्तव्याः

अधिकारादिज्ञानं[1] प्रभुत्वसंपाद्यं, प्रभुश्च सदाशिवादौ विश्वत्र शिव एवेति शिवाहंभावेनैव तदुचितं, निवृत्तौ निष्कृतिविश्लेषहोमौ मूलेनैवोक्तौ ॥

इह तयोर्विशेषमाह

निष्कृतिः शिरसा पुनः ।
विश्लेषश्च हृदा[2] होम्यः

पुनःशब्दो विशेषाय सर्वत्रैव ।

पाशच्छेदस्तथासिना ॥ १६४ ॥

तथाशब्दान्मूलेनापि । यथोक्तं प्राक्

'आहुतित्रितयं धाम्ना पाशच्छेदेपि··· ॥' (स्व० ४।१२९)

इति पुर्यष्टकच्छेदनताडनादीन्यपि असि-

---

१ क० पु० अधिकारादिप्रधानमिति पाठः २ क० पु० सदा होम्य इति पाठः ।

नैवेत्यपि तथाशब्दार्थः, आकर्षणग्रहणाद्यास्तु धाम्नैवेत्युक्तम् ॥ १६४ ॥

किंच

पूर्णाहुतिसमुद्धारं
पूर्ववद्भैरवेण तु ।

निष्कलेनेत्यर्थः ॥

ज्ञानशक्तिप्रधानः श्रीसदाशिव इति

सदाशिवतनौ स्थित्वा
विश्लेषादीनि कारयेत् ॥१६५॥

विश्लेषादीना भेदोपशान्तिपरत्वात्तत्प्रधाना सदाशिवस्य व्याप्तिर्ग्राह्या, आदिशब्दादेकचैतन्यभावितोद्धारादयः ॥ १६५ ॥

एवं प्रसङ्गाद्विधिं पूरयित्वा प्रकृतमाह

आत्मस्थं पूरकेणैव
[1]तत्स्थं रेचकवृत्तितः ।

सर्वमेतत्पूर्वमेव निर्णीतम् ।

---

१ क० पु० हृत्स्थमिति पाठः ।

१४

अथ प्रतिष्ठाधिपतिम्

स्वनाम्नोच्चारयेद्विष्णुं[1]
ध्यात्वावाह्य तु स्थापयेत् १६६

पूजयेत्पुष्पगन्धाद्यैः

अस्मै च

तर्पणायाहुतित्रयम् ।

दद्यात् ॥

किंच

रसं पुर्यष्टकांशं तु
अर्पयेद्विष्णवे सदा ॥ १६७ ॥

दीक्षास्विति शेषः ॥ १६७ ॥

पूर्ववत्कृतश्रावणं

विसर्जयेत्ततो विष्णुं
वागीशीं च विसर्जयेत् ।

---

1 ख० ग० घ० पु० स्वनामोचारणाद्विष्णुमिति पाठः ।

अथ

कलासंधिर्यथापूर्वं[1]
हृस्वदीर्घप्रयोगतः ॥ १६८ ॥

अभावं भावयेत्तस्मिन्
पाशजाले त्वनन्तके ।

अथ

कलाद्वयविनिर्मुक्तः
पशुरूर्ध्वगमोत्सुकः ॥ १६९ ॥

तस्येदानीं तृतीयस्यां
विद्यायां योज्य शोधयेत् ।

चैतन्यमित्यर्थात् ॥ १६९ ॥

तां च विद्याम्

स्थापयित्वाथ संपूज्य
जुहुयादाहुतित्रयम् ॥ १७० ॥

एवं तु संमुखीकृत्य
प्रागिवाध्वावलोकनम् ।

कार्यमित्यर्थः ॥ १७० ॥

---

१ क० पु० कलासंधिं यथेति पाठः। हुत्वा दीर्घप्रयोगत इति च पाठः ।

तदेवाह

पुंस्तत्त्वाद्यावन्मायान्तं
विद्याया व्याप्तिरिष्यते ॥ १७१

एवं च

सप्त तत्त्वानि

पुरुषनियतिकालरागविद्याकलामायाख्यानि, पुरुषस्यैतत्तत्त्वषट्कमेतत्कञ्चुकरूपमन्तरङ्गं वेदनहेतुतया स्थितत्वाद्विद्याख्यया कलया व्याप्तं, प्रतितिष्ठते भोगहेतुतत्त्वजालं यत्रेति निरुक्त्या प्रतिष्ठा, निवर्तते तत्त्वसृष्टिर्यत इति निवृत्तिः, अशेषभेदोपशमाच्छान्ता, तामप्यतीता तत्संस्कारेणापि शून्या शान्त्यतीतेत्यनुसंधेयम् ॥

तथा

भुवनसप्तविंशतिरेव च ।

यद्यपि पुमान्नियतिरित्यादिस्तत्त्वक्रमस्तथापि पुंसो लोलिकामयस्य सामान्याभिष्वङ्गात्मना रागेणाव्यभिचारः, किंचिद्वेदनात्मनो विद्याया नियमनात्मना[1] नियत्या, कर्तृत्वोद्दल-

---

1 ख० पु० नियतात्मनेति पाठः ।

नात्मनश्च कलायाः कालेनेति तत्त्वपददीक्षयोः संपुटयोगस्य वक्ष्यमाणत्वात्तदनुसारेणैव भुवनेशस्थितिस्तत्र पुरुषरागतत्त्वयोर्विद्येशाष्टकं प्रधानमिति तदधिष्ठितान्यष्टौ भुवनानि, नियतिविद्ययोस्तु वामादिमनोन्मनान्तभुवनेशनवकाधिष्ठितानि नव, कालकलयोर्महादेवादित्रयाधिष्ठितं त्रयम् । एवम् २० । एतत्तत्त्वकारणभूतायां मायायामधोभागे गोपतिरूर्ध्वे विश्वे मध्ये त्रिकालक्षेमेशब्रह्माधिपतिशिवाश्चत्वारः, एतदधिष्ठाता चानन्तः,—इति सप्तेति भुवनसप्तविंशतिः ॥

तथा

पदविंशतिराख्याता

दक्षदिग्गतपदनवकाल्लकारान्तं चतुष्टयं पूर्वत्रान्तर्भूतमित्यवशिष्टं प्राग्वन्मादिक्षान्तं पञ्चकं, तथेशतत्त्वाधिष्ठिताग्नेयकोष्ठ[1]नवकादूकारादिरेफान्तं नवकं, सदाशिवतत्त्वाधिष्ठितपूर्वदिग्गतान्नवकादूकारादिक्षकारान्तं षट्कमिति पदविंशतिः ॥

---

१ ख० पु० कोणनवकमिति पाठः ।

किंच

वर्णाः सप्त प्रकीर्तिताः ॥ १७२

आद्याः घान्ताः ॥ १७२ ॥

तथा

मन्त्रौ द्वौ

अघोरः कवचम् ॥

इत्थमत्र

षड्विधाध्वानं

ज्ञात्वा वागीशिकल्पनम् ।

अत्र पूर्वोक्तं स्मारयति

प्रणवेन समावाह्य

व्यापिनीं सर्वयोनिषु ॥ १७३ ॥

समकालमृतुत्वेन

ध्यात्वा संपूज्य तर्पयेत् ।

किंच

ततः शिवाम्भसा शिष्यं

प्रोक्ष्य चास्त्रेण ताडयेत् १७४

तेनैव चास्त्रभूतेन

हुंफट्कारयुतेन तु ।

आत्मनो रेचकेनैव

गत्वेति शेषः।

शिष्यदेहे विशेद्धृदि ॥ १७५ ॥

अथास्य पुर्यष्टकरूपम्

अस्त्रमन्त्रेण संछेद्य

विशेषा[श्लेष्या]स्त्रेण कर्षयेत्।

द्वादशान्तात्तु संगृह्य

आत्मस्थं पूर्ववत्कुरु ॥ १७६ ॥

पूरकेणाथ संकुम्भ्य

रेचयित्वा तु योजयेत्।

पूर्ववद्व्यापकं तस्य[1]

चैतन्यं सर्वयोनिषु ॥ १७७ ॥

योगाद्यं लयपर्यन्तं

धाम्ना चैवात्र पूर्ववत्।

कुर्यादित्यर्थः ॥ १७७ ॥

---

१ क० ग० पु० न्यस्येति पाठः।

विशेषस्त्वत्रायम्

शिखया शतहोमात्तु
विद्याया निष्कृतिर्भवेत् ॥ १७८ ॥

अथास्य विश्लेषपाशच्छेदाभ्यामनन्तरं परेणात्मस्थतत्स्थत्वे कुर्यात् ॥ १७८ ॥

अथ पुर्यष्टकांशार्पणाय

प्रणवादि ततो रुद्र-
मावाह्य स्थाप्य पूजयेत्[1] ।
ततोऽस्य विन्यसेद्देवि
गन्धरूपे ध्रुवाहुती[2] ॥ १७९ ॥

एवं

पुर्यष्टकांशं विन्यस्य
विसर्ज्य रुद्रदेवताम् ।
वागीशीं च विसर्ज्यैवं
कलासंधिश्च पूर्ववत् ॥ १८० ॥

कार्यः ॥

१ पं० ८ ख० ङ० पु० योजयेदिति पाठः । २ ख० पु० ध्रुवाहुतौ इति पाठः ।

कथम्

ह्रस्वदीर्घविभागेन
विद्यां शान्तौ नियोजयेत् ।
संधानार्थं तु मूलेन
जुहुयादाहुतित्रयम् ॥ १८१ ॥

संधेरनन्तरमध्वोपस्थापनाय

स्वनाम्नावाहनं शान्ते-
र्विधिपूर्वं निवेदनम् ।
प्रमेयभावनां कृत्वा

तां च

पूजयेत् कुसुमादिभिः ॥१८२॥
त्रिराहुतिं तु मूलेन

दद्यात् ॥ १८२ ॥

अस्या अध्वान्तरव्याप्तिमाह

विद्यातत्त्वात्सदाशिवम् ।
तत्त्वानां त्रितये व्याप्ति-
र्वर्णानां त्रय एव च ॥ १८३ ॥

---

१ ख० पु० कलासंधेरिति पाठः । २ पं० १७ ख० प० निवेशनमिति ।

क-ख-ग इत्यत्र च ॥ १८३ ॥

पदैकादशिका ज्ञेया

पूर्वदिग्गतान्नवकात् क्षान्तस्य षट्कस्य विद्यायामन्तर्भावाद्रेफप्रणवहकारात्मकं त्रयं मध्यमाच्च नवकादूकारादिहान्तमष्टकमिति पदैकादशिका ॥

पुराणि दश सप्त च ।

तत्र विद्यायां त्रिगुण्यादीनां विद्याराज्ञीनामेकमीश्वरतत्त्वे त्वैश्वरं भुवनमनन्तादिशिखण्ड्यन्तविद्येश्वरभुवनान्यष्टौ, धर्मादीनां भुवनानि चत्वारि, वामादिशक्तित्रयभुवनमेकं, ज्ञानक्रियाभुवनमेकं, तस्मिन्नेव च भुवने विद्याद्वयादेः प्रभवद्वादशकपर्यन्तस्यैकोनषष्टेर्भुवनानामवान्तरो विभागः । वक्ष्यति च

'एकोनषष्टिर्भुवनं ज्ञानशक्त्यादितः क्रमात् ।'
(स्व० १०।११८२)

इत्येवमीश्वरतत्त्वे पञ्चदश भुवनानि । यद्वक्ष्यति

'दश पञ्च च शोध्यानि भुवनान्यैश्वरे पदे ।'
(स्व० १०।११६९)

इति । सदाशिवतत्त्वे सादाशिवमेकं भुवनं स्व-

मिव ब्रह्माङ्गसकलाद्यष्टकशिवरुद्रभेदावरणगतानन्तभुवनव्यापकमिति सप्तदश भुवनानि ॥

तथात्र

मन्त्रौ द्वौ

तत्पुरुषास्त्ररूपौ ॥

तदत्र

षड्विधोऽध्वैवं

मुख्याः पाशा इमे स्मृताः ॥१८४॥

पूर्ववच्च

सूक्ष्मपाशाननेकांश्च

तदन्तर्भावयेत्सदा ।

अथ

वागीशीं कल्पयेत्तत्र

पूर्वेण विधिनाहुतिः ॥ १८५॥

पूजनं मूलमन्त्रेण

ततः प्रोक्षणताडनम् ।

छेदाकर्षग्रहं चैव
योगधारित्वजन्म[1] च ॥ १८६ ॥
अधिकारस्तथा भोगो
लयो वै पूर्ववद्भवेत् ।
सर्वे ते मूलमन्त्रेण
आहुतित्रितयेन तु ॥ १८७ ॥

योगो गर्भेषु चैतन्यस्य, धारित्वं युगपद्गर्भवर्धनम् । यदुक्तम्

'सर्वयोनिषु गर्भास्ते युगपद्वृद्धिमागताः ।' (स्व० ४।११८)

इति । सर्वे इति गर्भाधानाद्याः संस्काराः ॥१८७॥

किंच

निष्कृतौ[2] शतहोमं तु
कवचेन तु कारयेत् ।

तुशब्दः पूर्वस्माद्[3]विशेषाय ॥

१ क० पु० कर्म चेति पाठः । २ ख० पु० निष्कृतिमिति पाठः । ३ ख० पु० तुशब्दो विशेषमाहेति पाठः ।

विश्लेषं पाशच्छेदं तु
कुर्यादस्त्रेण दैशिकः ॥ १८८ ॥
उद्धारकरणात्मस्थ-
तत्स्थीकारान्भवेन तु ।

अथ

स्वनाम्ना प्रणवाद्येन
ईशमावाह्य पूजयेत् ॥ १८९ ॥
संपूज्य हुत्वा संतर्प्य
बुद्ध्यहंकृतिद्व्यंशकम् ।

अत्र प्रयोगः

स्वनाम्ना प्रणवाद्यं तु
स्वाहान्ते बुद्धिमर्पयेत् ॥१९०॥
अहंकारं तथाप्येवं
हुत्वेदं क्षमयेत्ततः ।
वागीशीं पूजयित्वा तु
तर्पयित्वा विसर्जयेत् ॥ १९१ ॥

---

१ ख० पु० ग्रहणेति पाठः । २ क० ग० पु० तस्यार्घ्यमिति पाठः ।

यदत्रानुक्तं तत्पूर्वतो योज्यम् ॥ १९१ ॥

अथ

कलासंधानकं पूर्वं
शान्त्यतीते तु योजयेत् ।
ह्रस्वदीर्घविभागेन

प्राग्वच्छान्ताशान्त्यतीते अनुसंदधीतेत्यर्थः॥

तदर्थं च

जुहुयादाहुतित्रयम् ॥ १९२ ॥

अथ

ध्रुवेण तत्त्वसंधानं
कर्तव्यं विधिवेदिना ।

पूर्ववत्प्रणवधामशान्त्यतीताबीजोच्चारपूर्वं 'शान्त्यतीतायै नमः' इति प्रयोगः स्मर्तव्यः । तत्त्वमत्र[2] प्रकृता शान्त्यतीता, विधिवेदिना व्याप्तिज्ञेन ॥

किंच

कलोपस्थापनं पश्चा-
द्ध्रुवेण जुहुयात्प्रिये ॥ १९३ ॥

---

१ घ० ङ० पु० अनुयुक्तमिति पाठः । २ क० ग० तत्त्वमन्त्रेति पाठः ।

त्रिराहुतिप्रयोगेण
स्वनामपदमुच्चरन् ।
शान्त्यतीतां समावाह्य
स्थापयेत्पूजयेत्पुनः ॥ १९४ ॥

व्याप्तिमालोक्य चाध्वस्थां

तामेव स्पष्टयति

शिवतत्त्वगताश्च ये ।

पदार्थास्तेऽनुसंधेया अत्रेत्यर्थः ।

तानाह

बिन्दुर्नादस्तथा शक्तिः
शिवतत्त्वे व्यवस्थिताः ॥१९५॥

शिवतत्त्वं समनाव्याप्त्यन्तमिहेति तच्छोध्यमेव । बिन्दुनादशक्तयोऽत्र गर्भीकृतवक्ष्यमाणषोडशभुवना मुख्यान्यावरणानि ॥ १९५ ॥

किंच

पदमेकं मन्त्र एको
वर्णाः षोडश कीर्तिताः ।

भुवनानि तु सूक्ष्माणि
शान्त्यतीते तु भावयेत् ॥१९६

पदं मध्यकोष्ठनवकमध्यगत ओंकारः, मन्त्र ईशानभट्टारको धामत्रयमयनेत्र[1]मन्त्राभिन्नमूर्तिः, वर्णा विसर्गाद्या अकारान्ताः षोडश, भुवनानि भूमिकात्मकप्रमेयमात्ररूपत्वात् सूक्ष्माणि न तु संनिवेशवन्ति, तानि च षोडश । तद्यथा—बिन्द्वावरणे निवृत्त्यादिकलाचतुष्कपरिवृतं शान्त्यतीताभुवनमेकं, ततोऽर्धचन्द्रनिरोधिकाभुवने द्वे निजनिजकलापञ्चकपरिष्कृते, नादावरणे पुनरिन्धिकादिशक्तीनां स्वशक्तिमदधिष्ठितानां पञ्च भुवनानि, नादान्ते सुषुम्णेशपरब्रह्माधिष्ठितमेकं भुवनं, शक्त्यावरणे तु सूक्ष्मादिशक्तिचतुष्कपरिष्कृतं पराशक्तिभुवनमेकं, ततोऽपि व्यापिनीभूमौ व्याप्यव्योमे[2]रूपानाथानन्तानाश्रितानां पञ्च भुवनानि, ततोऽपि समनायां महामायारूपायां तच्छक्तिमारूढः पञ्चविधकृत्यकारी शिव इति ।

---

१ क० पु० नेत्राभिन्नेति पाठः । २ ख० ग० पु० व्याप्यव्यापकरूप्येति पाठः ।

नन्विह मन्त्राणां शोधकानामपि कथं शोध्यत्वमुक्तं तथात्वे वा कस्य तच्छोधकत्वं मूलमन्त्रस्यापि च मन्त्रत्वाच्छोध्यत्वप्रसङ्गः, निवृत्त्यादिवच्च शान्त्यतीतायामप्यङ्गमन्त्रः किं नोक्तः। निवृत्तिशान्त्यतीतयोर्मूलेन निष्कृतिहोमः प्रतिष्ठाविद्याशान्तानां शिरःशिखाकवचैर्निवृत्तौ विश्लेषो मूलेनान्यत्र हृदयेनापरत्रास्त्रेणेति कोऽयं क्रमः। अत्रोच्यते—इह मन्त्राः शिवावेशशालिनो वीर्यविदो गुरोर्निजशक्तिसारतया स्फुरन्तः शोधकाः, पशूनां तु गूहितस्ववीर्याः स्वस्वरूपावरणतया तिष्ठन्तः शोध्या एव, ते चाङ्गवक्त्रभेदादेकादश, मूलमन्त्रस्तु

'स्वयमुच्चरते देवः' (स्व० ७।५८)

इति वक्ष्यमाणस्थित्या नादामर्शपरमार्थतया सर्वस्य स्फुरतीति नास्य शोध्यत्वं, केवलमकारादिसमनान्तप्रमेयैकादशकमत्र सूक्ष्मरूपतया गर्भीकृतमन्त्रैकादशिकास्फारमित्यारुरुक्ष्वाशयेन विश्लेषणक्रमयुक्त्यांशांशिकाभिप्रायात्।

'अक्षरेषु कुतो मोक्ष आकाशे कुसुमं कुतः।' (स्व० ७।२३५)

---

१ क० पु० समावेशेति पाठः।

इति मूलमन्त्रविषयमुक्तम् । तत्तद्वाच्यभागाभिप्रायेण च

'समनान्तं वरारोहे पाशजालमनन्तकम् ।' (स्व० ४।४२९)

इत्युक्तम्, वस्तुतस्त्वशेषविश्वाभेदमयो नित्योदितानुच्चार्यमहाविमर्शरूप एवायं निष्कलनाथस्तदभिन्नमूर्त्तिः सकलोऽपि वेति नास्य कदाचिदपि शोध्यत्वं शङ्कितव्यम् । शान्त्यतीतायां च नामानुरूपत्वादेव न पृथगङ्गमन्त्रः संभवति । धामत्रयात्मनेत्रमन्त्रस्तु ईशानमन्त्राभिन्नमूर्तिरवश्यमनुप्रविष्टोऽन्यथा मन्त्रैकादशिका न शोधिता[1] स्यात्

'मन्त्रा एकादश ज्ञेयाः ।' (स्व० ४।२०१)

इति च भाविवाक्यमसंगतं स्यादत एवास्त्रमन्त्रस्ताडनादावेवोपयुङ्क्ते[2] । नेत्रमन्त्रस्तु मूलमन्त्रादभिन्न इति न तौ कलान्तःशोध्यौ,—इत्येकीयमतमसत्[3] । यस्तु निष्कृत्यादिहोमेषु मन्त्रनियम उक्तस्तत्रेश्वराज्ञैव नियन्त्रिकेति सर्वमनवद्यम् ॥ १९६ ॥

---

१ ख० पु० शोध्येति पाठः । २ ख० ग० पु० उपयुक्त इति पाठः । ३ ख० ग० पु० मतमसमञ्जसमिति पाठः ।

त एते सर्व एव पाशाः

शोधनीया वरारोहे

वर उत्कृष्ट ऊर्ध्वद्वादशान्तविश्रान्तिरूप आरोह उल्लासो यस्याः शक्तेः ॥

तावच्चैते शोध्याः

यावत्ते शिवरश्मयः ।

निरवशेषभेदोपशान्त्या शिवस्य रश्मिरूपा अभिन्नप्रभामात्रात्मानः संपद्यन्ते इत्यर्थः ॥

अत एव

शिवस्योर्ध्वे शिवो ज्ञेयो
यत्र युक्तो न जायते ॥१९७॥

उत्तीर्णशिवतत्त्वोपरि[1] विश्वोत्तीर्णविश्वमयचिदानन्दघनस्वच्छन्दभट्टारको यत्र वक्ष्यमाणयोजनिकाक्रमेण युक्तो न जायते मुच्यते इत्यर्थः ॥ १९७ ॥

अत एवास्य यावान् कलापञ्चकान्तः प्रपञ्चितः, स सर्व एव

---

१ ख० पु० तत्त्वस्येति पाठः ।

षडध्वा चैकतो ज्ञेयः

एकस्मिन् परमशिवात्मन्यभेदेनावस्थित-स्तत्सामरस्यमापन्नो ज्ञातव्यो गुरुणा साकल्येन संकल्पितः ॥

कियानसावध्वा यो दीक्ष्यस्य शिवैकात्म्यं[1] प्राप्त इति दर्शयितुमाह

तस्य संख्यां पुनः शृणु ।
कलाश्च पञ्च विज्ञेया-
स्तत्त्वषट्त्रिंशदेव तु ॥ १९८ ॥
सचतुर्विंशति ज्ञेयं
भुवनानां शतद्वयम् ।
एकाशीतिपदान्यत्र
वर्णार्धशतिका स्मृता ॥ १९९ ॥
मन्त्रा एकादश ज्ञेया
इत्येतच्चाध्वमण्डलम् ।
एतस्मिञ्शुद्धिमापन्ने
मुक्तिमाप्नोति दीक्षितः ॥२००॥

१ ख० पु० शिवात्मैक्यमिति पाठः ।

शुद्धिरस्य परमशिवाभिव्यक्तिरित्युक्तम् २००
एवं प्रासङ्गिकमध्वशुद्धिग्रन्थमभिधाय प्रकृतमाह

धुवेणावाह्य वागीशीं
विन्यसेत्

तदर्थम्

पूर्ववद्धुतिः ।

संपूज्य कुसुमाद्यैस्तु
तद्योनौ पूर्ववत्पशुम् ॥ २०१ ॥

योजयेदिति शेषः ॥ २०१ ॥

किंच

ध्रुवेण सर्वं कर्तव्यं
जननादिलयान्तकम्[1] ।
निष्कृतौ शतहोमं तु
मूलमन्त्रेण कल्पयेत् ॥ २०२ ॥
विश्लेषपाशच्छेदाभ्यां
प्राग्वत्कुर्याद्ध्रुवेण तु ।

---

[1] ख० पु० न्तगमिति पाठः ।

छेदाभ्यामिति तादर्थ्ये । तेन विश्लेषार्थं प्राग्वत् कुर्यात् हुत्यादिकर्मेत्यर्थः ॥ २०२ ॥

किंच

ग्रहेणा[1]त्मस्थतत्स्थत्वं
प्रणवेन पशोः स्मृतम् ॥२०३॥

प्रणवो निष्कलनाथः ॥ २०३ ॥

सदाशिवमथावाह्य
मूलमन्त्रं समुच्चरन् ।
नमस्कारेण संस्थाप्य
पुष्पैः संपूज्य तर्पयेत् ॥२०४॥
मनः पुर्यष्टकांशं तु
विन्यसेत्कारणेश्वरे ।

कथमित्याह

प्रणवादि समुच्चार्य
मनःसंज्ञां नमस्[2]तथा ॥२०५॥
विन्यस्य पूजयेत्पश्चा-
त्संज्ञास्वाहान्तमेव च ।

---

१ ख० पु० ग्रहणात्मेति पाठः । २ ख० पु० मन इति पाठः ।

प्रणवधामभ्यामनन्तरं 'मनो देवदत्तस्यार्पयामि नमः' इति मन्त्रप्रयोगः होमे तु स्वाहेत्यन्तः । संज्ञास्वाहान्तमिति क्रियाविशेषणम् ॥ २०५ ॥

अत्र च

आहुतित्रितयं हुत्वा
पुर्यष्टांशाद्विशुद्ध्यति ॥ २०६ ॥
ततो विसर्जयेद्देवं
कारणं च सदाशिवम् ।
पुष्पादिभिः समभ्यर्च्य
वागीशीं तदनन्तरम् ॥२०७॥
[1]तां तु संपूज्य संतर्प्य
विज्ञाप्या भक्तिभाविता ।
क्षमस्व देवदेवेशि
पश्वर्थं खेदिता मया ॥ २०८ ॥
इदानीं नोपरोद्धव्यं
गच्छ देवि स्वविष्टपम् ।

१ ग० पु० सा तु संपूज्येति, भक्तिशालिनेति च पाठः ।

सर्वदीक्षान्त इयं विज्ञप्तिः कार्येति विशेषद्योतनाय तुशब्दः, खेदनं भूयोभूयः परस्वरूपाद्यभिधानाद्यर्थमवतारणं, नोपरोद्धव्यमिति अस्य दीक्षितस्येदानीं त्वया नोपरोधेन स्वरूपावरणं कार्यमिति यावत्। अत एव स्वविष्टपं दीक्षितस्य परमशिवात्मस्वात्मस्वरूपमधिकरणं गच्छ तन्मयतयास्य सदा स्फुरेत्यर्थः। अत एव श्रीस्पन्देऽभिहितम्

'...स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका।' (स्प०।४।१८)

इति। यदुक्तं ब्रह्मणि शब्दस्पर्शौ, विष्णौ रसः, रुद्रे रूपगन्धौ, ईश्वरे बुद्ध्यहंकारौ, सदाशिवे मनः पुर्यष्टकांशमर्पयेत्। तत्रायमभिप्रायः—इह ब्रह्मा परमया व्याप्त्या नादान्तोपरि ब्रह्मबिलाधिष्ठातृब्रह्मरूपः, विष्णुरपि तदुपरि प्रसरद्रूपशक्तिप्रधानशक्त्यात्मा, रुद्रोऽपि व्यापिनीपदावस्थितानाश्रितनाथरूपः, ईश्वरोऽपि समनापदाधिरूढः सृष्ट्यधिकारी शिवः, सदाशिवस्तु स्वच्छस्वच्छन्दचिदानन्दघनः परमशिवः,—इत्येकादशपटलोक्तव्यव-

१ ख० पु० समर्पयेदिति पाठः।

स्थया परस्य ब्रह्मणो नादान्तशक्त्योर्मध्यवर्ति-
त्वात् सूक्ष्मतमाभ्यां शब्दस्पर्शाभ्यां योगः।
एवं मूलभूमौ स्पर्शप्रधानापि प्रसरद्रूप-
तया रसमयी शक्तिरिति तन्मयस्य विष्णोः
सूक्ष्मतमरससंबन्धः, ततोऽपि रुद्रस्य व्या-
पिन्यामनाश्रितपदे विश्वस्यासूत्रणादमात्रात्म-
नः[1] प्राक्सृष्टोपसंहृतजगद्गतसुसूक्ष्मतमसंस्का-
रमात्रात्मना तनीयस्तमेन गन्धेन चास्ति
संबन्धः। समनाधिष्ठातरि तु शिवे मननमा-[2]
त्रसारे विगलद्बुद्ध्यहंकारवासनासङ्गः, परम-
शिवेऽपि उन्मनाशक्तिसमाश्लिष्टे[3] मननसंस्का-[4]
रस्यापि गलनमित्यतिसुसूक्ष्मतमस्वप्रशान्तम-
नःसंस्कारसंबन्धोऽस्ति,—इत्याशयेन निरवशे-
षसंस्कारपर्यन्तपुर्यष्टकप्रशान्त्यर्थमेव पुर्यष्टकां-
शार्पणम्। अन्ये तु

‘श्रुतित्वग्विप्लुतिर्ब्राह्मी ब्रह्मक्रव्यादयोनिदा।
रासनी वैष्णवी रौद्री घ्राणलोचनहेतुका॥
ऐश्वरी गर्वधीरूपा मानसी शिवदेवता।’

---

१ ख० पु० त्मनो रूपेणेति पाठः। २ ख० पु० मनोमात्रेति पाठः। ३ ख० पु० समाविष्ट इति पाठः। ४ ख० ग० घ० ङ० पु० संस्कारस्यागलनमिति पाठः।

इति निर्बीजदीक्षाविषयश्रीमृगेन्द्रवाक्यटीकायामुक्तेन्द्रियविप्लुत्यात्मसमयोल्लङ्घनसंभाव्यमानतत्तत्क्रव्यादत्वप्रशमनाय पाशशोधनपरेऽपि वाक्ये निर्बीजदीक्षायां पुर्यष्टकात् शब्दस्पर्शार्पणं ब्रह्मणि कार्यमित्यादि यद्भट्टनारायणकण्ठेनोक्तं तदेवात्र योजयांचक्रुः । तत्र सबीजनिर्बीजादिसर्वदीक्षासु पुर्यष्टकांशार्पणमाम्नातम्, अतो मृगेन्द्रायां समयपाशशोधनपरेऽपि वाक्ये निर्बीजदीक्षाविषयमेव[2] पुर्यष्टकांशार्पणं तदभिप्रायवर्णनं च तेनाकारि, तद्युक्तमयुक्तं वेति सचेतसः प्रमाणमित्यलम् ॥ २०८ ॥

अथ वागीशीं

विसर्ज्यैवं कला भाव्या
शान्त्यतीता लयं गता ॥२०९॥
स्वशक्त्याधारपर्यन्ते[3]
सुसूक्ष्माभावसंस्थिते ।

१ ख० पु० विरत्यात्मेति पाठः । २ ख० पु० विषय एवेति पाठः ।
३ क० पर्यन्तमिति पाठः ।

स्वा स्वातन्त्र्यात्मा शक्तिराधारः समवायिनी यस्य, स एवाशेषस्य समनाप्रतिष्ठास्थानत्वात् पर्यन्तः, अत एव सुष्ठु सूक्ष्मस्याभावस्य समनात्मनो व्यापिन्यादिक्षित्यन्तनिःशेषभावाभावभित्तिभूतस्य महाशून्यस्य संस्थितं संस्थानं यत्र ॥ २०९ ॥

अथ कायवाङ्मनःकर्मान्यथाभावे जाते सति

आत्मतत्त्वविभागेन
धाम्ना वै जुहुयाच्छतम् ॥२१०॥

आत्मशब्दो विद्याशिवावुपलक्षयति, तेनात्मविद्याशिवतत्त्वविभागेनेत्यत्रार्थः ॥ २१० ॥

तथा

सशब्दोच्चारयोगेन
आत्मतत्त्वे तु होमयेत् ।

प्रणवनिष्कलोच्चारपूर्वं दीक्ष्यस्यात्मतत्त्वव्याप्तमायान्ताध्वशुद्धौ विधिन्यूनातिरिक्तदोषशुद्धिरस्तु स्वाहेत्यत्र प्रयोगः ॥

एतच्चात्मतत्त्वम्

मायातत्त्वावधि ज्ञेयं
दैशिकेन [1]महाध्वरे ॥ २११ ॥

मायान्तं वेद्यं सर्वमिति तद्व्याप्यात्मतत्त्वं महाध्वरे दीक्षाप्रयोजनशिवयागे ॥ २११ ॥

किमर्थमयं होमः, इत्याह

विधिवैकल्यकर्मार्थं
प्रायश्चित्तविशुद्धये ।

'विधिः' पूजाहोमादिः शास्त्रचोदितस्तस्य 'वैकल्यकर्म' न्यूनातिरेकानुष्ठितिस्तदर्थमिति तन्निवृत्त्यर्थं या प्रायश्चित्तशुद्धिस्तस्यै ॥

अथ

विद्यातत्त्वे तु होतव्यं
शतमष्टोत्तरं प्रिये ॥ २१२ ॥

तच्च

उपांशूच्चारयोगेन
विद्यातत्त्वे तु होमयेत् ।

---

[1] ख० पु० शिवाध्वरे इति पाठः ।

पूर्वोक्ताया विद्याया इयमन्यैव।

मायान्ते विद्या करणरूपा भगवतः,—इति वक्तुमाह

सदाशिवान्तमध्वानं
विद्यातत्त्वं विनिर्दिशेत्॥२१३

ज्ञानक्रियात्मा शक्तिः शिवस्य कारणं तद्रूपश्च सदाशिवः,—इति तदन्ता विद्यातत्त्वस्य व्याप्तिः॥ २१३॥

अत्र च

मन्त्रोच्चारविलोमेन
प्रायश्चित्तं तु यद्भवेत्।
तद्विशुद्ध्यै स होमः स्या-
द्विद्यातत्त्वे तु यः कृतः॥२१४॥

विलोमतान्यथाकरणम्। अत्र च प्रणवनिष्कलावुच्चार्य दीक्ष्यस्य विद्यातत्त्वव्याप्तसदाशिवान्ताध्वशुद्धौ मन्त्रोच्चारवैलोम्यशुद्धिरस्तु स्वाहेति प्रयोगः॥ २१४॥

अनन्तरम्

मनोविज्ञानवैकल्यात्
प्रायश्चित्तं तु यद्भवेत् ।
तच्छुद्ध्यर्थं[1] शिवे तत्त्वे
मूलमन्त्रेण होमयेत् ॥ २१५ ॥
मानसेन प्रयोगेन

मनोविज्ञानं भावना, शिवतत्त्वमुक्ततत्त्वापेक्षयात्र प्रमातृरूपम् ॥ २१५ ॥

एतच्च

शक्त्यन्तेऽध्वनि संस्थितम् ।

'शक्त्यन्तं' समनान्तमुत्तीर्य शिवभट्टारकस्य तावद्व्यापिकत्वात् ॥

अथाशेषबन्धभित्तेर्मुण्डान्तोर्ध्ववाहिन्याः प्राणशक्तेरधोवाहात्मकबन्धकत्वोपशमाय तदनुकारिण्याः स्थूलदेहगतायाः शिखायाश्छेदमादिशति

---

१ ख० पु० तद्विशुद्ध्यै इति पाठः ।

तत्त्वत्रयविशुद्ध्यन्ते
शिखाच्छेदं[1] तु कल्पयेत् २१६

कथं च

अध्वान्तस्थां परां शान्ता-
मनौपम्यामनामयाम्।
व्यापिनीं सर्वतत्त्वानां
सर्वकारणकारणम् ॥ २१७ ॥
ध्यात्वा शिशोः शिखाग्रे तु
पुष्पाग्रे जलबिन्दुवत्।

अध्वनोऽन्तेऽत एवाविद्यमानध्वान्ते पदे[2] च स्थितां परां शान्तामिति शान्त्यतीतां सर्वोपाधिक्षै[3]ण्यादनामयामकलङ्कां षण्णामपि कारणानां कारणं शिशोः शिखाग्रे ध्यात्वेति संगतिः ॥ २१७ ॥

किं च

कर्तरीं शिखयामन्त्र्य
शिखया च्छेदयेच्छिखाम् २१८

---

१ ग० पु० भेदमिति पाठः। २ ख० ग० घ० पु० ध्वान्तोपदेशेति पाठः। ३ क० पु० वैलक्षण्यादिति पाठः।

शिखयेति नैष्कलेन शिखामन्त्रेण । इह विशेषानभिधानान्निर्बीजसबीजदीक्षाद्वयविषयशिखाच्छेदनं न तु निर्बीजायामेव ॥ २१८ ॥

अथ

शिखां समर्प्य चान्यस्य
निर्गच्छेत्स सशिष्यकः ।

तत्र च

स्नानं समाचरेच्छिष्यः

छिन्नशिखत्वात् ॥

तत्स्पर्शात्तु

गुरोराचमनं भवेत् ॥ २१९ ॥

स शिष्यसंपर्कत्वात्पराशयग्रहणाय वा

स्नानमुद्धूलनं वाथ
आचरेत्स्वेच्छया गुरुः ।

ततः

प्रविश्य सकलीकृत्य

आत्मानम् ।

पूर्णया जुहुयाच्छिखाम् २२०

उत्क्रान्तिप्राणशक्त्यनुकारिणीम् । अत्र च पूर्वसंवादितः पाशहोममन्त्रः प्रयोक्तव्यः २२०

इत्थं च

हुत्वा निर्गम्य[1] चाचम्या-
क्षाल्य स्रुक्स्रुवकर्तरीः ।
प्रविश्य सकलीकृत्य
शिवहस्तानुपूजनम् ॥ २२१ ॥

कुर्वीतेत्यर्थः ॥

ततस्तु मण्डले पश्चा-
त्पूजयेत्परमेश्वरम् ।
पुष्पादिभिरशेषैस्तु
ततो विज्ञापयेच्छिवम् ॥२२२॥
भगवंस्त्वत्प्रसादेन
अध्वषट्कव्यवस्थितम् ।
पशुं संगृह्य संशोध्य
शिखाच्छेदावसानकम् ॥२२३॥

---

१ ख० ग० पु० निर्गत्येतिपाठः ।

त्वन्मुखोक्तविधानं तु
लेशतो वर्तितं मया ।

ग्रहणं पाशसूत्रात्स्वदेहाच्च । संशोधनं मलेभ्यः । वर्तितं संपादितम् ॥ २२३ ॥

किंच शिष्यमिष्टं धाम लम्भयितुं मया

त्वच्छक्त्यैव तु गन्तव्य-
माशु ध्रुवपदं शिवम् ॥ २२४ ॥

एवकारो निरपेक्षः शक्तिपात एवात्र प्रभवतीति ध्वनति । एतच्च पञ्चमपटलान्ते निर्णेष्यामः। ध्रुवपदं सप्तमं परमशिवस्थानम् ॥२२४॥

तदर्थमेव

इदानीं योजने कर्म

मयारभ्यते ।

ततोऽत्र

तवाज्ञानुविधायिनः ।
आज्ञा मे दीयतां नाथ
शिष्यं संयोजयाम्यहम् ॥२२५॥

तवाज्ञेति

'दीक्षणीयास्त्वया शिष्याः'

इत्यधिकारावसरे प्राप्ता ।

अथ

लब्धानुज्ञातमात्मानं

आज्ञालाभयुक्त्यैव रुद्रशक्तिसमावेशात्

प्रहृष्टो निर्गतः पुरात् ।

अर्घहस्तो व्रजेदग्निम्

पुरादिति मण्डलक्षेत्रात् ।

अथात्र

शिष्यमाहूय प्रोक्षयेत् ॥२२६॥

प्रोक्षितस्य

पूर्ववन्न्यासनस्थस्य

सकलीकरणादिकम् ।

अन्तःकरणविन्यासं

नाडीसंधानपूर्वकम् ॥२२७॥

कृत्वा

पूजनं तर्पणं चाग्नौ

मन्त्राणां च शिवस्य च ।

कुर्यात् । तर्पणं मूलापेक्षया वक्त्राङ्गानाम् ॥

दशभागविभागेन

नचात्र द्रव्येयत्तानियम इत्याह

यथा द्रव्यानुसारतः ॥ २२८ ॥

यद्वक्ष्यति

'तिस्रः पञ्च दशैका वा तिलैर्वाथ घृतेन वा ।' (स्व ४।४४५) इति ॥ २२८ ॥

अथ ये निष्कलस्वरूपनिमज्जनेन सकलतामुन्मज्ज्य भगवतोऽन्तरङ्गशक्तिरूपा वक्त्राङ्गमन्त्रा भेदप्रथोत्थापनेन चिदात्मना संशुद्धत्वापादनेऽधिकृतास्तान्

मन्त्रान्संशोधयेत्पश्चा-

त्सकलीकरणे स्थितान् ।

सकृदाहुतियोगेन

मूलमन्त्रेणैवेतरमन्त्रशुद्धिरिति निर्णीतमतः प्रणवनिष्कलोच्चारपूर्वं हृदाद्यैकैकं जात्यन्तमुच्चार्य 'भगवन् दीक्ष्यस्य निष्कलशुद्धधामप्रथापरो भव स्वाहा' इति प्रयोगेन निष्कलधामविश्रान्तिभावनयाहुतिं दद्यात् ॥

तत एतानिदं श्रावयेत्

अधिकारो वि[1]वर्ज्यताम् २२९

सकलीकरणत्वेन

न कदाचित्पशोः पुनः ।

सकलीकारो भवद्भिः कार्य इति शेषः २२९

एवं दीक्ष्यस्य मन्त्रैकादशिकाशुद्धि[2]मितिकर्तव्यत्वेनोक्त्वा देवीमाह भगवान्

योजनीयं प्रयोगं तु

अधुना कथयामि ते ॥ २३० ॥

योजनायै हितं योजनीयं, प्रकृष्टं योगमितिकर्तव्यतारूपं प्रयोगं चाधुना निःशेषपाश-

१ ख० पु० विसृज्यतामिति पाठः । २ ग० पु० शुद्धिमपि कर्तव्यत्वेनेति पाठः ।

क्षपणे जाते सति 'ते' इत्यनुग्रहैकप्रवणतया भगवत्या एवैकस्याः परस्याः शक्तेर्योजनायां शक्तायाः कथयामि विमर्शपदं लम्भयामीत्यर्थः ॥ २३० ॥

अस्य चाभ्यस्तज्ञानयोगदुष्प्रापदैशिकप्रवरसाध्यत्वमिति दर्शयितुं, महता पीठिकाबन्धग्रहणेन योजनोपयोगि[1] प्रमेयत्रयोदशकं सद्गुरूणां हृदयंगमीकार्यं निर्णेतुमुदाक्षिपति परमेश्वरः

ज्ञात्वा चारप्रमाणं तु
प्राणसंचारमेव च ।
षड्विधाध्वविभागं तु
प्राणैकत्र यथास्थितम् ॥२३१॥
हंसोच्चारं तु वर्णांश्च
[2]कारणत्यागमेव च ।
शून्यं समरसं ज्ञेयं
त्यागं संयोगमुद्भवम्[3] ॥ २३२ ॥

१ ख० पु० प्रयोजनेति पाठः २ ख० ग० पु० करणत्यागेति पाठः ।
३ क० पु० गसंभवम् इति पाठः

भेदनं च पदार्थानां
भावप्राप्तिवशात्पुनः ।
आत्मविद्याशिवव्याप्ति-
मेवं ज्ञात्वा तु योजयेत् २२३

इह

'तस्मिन्युक्तः परे तत्त्वे सर्वज्ञादिगुणान्वितः ।
शिव एको भवेद्देवि अविभागेन सर्वतः ॥'
(स्व० ४।४०१)

इति भाविनीत्या परभैरवैक्यापत्त्यात्मा योजना पुर्यष्टकाहन्ताप्रशान्त्यैव गुरोः कर्तव्या । पुर्यष्टके च प्राणाश्रयं शून्याश्रयं च स्वप्नसौषुप्तयोस्तथा निश्चयादिति प्राणशून्यपदयोः प्रशमनीयत्वे चास्य प्राणवाहस्य देशकालाभ्यां प्रमाणमवश्यं ज्ञातव्यं, तत्रापि चारोहावरोहरूपसंचरणं ज्ञातसंचारस्य तत्रस्थोल्लङ्घनीयसमस्ताध्वपरिज्ञानमुपयोगि अध्वोल्लङ्घनमपि ऊर्ध्वनदनात्महंसोच्चारपरिज्ञानात्, तदुच्चारो द्विधा स्वाभाविकः प्रायत्निकश्चेति, प्रायत्निके तस्मिन् नैष्कलैरकारोकारादिभिर्वर्णैः कार-

णानां ब्रह्मादीनां त्यागोऽपि ज्ञेयः, चकारात्तदुचितकालत्याग इहानुद्दिष्टोऽपि वक्ष्यमाणो ज्ञातव्य एव; प्राणवच्च शून्यमपि प्रशमनीयत्वाज्ज्ञेयमेव परभैरवैक्यात्मयोजनं च मन्त्रात्मनाड्यादिसामरस्यज्ञप्तिपूर्वकं, सामरस्यज्ञानं साम्यज्ञप्तिपूर्वकमिति साम्यात्मविषुवत्स्वरूपमपि भविष्यति, अकाराद्युन्मनान्तं द्वादशविधं ज्ञेयमपि मन्त्रोच्चाराङ्गतया ज्ञेयमेव, त्यागाय चैतज्ज्ञेयमिति त्याग उक्तः, स च तत्तद्दशासंयोगपूर्वकः [1]तत्तद्दशात्यागे चोर्ध्वोर्ध्वारोहात्मोद्भवोऽपि ज्ञातव्यः, यावच्चैषां ग्रन्थीनां भेदनं न वृत्तं न तावत्तत्त्यागेनोर्ध्वोद्भवो घटते भेदनं च ज्ञानयोगाभ्याम् । यद्वक्ष्यति

'भेदयेज्ज्ञानशूलेन············।' (स्व० । ४।२३४)

इति । तथा

'भेदयेन्मन्त्रशूलेन मुद्राभावयुतेन तु ।'
(स्व० । ४।२५६)

इत्यादि । तच्च भावस्य दृढारूढप्रतिपत्त्यात्मनस्तत्तच्छब्दाद्यनुभवात्मनश्च वक्ष्यमाणस्य प्रा-

---

१ ख० ग० घ० पु० तत्तद्दशांशयोगेति पाठः ।

त्तिवशाद्भवति। एवमियज्ज्ञानपूर्वं प्राणे शून्ये च प्रशमितेऽपि आत्मतत्त्वस्यैतावदुत्तीर्णा शुद्धात्मदशानुभवरूपा, विद्यातत्त्वस्य चोन्मनाविश्रान्त्यात्मा, शिवतत्त्वस्यापि च परतत्त्वसमावेशरूपा व्याप्तिरवश्यं ज्ञेयेति, — इयत्प्रमेयपरिज्ञानमागमतोऽनुभवतश्च योजनायामुपयोगीत्याशयेनात्र वाक्ये ज्ञात्वेति द्विरुपात्तम् ॥ २३३ ॥

यथोद्दिष्टं निर्णेतुमाह

तद्विभागं प्रवक्ष्यामि
यथा ज्ञायेत तत्त्वतः ।

विभागो विभजनमसाधारणेन रूपेण विवेचनलक्षणम्। प्रकारभेदकथनमपि यथासंभवम्।

तं क्रमेणाह

षट्त्रिंशदङ्गुलश्चारो
हृत्पद्माद्यावशक्तितः ॥ २३४ ॥

तुटिषोडशमानेन
कालेन कलितः प्रिये ।

यावच्छब्दे तलोप ऐश्वरः । आद्येनार्धेन देशतो द्वितीयेन कालतश्चारप्रमाणमुक्तम् । शक्तिरिह भाविनीत्या समनान्ताभिप्रेता । तुटिश्चषकषड्भागरूपस्य प्राणापानवाहस्य द्वात्रिंशत्तमोऽशः ।

अथ प्राणसंचारमाह

संचरन्तं विभागेन
यथावत्तं शृणुष्व मे ॥ २३५ ॥

तमिति प्राणं ताल्वादिस्थानानुसारिणा विभागेन यथावत्स्वानुभवसाक्षिकं सम्यक् चरन्तं शृणु कथितमन्तर्निभालय ॥ २३५ ॥

हृत्पद्माद्यावदयनं
भागमेकं त्यजेत्तु सः ।
नासिकाग्रे द्वितीयं तु
शक्त्यन्ते तु तृतीयकम् ॥ २३६ ॥

तत्रस्थो विनिवर्तेत
यावत्तत्त्वं न विन्दति ।
विदिते तु परे तत्त्वे
तत्रस्थोऽपि न बाध्यते ॥२३७॥

एतच्छास्त्रप्रक्रियया मन्त्रोदयस्थानाद्धृत्पद्मात् प्रभृति । अयनमिति कालाधिकारवक्ष्यमाणया 'प्राणे दिनोदय' इति स्थित्या प्राणादित्यस्य मध्याह्नगताश्रयं तालुस्थानमष्टादशाङ्गुलान्तमिह विवक्षितम् । तच्च मायाग्रन्थ्यात्मकं रुद्रस्थानं दुर्भेदमित्यशिक्षिततदनुप्रवेशस्य तु मध्यनाड्या नासिकाग्रं भ्रूमध्यमैश्वरं स्थानं प्राप्नोति, एवमप्यभिन्नभ्रूग्रन्थेस्तस्मिन् नासिकाग्रे। द्वितीयमिति षडङ्गुलं भागं त्यजेत्, तत्प्रवेशमनासाद्य पार्श्वनाडीद्वयेन यावच्छिक्षिततदनुप्रवेशस्य तु शक्त्यन्तं ब्रह्मबिलपर्यन्तमाश्रयति, तथाप्यस्वीकृत[1]शाक्तबलस्य शक्त्यन्ते तस्मिंस्तृतीयं भागं द्वादशाङ्गुलं त्यजेत्, तत्रान्तरज्ञस्य ब्रह्मरन्ध्रेणाधः प्रसरेत्, एतदेव

१ ख० पु० अस्वात्मीकृतेति पाठः ।

तत्रस्थेत्यादिना श्लोकार्धेनोक्तमत एवासादितशाक्तबलः समग्रग्रन्थिसंचाराभिज्ञः परस्मिंस्तत्त्वे विदिते । तत्रेत्युक्तेषु[1] ग्रन्थिस्थानेष्वपि स्थितो न बाध्यते न देहादिप्रमातृतावैवश्यमेतीति यावत् । अतश्च परतत्त्वज्ञप्तिपर्यन्तः प्राणसंचारः शिक्षणीय इति पिण्डार्थः ॥ २३७ ॥

अत्रैव संचारे पारिभाषिकीः संज्ञा उद्घटयति

शक्त्या चाधो यदा गच्छे-
दबुधस्तु तदा भवेत् ।

शक्तिपर्यन्तेऽपि पदे लब्धे तत्त्वेऽनारोहात्[2] ।

यदा तु तदारोहाय

हृद्गतः पुनरुत्तिष्ठे-
द्बुध्यमानः स उच्यते ॥२३८॥

ततश्च

शक्तिं प्राप्य बुधो ज्ञेयः

१ ख० पु० तत्रत्यक्तेति पाठः । २ ख० पु० ग० पु० रोहणादिति पाठः ।

ततोऽपि शाक्तबललाभात् तत्त्वारोहयुक्तिज्ञस्य

व्यापिन्यंशे प्रबुद्धता ।

यदा तु ततोऽप्यूर्ध्वमारोहति तदा समनापर्यन्तमशेषमध्वानम्

अतीतः सुप्रबुद्धस्तु

परतत्त्वानुलाभात्। अबुद्धरूपतैवेति केचित् तदसत् तस्येह प्राकरणिकत्वेऽपि सुप्रबुद्धैकरूपत्वात्, अन्यथा गुरुत्वायोगात्।

अस्य च

उन्मनस्त्वं[1] तदा भवेत् ॥२३९॥

मनःसंस्कारस्यापि क्षयात् ॥ २३९ ॥

किंच

न कालो न कला चारो
न तत्त्वं नच कारणम्।
सुनिर्वाणं परं शुद्धं
गुरुपारम्परागतम् ॥ २४० ॥

---

१ ख० पु० उन्मनात्वमिति पाठः ।

तद्विदित्वा विमुच्येत
गत्वा भूयो न जायते ।

कालस्तुट्यादिः परार्धान्तः, कला निवृत्त्यादिका, चारः प्राणवाहः, तत्त्वं पृथिव्यादि, कारणं ब्रह्मादि, सुनिर्वाणमिति पराद्वयमयत्वात् अत एव परं शुद्धं शुद्धाशुद्धसदाशिवादिपदादपि प्रकर्षात् गुरूणां परम्परैव पारम्परं परभैरवतच्छक्तिसदाशिवेशा[1]नन्तश्रीकण्ठादिरूपं तत आगतम् । विदित्वेति अनुभूय, विमुच्यते इति जीवन्नेव विमुक्तः स्यात्, गत्वेति देहान्ते तदैकात्म्यमेति ॥

अथाध्वषट्कविभागमाह

अध्वषट्कं यथा प्राणे
संस्थितं कथयामि ते ॥२४१॥

आपादान्मूर्धपर्यन्तं
चितेः संवेदनं हि यत् ।

---

१ क० पु० ईशानानन्तेति पाठः ।

भुवनाध्वा स विज्ञेय-
स्तत्त्वाध्वा च तथैव हि ॥२४२॥

इह तस्य भावस्तननात्तत्त्वमिति व्युत्पत्त्या निरुक्त्या च विशेषनिष्ठः सामान्याभासः शरीरभुवनभावविरचनाहेतुः तत्त्वम् तदाभोगः शरीरभुवनादिर्यथा देहमृद्दारुपाषाणादौ काठिन्याभासः पृथिवीतत्त्वमेवमन्यत्। सामान्याभासश्च चिद्भित्तौ भाति परचिद्भूमौ च सर्वं चिदेकरसमिति न कोऽपि विभागस्ततः 'प्राक् संवित्प्राणे परिणता' इति न्यायात् प्राणसंकोचिन्यास्तस्याः प्राणत्वारोहेण देहमप्यश्नुवानायास्तत्त्वप्रतिभासरूपं स एव तत्त्वाध्वा घटते इत्यभिप्रेत्यापादान्मूर्धान्तं यच्चितेः संवेदनं तत्तत्काठिन्यादिप्रतिभासरूपं स एव तत्त्वाध्वा भुवनाध्वा चेत्युक्तम्। तत्त्वसत्तयैव च भुवनसत्तापि सौक्ष्म्येणानुमीयते। प्राणचारो हृदयाच्छत्त्यन्तं षट्त्रिंशदङ्गुल उक्तः। अध्वषट्कविभागस्तु प्रा-

णैकत्रेति समस्तदेहव्यापिसूक्ष्मप्राणमात्र एवोद्दिष्टो नतु प्राणचार इत्यापादादित्यादिका युक्तैवोक्तिः । तत्त्वानां चोद्देशान्ते श्रीमतङ्गेऽप्युक्तम् ॥

'तत्त्वं वस्तुपदं व्यक्तं स्फुटमाम्नायदर्शनात् ।
ततमेतेन वा यस्मात्तत्त्वं तत्त्वसंततौ ॥'

इति । तथा

'शिवाद्यवनिपर्यन्तो योऽयमध्वातिविस्तृतः ।
स समस्ताश्रितो ज्ञेयो नाशिवत्वाद्विमुच्यते ॥'

इति ॥ २४२ ॥

प्राणे कलाध्वस्थितिमाह

कलाकलितसंतानः
प्राणः संचरते सदा ।

कलाभिः कलितो व्याप्तः संतानः प्राणवाहो यस्य ॥

अस्य हि

निवृत्तिश्च प्रतिष्ठा च
अधोभागे प्रवर्तिके ॥ २४३ ॥

विद्या शान्तिस्तथा चोर्ध्वे
शान्त्यतीता त्वधिष्ठिका ।

'आ पादान्मूर्धपर्यन्तम्' इत्युक्त्वा समस्तदेहव्यापी सामान्यप्राणनारूपः प्राण उद्दिष्टो यस्य प्राणापानाद्यात्मिका विशिष्टा वृत्तयः, ततोऽधोभागप्रवर्तिके इत्यादिकं संगतमेव । ये तूर्ध्ववाहिप्राणाश्रयमेतत् इत्यभिप्रायेण अधोभागप्रवर्तिके इति पठित्वा अधोभागे प्रवृत्तिरवस्थितिर्विद्यते ययोरित्यादि श्लिष्टं व्याचक्षते, तेषां शक्त्या चाधो यदा गच्छेदिति (४।२३८) पूर्वोक्तं विस्मृतं, जडस्य च शक्त्यात्मककलाव्यापकत्वमुक्तं नतु विपर्यय इत्यास्तामेतत् । एवंप्रायं व्याख्यानं बहु असमञ्जसं टीकाकृतामस्ति तत्स्वयमेवान्वेष्टव्यं ग्रन्थगौरवभयात् प्रतिपदं नोन्मीलितं कियन्मात्रं तु दर्शितम् ॥

हेयहान्या शिष्याणामुपादेये धीः प्ररोहत्विति कलातीतं पदं निरूपयितुमाह

तदतीतः परो भावः

शान्त्यतीतामपि अतिक्रान्तः शुद्धात्मदशारूपः स्वभाव इत्यर्थः ।

अत एवोन्मनापरतत्त्वात्मकशक्तिशक्तिमत्सामरस्यात्मकम्

तदूर्ध्वं पदमव्ययम् ॥ २४४ ॥

यत्प्राप्त्यर्थमियान् शास्त्रसंरम्भः ॥ २४४ ॥

प्राणे निवृत्त्यादिकलास्थितिमुक्त्वा मन्त्रकलास्थितिमप्याह

एवं बिन्दुकला ज्ञेया
नादशक्त्यात्मिकाश्च याः ।
व्यापिन्याद्यात्मिका याश्च
व्याप्यव्यापकभेदतः ॥ २४५ ॥
प्राणैकसंस्थिताः सर्वाः

अकारोकारमकारात्मानः कलाः प्राणैः सर्वैरुच्चरन्त्य उपलभ्यन्ते, यास्तु बिन्द्वाद्याः समनान्ताः क्रमेण व्याप्यव्यापकभावेन[1] स्थि-

१ ख० पु० व्यापकत्वेनेति पाठः ।

ताः ताः सर्वाः प्राणे स्थिता ज्ञेयाः प्रयत्नेनानुभवितव्याः । बिन्दुनादव्यापिनीनां तिसृणां प्रधानतया इह उद्देशोऽर्धचन्द्रादिशक्तीनां यथायोगमेतदन्तर्भूतत्वेन प्राधान्यात् ।

अत एव

षट्त्यागात्सप्तमे लयः ।

सर्वोपलभ्या अकारोकारमकारकलाः, योगगम्यास्तु बिन्दुनादव्यापिन्य इत्यासां षण्णामपि त्यागात्परमयोगिनां सप्तमे परशक्तिमति परतत्त्व एव 'लयो' विश्रान्तिः कार्या ॥

एतदुपसंहृत्यान्यदवतारयति

कलाध्वैवं समाख्यातो
वर्णाध्वानं निबोध मे ॥२४६॥

तमाह

वर्णाः शब्दात्मकाः सर्वे
जगत्यस्मिंश्चराचरे ।
स्थिताः पञ्चाशता भेदैः
शास्त्रेष्वानन्त्यकोटिषु ॥२४७॥

शब्दात्प्राणः समाख्यात-
स्तस्माद्वर्णास्तु प्राणतः ।
उत्पद्यन्ते लयं यान्ति
यत्र शब्दो लयं गतः ॥२४८॥

आनन्त्येन कोटिसंख्येषु शास्त्रेषु पञ्चाशता भेदैर्मातृकारूपैः 'चरे' जङ्गमे वाग्वति 'अचरे' चान्तःसंज्ञे स्थावरे तत्तद्व्यक्तवाच्याक्षराद्यभिव्यञ्जके वर्णाः स्थिताः, ते च 'शब्दात्मकाः' शब्दनरूपाः, शब्दोऽपि प्राणनात्मा ध्वनिसतत्त्वश्च प्राणोऽत एवास्माद्ध्वनिरूपाद्वर्णा जायन्ते, यत्र च शब्दात्मा प्राणो लयं याति तत्रैव वर्णा लीयन्ते,—इति प्राणनात्मनि प्राण एव वर्णाध्वा स्थितः ॥ २४८ ॥

यतश्च वर्णानां प्राणस्य चैकत्र लयस्ततः

शब्दातीतो वरारोहे
तत्त्वेन सह युज्यते ।
युक्तः सर्वगतो देवि
धर्माधर्मविवर्जितः ॥ २४९ ॥

नाधो निरीक्षते[1] भूयः
शिवतत्त्वं गतो यदा ।

तत्त्वेन परमशिवेन सह 'युज्यते' ऐक्यमेति, अत एव सर्वगतो 'धर्माधर्माभ्यां' प्राणापानाभ्यां शुभाशुभाभ्यां च रहितः। अध इति इदन्तारूपो भेदः। यदेति यतः ॥

एतदुपपादयति

अधो वै यात्यधर्मेण
धर्मेणोर्ध्वं व्रजेत्पुनः ॥ २५० ॥
विज्ञानेन द्वयं त्यक्त्वा
सर्वगस्तु भवेदिह ।

अधर्मेणाशुभेनाधः स्थावरान्तमपानात्म[2]देहभूमिं, धर्मेण शुभेन देवयोन्यादितां, प्राणात्मना तु शक्त्यन्तं व्रजति। एतद्द्वयं तु विशिष्टेन शिवैक्यात्मविमर्शात्मना ज्ञानेन त्यक्त्वा इहेति देहावस्थितोऽपि सर्वगः शिवो भवति ॥

---

१ क० पु० निरीक्षित इति पाठः। २ ख० पु० अपानेनानात्मेति पाठः।

उपसंहरति

वर्णाध्वैवं समाख्यातः

अथ

पदाध्वा प्रोच्यतेऽधुना ॥२५१॥

एकाशीतिपदान्येव
विद्याराजस्थितान्यपि ।
वर्णात्मकानि तान्यत्र
वर्णाः प्राणात्मकाः स्थिताः २५२
तस्मादेवं पदान्यत्र
तानि प्राणक्रमेण तु ।

एकस्मिन्नपि विद्याराजे नवात्मन्येकाशीतिपदानि प्राग्विभक्तनीत्या यानि स्थितानि तान्यपीदानीमेव निर्णीतनीत्या वर्णात्मकानि, वर्णाश्च प्राणरूपास्तदात्मकत्वात् पदानाम् २५२

पदाध्वैवं समाख्यातः

अथात्र

मन्त्राध्वानं निबोध मे ॥२५३॥

तमाह

मन्त्रैकादशिका या तु
सा च हंसे व्यवस्थिता ।
पदैकादशिका सा च
प्राणे चरति नित्यशः ॥२५४॥

'हंसे' मध्यमे प्राणे नैष्कलवक्राङ्करूपा 'मन्त्रैकादशिका' स्थिता यस्मात् 'सा पदैकादशिका' नित्योच्चरन्निष्कलकलारूपविश्रान्तिहेतुर्ब्रह्मादिवाचकाकारादिसमनान्तपदरूपा । निर्णीतं चैतत्पूर्वमेव ॥ २५४ ॥

एतानि पदान्याह

अकारश्च उकारश्च
मकारो बिन्दुरेव च ।
अर्धचन्द्रो निरोधी च
नादो नादान्त एव च ॥२५५॥
शक्तिश्च व्यापिनी चैव
समनैकादशी स्मृता ।

निष्कलनाथेऽकारकला यादृश्यस्ति यादृशं चैतत्कलानां रूपं तददूर एव निर्णेष्यते॥२५५॥

एकादशिकाया अस्या अध्वरूपतां दर्शयितुमाह

उन्मना च ततोऽतीता
तदतीतं निरामयम् ॥ २५६ ॥

तत इति तां समनामतीता, तदतीतमिति तामुन्मनामतिशयेनेतं गतं तदभिन्नम् । उन्मनापरतत्त्वप्राप्तिहेतुत्वात्पदवर्णादीनामिव मन्त्राणामप्यध्वतेति यावत् ॥ २५६ ॥

उपसंहरति

मन्त्रा एवं स्थिताः प्राणे

बहिःस्थूलरूपस्याप्यध्वप्रपञ्चस्य मान्त्रिक[1]लोच्चारणे सूक्ष्मरूपतया मन्त्रोच्चिचारयिषा मन्त्रविश्रान्तिदशायोगे पररूपतया मन्त्रौपयिक एवोपलम्भो भवतीत्याशयेन पर्यन्ते मन्त्राध्वा निर्णीतः ॥

क्रमप्राप्तः

---

१ ग० घ० ङ० पु० मन्त्रकलोच्चारणेति पाठः ।

हंसोच्चारस्तथोच्यते ।

तमाह

हकारस्तु स्मृतः प्राणः
स्वप्रवृत्तो हलाकृतिः ॥२५७॥

योऽयं हलाकृतिरनच्को हकारोऽनाहतध्वन्यात्मा

'स्वयमुच्चरते देवि·········।' (स्व० ७।५८)

इति भाविनीत्या स्वप्रवृत्तः

'नादाख्यं यत्परं बीजं············।'

इति तन्त्रान्तरोक्तदृशा[1] सर्वस्य स्वतः स्फुरन् स एष प्राणः प्राणनापरपर्यायो जीवः स्मृतो गुरुपारम्पर्येणाविच्छेदेनाधीतः । अथ च धूलिभेदानुसारेण हलाकृतिरशेषं विश्वं गर्भीकृत्य कुण्डलिन्याकारः प्रसुप्तभुजगरूपः । 'स्वप्रवृत्तः' इति स्वयमेव नादामर्शरूपतां निमज्य प्राणात्मकं रूपमाविश्य स्थितः । यतः पारमेशी बोधाख्या शक्तिर्विश्वं गर्भीकृत्य परा कुण्डलिका सती विमर्शरूपतया नादात्मवर्णकुण्डलिका-

१ ख० पु० दिशेति पाठः ।

त्मना[1] स्फुरित्वान्तर्निमज्जितैतत्स्वरूपा प्राणकुण्डलिकात्मतया[2] भातीत्याम्नायः । एवं च व्याख्यातरूपः प्राण एव हंस ऊर्ध्वमधश्च स्वरसेन वहन् हानसमादानधर्मकहकारसकारविमर्शरूपतया स्फुरणात् ॥ २५७ ॥

अथात्रैव वर्णैः कारणत्यागं निर्णेष्यन् वर्णोच्चारं तावन्निरूपयति

अकारेण यदा युक्त
उकारचरणेन तु ।
मकारमात्रया युक्तो
वर्णोच्चारो भवेत्स्फुटः ॥२५८॥

योऽयं नादात्मनो हंसस्य नित्यप्रवृत्त उच्चारः स एव स्फुटो वर्णोच्चारो भवति, कथमकारेणानच्कहकारस्याभिव्यक्तिहेतुना शिरोरूपेण यदा युक्तस्तदा उकार एवोर्ध्वाधःसंचारकत्वाच्चरणरूपस्तेन तथा बिन्द्वादिप्रमे-

१ क० पु० त्मतयेति पाठः ।
२ ख० ग० पु० कारूपतयेति पाठः ।

यासूत्रकानुसाररूपमकारमात्रया यदा युक्तः, ईदृशो हि उच्चरन्नसौ सर्वैरुपलभ्यते ॥ २५८ ॥

अथ च

बिन्दुः शिरःसमायोगा-
त्सुस्वरत्वं[1] प्रपद्यते ।

उक्तरूपो वर्णोच्चार एव योगिनां भ्रूमध्येऽकारादिमात्रात्रयस्वीकृतनिःशेषभेदसंपिण्डिताविभागवेदनात्मकबिन्दुरूपतामाश्रित्य शिरःसमायोगादिति शिरसि ललाटस्थे प्रशाम्यद्वेद्यप्राधान्येऽर्धचन्द्रे प्रशान्तवेद्यप्रधानतया ऊर्ध्वोन्मुखत्वेन[2] स्पष्टरेखात्मनि अयोगिनो नादपथ[3]प्रवेशरोधकत्वान्निरोधिकासमाख्ये सम्यगासमन्तात् योगात्तत्तत्पदारोहात् सुस्वरत्वं[4] गुणीकृतवेद्यभेदप्रधानेश्वरपदं समस्तवाचकाविभेदविमर्शप्रधानान्नादनादान्तभूमिं गृह्णातीत्यर्थः ॥

---

१ ग० पु० सस्वरत्वमिति पाठः । २ ख० पु० उन्मुखेति पाठः ।
३ ख० ग० पदेति पाठः । ४ क० पु० सस्वरत्वमिति पाठः ।

अतश्चेयत्पदमारूढस्य

नादोऽस्य वदनं प्रोक्तः

यतः प्रोक्तनीत्यानाहतध्वनिपरमार्थोऽयं हंसस्ततो वर्णोच्चारात्मतादशायामपि ललाटमध्ये नाद एवास्य वदनमिव वदनं मुख्यमङ्गम् ॥

युक्तं चैतद्यतः

वदनं शब्दमीरयेत् ॥ २५९ ॥

नादरूपं वदनं कर्तृ शब्दं नादान्तात्मानमीरयेद्ब्रह्मरन्ध्रतले प्रेरयेत्तद्रूपतया स्फुरेत् ॥

न केवलमेवमयं नादात्मा प्राणः शिरोवदनचरणयुक्तो नर्दन्[1] हंस इत्युक्तो यावत्

अनेनैव च योगेन

हंसः पुरुष उच्यते ।

ब्रह्मविष्ण्वीशमार्गेण

चरन्वै सर्वजन्तुषु ॥ २६० ॥

१ ख० पु० प्रनदन् इति पाठः ।

पुरुषः क्षेत्रज्ञोऽनेनैव मध्योर्ध्वमार्गारोहणात्मना योगेन सर्वजन्तुषु हृत्कण्ठभ्रूमध्यललाटमार्गेण प्रसरन्नधरभूमिहानोर्ध्वपदसमादानरूपो हंस उच्यते । वक्ष्यति चाग्रे

'शिवो धर्मेण हंसस्तु सूर्यो हंसः प्रभान्वितः ।'
(स्व० ७ । २९)

इत्युपक्रम्य

'आत्मा वै हंस इत्युक्तः प्राणो हंससमन्वितः ॥'
(स्व० ७ । २९)

इति । एतच्च तत्रैव व्याख्यास्यामः ॥ २६० ॥

एवं नादान्तरूपतां गृहीत्वा

शक्तितत्त्वे लयं याति

नादान्तरूपतां प्रशमय्यानन्दस्पर्शात्मतां ब्रह्मबिले श्रयति ॥

ततोऽपि शिवपदसमाविविक्षावष्टम्भात्मना

विज्ञानेनोर्ध्वतां व्रजेत् ।

कथम्

व्यापिनीं समनां त्यक्त्वा
व्रजेदुन्मनया शिवम् ॥ २६१॥

शक्तौ स्पर्शमनुभूयोर्ध्वप्रवेशयुक्तया व्यापिन्यां स्वक्केशपदे व्याप्तिं लब्ध्वा तदूर्ध्वे शिखाकेशस्थाने सामनसे[1] पदे मन्तव्याभावान्मननमात्ररूपतया स्थित्वा ततोऽप्यूर्ध्वं हंसः शुद्धात्मरूपो मननोल्लङ्घनस्वभावो युगपदशेषविश्वाभेदप्रकाशात्मकोन्मनाशक्त्याश्रयेण शिवं व्रजेच्चिदानन्दघनपरभैरवसमापत्तिं श्रयेत् ॥ २६१ ॥

एवं च

शिवतत्त्वगतो हंसो
न चरेत्

शिवाख्यं तत्त्वं परमशिवो न चरेन्न संकोचेन प्रसरेत् ॥

अपि तु

व्यापको भवेत् ।

शिवादिक्षित्यन्ताशेषविश्वात्मना तदुत्तीर्णेन च रूपेण स्फुरेदित्यर्थः ॥

---

१ ख० पु० समरसे इति पाठः ।

उपसंहरति

हंसोच्चारः समाख्यातः

कारणैश्च समन्वितः ॥२६२॥

कारणैर्ब्रह्मादिभिः, चकारादकारादिवर्णैर्वस्तुगत्या संभवद्भिः सम्यगन्वितो मिश्रितः ॥

इदानीं वर्णैः कारणत्यागं निरूपयति, तत्र

हकारः प्राणशक्त्यात्मा

प्राणशक्तेरात्मोक्तस्थित्या जीवितरूपः ।

एतस्य शिरोरेखात्मा

अकारो ब्रह्मवाचकः ।

हृदि त्यागो भवेत्तस्य

वाचकोच्चारणान्त इति यावत् ॥

एवमुत्तरत्र

उकारो विष्णुवाचकः ॥२६३॥

कण्ठे त्यागो भवेत्तस्य

मकारो रुद्रवाचकः ।

तालुमध्ये त्यजेत्तं तु

त्यजेदिति कर्तृप्रत्ययस्तुशब्दश्च रौद्रग्रन्थ्युल्लङ्घनेऽवधातव्यमिति सूचयति ।

बिन्दुश्चैवेश्वरः स्वयम् ॥२६४॥

अभेदोक्त्याकारादिवदितःप्रभृति न पृथग्वाच्यवाचकतेति दर्शयति ।

त्यागस्तत्र भ्रुवोर्मध्ये

विधीयते इत्युत्तरस्थं संबध्यते । अर्धचन्द्रनिरोधिकान्तास्यैव व्याप्तिः ।

नादे वाच्यः सदाशिवः ।

तद्भेदेन विमृश्येत्यर्थः ॥

ललाटान्मूर्धपर्यन्तं
त्यागस्तस्य विधीयते ॥२६५॥

नादस्यैव नादान्तान्ता व्याप्तिर्विधीयते योगिभिर्यत्नेन क्रियते ॥ २६५ ॥

अथ याः सूक्ष्मानुभावगम्याः

शक्तिव्यापिनीसमना-
स्तासां वाच्यः शिवोऽव्ययः ।

सदाशिवापेक्षयायमव्ययः परमशिवापेक्षया तु सव्यय एव ॥

तत्र

मूर्धमध्ये त्यजेच्छक्तिं
तदूर्ध्वे व्यापिनीं त्यजेत् ॥२६६॥

व्याख्यातस्पर्शानुभूत्यन्ते इत्यर्थमेवं[1] व्याख्यातम् ॥ २६६ ॥

मननमात्ररूपानुभवान्ते

समनाम्

तदूर्ध्वे त्यजेदित्येवम् ॥

एवमियदध्वातिक्रान्त्या प्राप्तशुद्धात्मस्वरूपस्य योगिनः

उन्मनां त्यक्त्वा
षट्त्यागात्सप्तमे लयः ।

भवतीति शेषः । व्याख्यातरूपोन्मनाशक्त्यनुप्रवेशेन परमशिवीभाव एवोन्मनात्यागः। एवं च षण्णां ब्रह्मविष्णुरुद्रेश्वरसदाशिवशिवाख्यानां कारणानां त्यागाद्विश्रान्तिपूर्वमुल्ल-

१ क० पु० एवमाख्यातमननेतिपाठः ।

ङ्घनात् सप्तमे परमशिवे लयः समापत्ति-र्भवति ॥

एतदधिकावापेनोपसंहरति

सूक्ष्मसूक्ष्मतरैर्भावै-
रेवमेवं त्यजेत्प्रिये ॥ २६७ ॥
स्थूलस्थूलतरैर्भावै-
र्नानासिद्धिफलप्रदैः ।

अवरोहक्रमेण यथोक्तवाच्यवाचकात्मानो भावाः पदार्था ये वक्ष्यमाणयुक्त्या स्थूल-स्थूलतरास्तत्तत्सिद्धिप्रदाः स्थितास्तैरेवारोह-क्रमेण यथोत्तरं सूक्ष्मसूक्ष्मतरैरुपलक्षितम् । एवमिति सर्वमध्वानम्, एवमित्युक्तयुक्त्यैव त्य-जेत्, तैस्त्यज्यमानैरुपलक्षिता ये सूक्ष्मसूक्ष्म-तरा आरोहक्रमेण यथोत्तरं त एव तैः करणभूतैरेवमिति प्रदर्शितनीत्या एवमिति यथोक्तं त्यजेत् । स्थूलानां सिद्धौ सूक्ष्माणां मुक्तौ हेतुत्वमित्यधिकमत्रोपाक्षिप्तम् ॥ २६७ ॥

तत्र

सूक्ष्मोऽत्यन्तं परो भाव-
स्स्वभावः स विधीयते ॥२६८॥

परो भावः परा सत्ता परमशिवेऽत्यन्तं सूक्ष्मो विज्ञेयः सर्वकारणं चेत्यर्थः। स चाशेषभावप्रक्षयात्मकत्वादभावः ॥ २६८ ॥

नच स[1] एवेदृग्यावत्

उन्मना त्वपरो भावः

परभावापेक्षया स्वात्मविमर्शरूपतया किंचिदौन्मुख्यादुन्मना अपरो भावो महासत्तात्मा सूक्ष्मो भावोऽभावश्चेति समन्वयः ॥

स्थूलस्तस्यापरो मतः।

तस्योन्मनाख्यस्य स्वभावस्य यः संबन्धितया व्याप्यव्यापकरूपतया नतु ततःपृथक्त्वेनापरः समनाख्यस्तदपेक्षया स्थूलोऽकाराद्यपेक्षया तु सोऽपि सूक्ष्म एवान्यथा सूक्ष्मसूक्ष्मतरैरिति बहुवचनं न युज्यते ॥

---

१ ख० पु० त्रसौ इति पाठः।

तस्यापरं पुनः शून्यं

तस्येति समनात्मनो भावस्यापरं व्यापिनीरूपं शून्यमशेषभावासूत्रणरूपं महाशून्यमित्यर्थः । पुनःशब्देन समनात्मकं तावन्निःशेषभावाभावासूत्रणरूपमेकं शून्यमिदं तु सर्वभावाभावाभासनभित्तिकल्पं द्वितीयमित्युक्तम् ॥

अत एव च

संस्पर्शं च ततोऽपरम् ॥२६९॥

शक्तिपदमित्यर्थात् ॥ २६९ ॥

ततोऽपि

शब्दो

नादान्तात्मा नादरूपश्च ।

ततोऽपि

ज्योतिः

व्यापिनिरोधिकार्धचन्द्रपदो बिन्दुः ।

ततो मन्त्राः
कारणा भुवनानि च ।

मन्त्रा मकारोकाराकारवर्णपरामर्शात्मानो वाचकाः[1], तद्वाच्या रुद्रोपेन्द्रब्रह्माणः कारणानि तदाश्रयभूतानि च तत्त्वानि भुवनानि च क्रमेणात्यन्तं स्थूलतमानीत्यर्थः ।

तदाह

पञ्चभूतात्मभुवनं
कारणैः समधिष्ठितम् ॥२७०॥

पञ्च भूम्यादीनि स्थूलसूक्ष्मादिरूपतयात्मा कारणं यस्य भुवनस्य । मायाविद्यादिपदेऽपि हि भुवनानि सन्ति नच तत्र स्थूलभूतारब्धानि, तेषां च सूक्ष्मभूतारब्धानामपि स्वाधिष्ठातृकारणापेक्षया स्थूलत्वमेव, वस्तुतस्तु एषां भुवनादीनां शिवरूपत्वमेव । यथोक्तमन्यत्र

'भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च ।
बिन्दुनादादिसंभिन्नः षड्विधः शिव उच्यते ॥'

---

१ ख० पु० वर्णा इति पाठः ।

इति । आरुरुक्षून् प्रति तु स्थूलस्थूलतरैरित्याद्युक्तम् ॥ २७० ॥

यदुक्तं 'स्थूला भावाः सिद्धिदाः' इति तत्रोक्तक्रमप्रातिलोम्येन सिद्धिभेदं विभज्य दर्शयति

भुवनं चिन्तयेद्यस्तु
वक्ष्यमाणैकरूपकम् ।
भुवनेशत्वमाप्नोति

वक्ष्यमाणमिति भुवनाध्वनि भुवनेशत्वं कालाग्न्यादिरूपत्वम् ॥

यस्तु परो योगित्वादेतद्भुवनं वक्ष्यमाणं विग्रहाद्यपि शिवरूपतयैव पश्यति सः

शिवं ध्यात्वा तु तन्मयः ॥२७१॥

शिवस्य च चिदानन्दघनतयैव ध्यानं[1] नत्वाकारेण । अन्येषां तु

ब्रह्मादिकारणानां च
साधने विग्रहं स्मरन् ।

---

१ ख० पु० ध्यानं कृत्वेति पाठः ।

पूर्वोक्तलक्षणं यश्च
तन्मयत्वमवाप्नुयात् ॥ २७२ ॥

पूर्वमित्यासननिर्णयावसर उक्तं, यश्चेत्यत्र स इत्यध्याहार्यः ॥

मन्त्रैश्च मन्त्रसिद्धिस्तु
जपहोमार्चनाद्भवेत् ।

आराधितैरिति शेषः ॥

अतश्च जपादिना पूर्वमेव ये साधिता मन्त्रा अङ्गब्रह्माद्याः

पूर्वोक्तरूपकध्याना-
त्सिद्ध्यन्त्यत्र न संशयः ॥२७३॥

एषां पूर्वमेव ध्यानं, साधनफलं चाग्रे भविष्यति ॥ २७३ ॥

ज्योतिर्ध्यानात्तु योगीन्द्रो
योगसिद्धिमवाप्नुयात् ।

ज्योतिर्बिन्दुः। योगसिद्धिरतीतादिज्ञनाम् ॥

योगप्रकर्षात्तु

तन्मयत्वं यदाप्नोति
योगिनामधिपो भवेत् ॥२७४॥

अधिप इति भगवदीश्वररूपः ॥ २७४ ॥

शब्दध्यानाच्च शब्दात्मा
वाङ्मयापूरको भवेत् ।

शब्दो नादः ॥

स्पर्शध्यानाच्च स्पर्शात्मा
जगतः कारणं भवेत् ॥ २७५ ॥

स्पर्श आनन्दात्मा शक्तिगतस्तस्याधस्तनजगत्कारणत्वाज्जगतः कारणमित्युक्तम् ॥२७५॥

व्यापिनीपदे तु

शून्यध्यानाच्च शून्यात्मा
व्यापी सर्वगतो भवेत् ।
समनाध्यानयोगेन
योगी सर्वज्ञतां व्रजेत् ॥२७६॥

एवं स्थूलस्थूलतरादिभावापेक्षया सिद्धीः प्रतिपाद्य

'सूक्ष्मोऽत्यन्तं परो भावः' (स्व० ४।२६९)

इत्यादिप्रतिपादितदृशा[1]त्यन्तसूक्ष्मोन्मनापरतत्त्वध्यानं मुक्तिप्रदमित्यादिशति

उन्मन्यां[2] तु परं सूक्ष्म-
मभावं भावयेत्सदा ।

उन्मन्यां[3] समवायिन्या शक्त्या सह परं पूर्वोक्तशिवतत्त्वरूपमभावं भावयेत् ॥

अभावं व्याचष्टे

सर्वेन्द्रियमनोतीत-
स्त्वलक्ष्योऽभाव उच्यते २७७॥

सर्वाणीन्द्रियाणि मनश्चातीतोऽतिनिष्क्रान्तः समनापदादूर्ध्वस्य वेदित्रेकरूपत्वात् अत एवालक्ष्यः, अतश्च न विद्यन्ते वेद्यादिरूपा भावा यत्रेति व्युत्पत्त्याभाव उच्यते, वस्तुतस्त्वसौ चिदानन्दघन एव ॥ २७७॥

---

१ ख० पु० दिशेति पाठः । २ ग० घ० ङ० पु० उन्मनेति पाठः ।
३ ख० ग० उन्मनेति पाठः ।

ननु यद्ययमीदृशस्तत्कथमुक्तम् 'अभावं भावयेत्सदा' इत्याशङ्क्याह

अभावं भाव्यं भावेन
भावं कृत्वा निराश्रयम् ।

न विद्यन्ते भावा यस्मिंस्तदभावरूपं पदं भावेन परसत्तात्मना चिन्मयेन रूपेण भाव्यं भावनीयम् । ननु चित्तत्त्वं भावकं तत्कथं भाव्यमुच्यते भावं कृत्वा निराश्रयमिति । भवतीति भावः सदाशिवादिः क्षित्यन्तः तं निराश्रयं निरालम्बनं प्रशान्तरूपतया शक्तिधामानुप्रवेशेन [1]तन्मयीकृत्य ॥

इत्थं च

सर्वोपाधिविनिर्मुक्त-
मभावं लभते पदम् ॥ २७८ ॥

उपसंहरति

एष ते[2] कारणत्यागः

१ ख० ग० उन्मनीकृत्येति पाठः । २ क० ख० मे इति पाठः ।

कारणत्यागेऽर्थाक्षिप्तं कालत्यागमाह

कालत्यागं निबोध मे ।

स च

तुटिषोडशसंयुक्तः
प्राणस्तु समुदाहृतः ॥ २७९ ॥

तस्य च

तुटिद्वयं समाश्रित्य
एकैको भैरवः स्थितः ।

द्वितीयावरणनिष्ठः कपालीशभैरवादिः ॥

अस्मिंश्च

अहोरात्रविभागेन
कुर्वन्त्युदयमेव ते ॥ २८० ॥

यथाह्नि प्राणेऽष्टावुद्यन्त्येवं रात्रौ अपानेऽपि ॥ २८० ॥

एषां व्यापकः

नवमस्तु परो देवः

पर इत्यष्टानां पूरको व्यापकः प्रकृष्टश्च श्रीस्वच्छन्दनाथः ॥

एतदीयान्महाप्रकाशात्मनो व्यापकात्
तेजसस्तूद्यन्ति ते ।

तद्भित्तावेव स्फुरन्तीत्यर्थः अतश्च प्राणोदये तदविनाभाविनि बाह्यान्तरनीलसुखादिज्ञाने तद्विकल्पनेऽपि वा परभैरवविकासमया एव महायोगिनो नतु कदाचित् क्वचिदपि खण्ड्यन्ते प्रत्युत स्वात्मविकासेन सततं मण्ड्यन्ते इति सरहस्यार्थोऽत्र कटाक्षितः ॥

एवं स्थिते सति

सर्वं कालं त्यजेत्प्राणे
यथावत्कथयामि ते ॥ २८१ ॥

तत्र

तुटयः षोडशैवोक्ताः
कालस्य करणं तु ताः ।
तदादिः संस्थितः कालः
सर्वं चरति वाङ्मयम् ॥२८२॥

करणं तु ता इति प्राणारम्भद्वारेण ताभिः सर्वस्य कालस्योत्थापनात् । तदादिरिति

'क्षणद्वयं त्रुटिः प्रोक्ता ।' (स्व० ११।१९९)

इति भाविनीत्या यद्यपि क्षणादिः काल-स्तथापि

'मानुषाक्षिनिमेषस्याष्टमोऽशः क्षणः ।' (११।२००)

इति भाविवाक्येनैव लक्ष्यस्यानुमेयत्वमुक्त-मिति न तस्य सावधानैरपि त्रुटिवत् स्फुट-संवेद्यत्वमित्येवमुक्तं सर्वं चरति वाङ्मयमिति प्राणोच्चारोच्चरन्मातृकाख्यातिद्वारेण समस्तं वाचकराशिं तद्द्वारेण च वाच्यनियममपि व्याप्नोति ॥ २८२ ॥

तदादिरित्युक्तं विभजति

तुटिर्लवो निमेषश्च
काष्ठा चैव कला तथा ।
मुहूर्तश्चाप्यहोरात्रः
पक्षो मास ऋतुस्तथा ॥२८३॥
अयनं वत्सरश्चैव
युगं मन्वन्तरं तथा ।
कल्पश्चैव महाकल्पः

'तुर्याद्यः षोडश' इति, वक्ष्यमाणौ च द्वौ एकादशपटले निर्णेष्यन्ते ।

'महाकल्पस्य पर्यन्ते ब्रह्मा याति परं लयम् ।' (११।२६०)

इति एषोऽत्र महाकल्पो न ग्रा¹ह्योऽसंगतेः अपितु सदाशिवजीवितावध्यात्मा परममहाकल्पः ॥

यदाह

शक्त्यन्ते तं परित्यजेत् ॥२८४॥

शक्त्यन्तर्भावानुप्रवेशान्ते सूक्ष्मदृशा सदाशिवान्तकारणपञ्चकोपसंहारी कालः प्रशाम्यतीत्यर्थः ॥ २८४ ॥

अथ

व्यापिन्यन्ते परः कालः

स तदङ्गी

स परममहाकल्पोऽङ्गमवयवः तेनाङ्गी पर इति साम्याख्यः । यद्वक्ष्यति

'स कालः साम्यसंज्ञो वै........।' (११।३०४)

इति ॥

---

१ क० पु० कार्य इति पाठः ।

त्यजेत्तु तम्।

तं च समनानुभवदशायां परित्यजेत्॥

पूर्वप्रकारापेक्षया च

स च सप्तदशो ज्ञेयः

ततोऽपि

परार्धपरतः स्थितः॥ २८५॥

सोऽपि चाष्टादशो देवि

समनान्ते तु तं त्यजेत्।

समनानुभवपर्यन्ते उन्मनान्तर्भावे त्यजेत् प्रशमयेत्॥ २८५॥

एवमेक[2]प्राणोच्चारेणैव बहिर्विततमपि परार्धान्तं कालं गुरुप्रवरः प्रशमय्य अकालकलिते पदे स्थितिं बध्नीयात्। तदाह

सर्वकालं तु कालस्य

व्यापकः परमोऽव्ययः॥२८६॥

उन्मन्यन्ते परे योज्यो

न कालस्तत्र विद्यते।

२ ख० पु० एवमेव प्राणेति पाठः।

कालस्येति परार्धान्तस्य, सर्वकालं नित्योदितत्वेन व्यापकः, अत एव परमोऽव्ययश्च उन्मन्यन्ते परे शक्तिशक्तिमदनुभवावेशे योज्यः सामरस्येन प्रत्यभिज्ञेयः । तत्र च कलनात्मा कालो नास्ति तस्यैव विश्वकलनाकारित्वान्न तं कश्चित्कलयतीत्यर्थः ॥ २८६ ॥

अत एवासौ

नित्यो नित्योदितो व्यापी

नित्योदित इति न केनचिदाच्छादितः इत्यर्थः ॥

तं च सर्वोपरिवर्तित्वात्

आदिरूपं न संत्यजेत् ॥२८७॥

तमेव दृढावष्टम्भयुक्त्या श्रयेत् ॥

एवं च सति

तं च नित्योदितं प्राप्य

तन्मयो जायते सदा ।

योगीन्द्र इति शेषः ॥

एवं च कारणत्यागानान्तरीयकः कालत्यागो निर्णीत इत्याह

कालत्यागो भवेदेवं
उद्देशक्रमायातः
शून्यभावस्त्वथोच्यते ॥२८८॥

शून्यो रूपो भावः पदार्थः परशून्यपदप्राप्त्युपायभूत इत्यर्थः ॥ २८८ ॥

तमाह

ऊर्ध्वशून्यमधःशून्यं
मध्यशून्यं तृतीयकम् ।

'चतुर्थं व्यापिनीशून्यं............... ।' (४।२८९)

इति वक्ष्यमाणत्वात् ऊर्ध्वशून्यमत्र नादान्तान्तनिःशेषपाशप्रशमभूः शक्तिपदम्, अधःशून्यमनुल्लसितप्रपञ्चं हृत्क्षेत्रं, मध्यशून्यं तु क्रमेणाधस्तनप्रमेयप्रशमात्मकं कण्ठतालुभ्रूमध्यललाटमूर्धरन्ध्रात्मकम् ।

इत्थं च

शून्यत्रयं चलं ह्येत-
त्तदधो मध्य ऊर्ध्वतः ॥२८९॥

तदेतत् क्रमेणाधो मध्य ऊर्ध्वतः स्थितं शून्यत्रयमापेक्षिकत्वाद्धेयमित्यर्थः ॥ २८९ ॥

किंच

चतुर्थं व्यापिनीशून्यं
समनायां च पञ्चमम् ।
उन्मनायां तथा षष्ठं

अत्रापि आपेक्षिकत्वाच्चलं ह्येतदिति योज्यम् ।

अतश्च

षडेते सामयाः स्थिताः ॥२९०॥

आमयपदेनात्र हेयत्वमुपलक्ष्यते तेन चलत्वात् एते हेया इत्यर्थः । उन्मनाया अपि परतत्त्वापेक्षया किंचिच्चलत्वमस्ति । परतत्त्वस्यैव तु अविचलत्वादुपादेयत्वम् ॥ २९० ॥

अत एवैते

तत्त्वेनाधिष्ठिताः सर्वे
सामया अपि सिद्धिदाः ।

तत्त्वं परमशिवः अधिष्ठितिर्व्याप्तिः । सिद्धिरत्र परयोगिनः पूर्णानन्दघनात्मैव इतरस्य तु तत्तत्स्वप्नपदो[1]चिता ॥

अत एव

षट् शून्यानि परित्यज्य
सप्तमे तु लयं कुरु ॥ २९१ ॥

यतः

तच्छून्यं तु परं सूक्ष्मं
सर्वावस्थाविवर्जितम् ।

परं सूक्ष्ममिति निर्णीतं प्राक् । उन्मनाया अपि

'..........शैवी मुखमिहोच्यते ।' (वि०भै०श्लो०२०)

इति न्यायात् परमपदप्रविविक्षुर्योग्या[क्षुयोग्या]शयेन परतत्त्वानुप्रवेशोपायत्वात् अवस्थात्व-

---

१ ग० पु० प्रचोदितेति पाठः ।

मस्तीति कृत्वा सर्वावस्थाविवर्जितमवस्थात्रयैकरूपं परमेव तत्त्वम् ॥

एवं चेत् कथं शून्यमित्याह

अशून्यं शून्यमित्युक्तं
शून्यं चाभाव उच्यते ॥२९२॥
अभावः स समुद्दिष्टो
यत्र भावाः क्षयं गताः ।

यदेतच्छून्यमित्युक्तं तद्वस्तुतोऽशून्यं चिदानन्दघनपरमशिवतत्त्वम् । अत्र हेतुः शून्यमिति । चो ह्यर्थे । यस्मात् शून्यमभाव उच्यते, अभावश्च न विद्यते भावः सर्वः प्रमेयादिप्रपञ्चो यत्रेति व्युत्पत्त्या इह चित्तत्त्वमेवोद्दिष्टं[1] तस्मादशून्यमेव शून्यमिति युक्तमुक्तम् ॥

अत एव तत्

सत्तामात्रं

महासत्तारूपं प्रकाशात्मैव हि सर्वेषां भावाभावानां सत्ता ॥

१ ख० पु० निर्दिष्टमिति पाठः ।

निःशेषभेदप्रशमात्तु
परं शान्तं
तत्पदं किमपि स्थितम् ॥२९३॥

लोकोत्तरमित्यर्थः ॥ २९३ ॥

नच विश्वोत्तीर्णरूपमेव एतद्यावद्विश्वमय-मपीत्याह

यत्र यत्र च नादादि-
स्थूला अन्येऽपि संस्थिताः ।
तत्र तत्र परं शून्यं
सर्वं व्याप्य व्यवस्थितम् २९४

नाद आदिर्येषां बिन्द्वादीनां नादस्य चा-द्यः शक्तिव्यापिन्याद्याः यत्र यत्र ललाटा-दिक्षेत्रे अन्येऽपि स्थूलाः नादादिवाच्याः सदाशिवाद्यास्तदधिष्ठिताश्च तत्तत्त्वभुवना-द्यो यत्रान्तर्बहिर्वा संस्थिताः तत्र सर्वत्र परं सत्तामात्ररूपं शून्यं सर्वमिदं शर्करारसवत् तिलशोंऽशमंशं व्याप्य विचित्रेण रूपेणा-वस्थितम् ॥ २९४ ॥

१ ख० ग० लयादीति पाठः ।

व्यापकमेव च व्याप्यात्मतया स्फुरति नतु व्याप्यं नामान्यदित्याह

तदेव भवति स्थूलं
स्थूलोपाधिवशात्प्रिये ।

महाप्रकाशात्मा श्रीस्वतंत्रनाथः[1] स्वस्वातन्त्र्येणैव यतः स्थूलाभासतया स्फुरति[2] ततस्तदुपाधिवशात् स्थूलमुच्यते इत्यर्थः ॥

इत्थं च

स्थूलसूक्ष्मप्रभेदेन
तदेकं संव्यवस्थितम् ॥२९५॥

अत एव यस्येयतीं धारामारूढा संविन्महायोगिनः स

तत्प्राप्य तन्मयत्वं च
लभते नात्र संशयः ।

प्राप्येति दृढप्रतिपत्त्यावलम्ब्य न संशयः इति तत्त्वमेवैतन्मन्तव्यं न तु [3]जडजनसुलभः

---

१ ख० पु० स्वच्छन्देति पाठः ।
२ ख० ग० सरति इति पाठः ।
३ ख० पु० मूढ इति पाठः ।

संशयोऽत्र कार्यः । यस्त्वियति रहस्येऽर्थे न समाश्वस्तस्तदपेक्षया कारणत्यागाद्युक्तम् ॥

शून्यमुपसंहृत्यैतदुचितानुक्रमं समरसमवतारयति

शून्यभावः समाख्यातः
सामरस्यं निबोध मे ॥ २९६ ॥
समो रसो यस्मिन् स समरसो लोलीभावः[1] ॥ २९६ ॥

तद्भेदानुद्दिशति

आत्मन्येकः समरसो
मन्त्रे[2] ज्ञेयो द्वितीयकः ।
तृतीयं नाडिगं कुर्या-
च्छक्तौ कुर्याच्चतुर्थकम् ॥२९७॥
व्यापिन्यां पञ्चमं प्रोक्तं
समनायां तु षष्ठकम् ।
तात्त्वः समरसो देवि
सप्तमस्तु विधीयते ॥ २९८ ॥

---

१ ख० पु० लोलीभाव इति, ग० पु० समरसस्तद्भाव इति पाठः ।

२ ख० पु० मन्त्रः इति पाठः ।

एतान्यथोद्देशं लक्षयति

शिष्यात्मानं तु संगृह्य
पूर्वोक्तविधिना क्रमात् ।
पश्चादात्मनि संयोज्य
लोलीभूतं विचिन्तयेत् ॥२९९॥

आत्मानं पुर्यष्टकसंविदं पूर्वोक्तविधिनेति ताडनच्छेदनादिपूर्वमात्मनि चैतन्यमात्रे संयोज्याविकल्पं विमृश्य तद्विश्रान्त्यैव समरसीकुर्यात् ॥ २९९ ॥

अत्रैवेतिकर्तव्यतांशं[1] पूरयन्नाडिमन्त्रसामरस्ये निर्दिशति तत्र शिष्यात्मनो ग्रहणार्थम्

पूरकं कुम्भकं कृत्वा
समानेन निरोधयेत्

कुम्भकप्रकर्षाल्लब्धबलेन समानेन निरोधयेदित्याक्रामेदर्थात्सर्वनाडीः ॥

यदाह

यावत्यो नाड्यो देवि
तिर्यगूर्ध्वमधःस्थिताः ॥ ३०० ॥

१ क० पु० कर्तव्यांशमिति पाठः ।

समानेन समाकृष्टा
एकीभूता भवन्ति ताः।

तदित्थं कुम्भकप्रकर्षेऽवस्थितस्य

तासु ये वायवस्तेऽपि
प्राणे समरसीगताः ॥ ३०१ ॥

नाडयस्तु सुषुम्नाया-
मेकीभूता व्यवस्थिताः।

भवन्तीति शेषः ॥ ३०१ ॥

इत्थं नाडिसामरस्यपूर्वं मन्त्रसामरस्यं भवति। तदाह

ततो वै उच्चरेन्मन्त्रः

उदित्यूर्ध्वमवहितस्य चरेत् स्वयमेव प्रसरेत् ॥

उच्चरन्तं च तं सादाख्ये पदेऽव्यक्तध्वन्यात्मनि

नादे लीनं विचिन्तयेत् ॥३०२

१ ख० पु० वस्थितेति पाठः।

उपसंहरति

मन्त्र आत्मा तथा नाडी
एवं समरसीभवेत् ।
वामदक्षिणमध्ये तु

युगपदेवेत्थं मन्त्रादिसामरस्ये वृत्ते

ततो नादं प्रमोचयेत् ॥३०३॥
सेतुबन्धं च तं मार्गं
यत्र गत्वा न जायते ।

शक्तिव्यापिनीसमनोन्मनारूपसेतुबन्धात्मकं मार्गं सर्वाध्वपारवर्तिशिवपदप्रापकं पन्थानं नादं मोचयेत् गमयेत् । तद्गतौ च सत्यां न संसरति । मुचेर्गत्यर्थविवक्षया द्विकर्मता ॥

अत्र च कारणसामरस्यमर्थसिद्धमित्याह

ब्रह्मा विष्णुश्च रुद्रश्च
ईश्वरः शिव एव च ॥ ३०४॥
एतेऽत्र समतां यान्ति

यदा त्वकारोकाराद्युच्चारै[1]र्हृत्कण्ठादौ विश्रान्तिस्तदा

---

[1] ग० पु० उच्चारे इति पाठः ।

अन्यथा तु पृथक् पृथक् ।

समनन्तरोक्तसेतुगतौ सामरस्यान्तराणि स्थितानि लक्षयति

तस्मिन्समुच्चरेन्नादं
यावच्छक्तौ लयं गतः ॥३०५॥
शक्तिमध्यगतो नादः
शक्त्यात्मा तु विधीयते ।
सर्वं शक्तिमयं तत्र
सर्वं समरसीभवेत् ॥ ३०६ ॥

तस्मिन्निति पूर्वोक्ते सेतुबन्धे सर्वमिति नादे समरसीभूतमात्ममन्त्रनाडिकारणरूपम् ॥

तदेतच्छक्त्यैक्यमाप्य
तदूर्ध्वं व्यापिनीं प्राप्य
सर्वं तन्मयतां व्रजेत् ।

सर्वं प्राप्तव्यापिन्यभेदम् ॥

समन्ताद्व्याप्नुयाद्यस्मा-
द्व्यापिनीत्यभिधीयते ॥ ३०७ ॥

ततश्च

तदूर्ध्वं समनां व्याप्य
तन्मयत्वं व्रजेत्पुनः ।

तत्र च

सा च सर्वगता ज्ञेया
सामरस्येन संस्थिता ॥ ३०८ ॥

चशब्द एवार्थे, सैव तत्र सर्वगता सर्वावबोद्धव्येत्यर्थः । गमिरत्र ज्ञानार्थः ॥ ३०८ ॥

तदित्थम्

षष्ठं समरसं त्यक्त्वा
सप्तमं तु ततो व्रजेत् ।

उन्मनाशक्त्यनुप्रवेशेन प्राप्नुयात् ॥

तं प्राप्य तन्मयत्वं हि
नात्र कार्या विचारणा ॥३०९॥

यश्चेत्थं प्राप्तपरसामरस्यः

स च सर्वेषु भूतेषु
भावतत्त्वेन्द्रियेषु च ।
स्थावरं जङ्गमं चैव
चेतनाचेतनस्थितम् ॥ ३१० ॥
अध्वानं व्याप्य सर्वं तु
सामरस्येन संस्थितः ।

स चेति स एव स्थावरमचेतनं जङ्गमं सचेतनं चेति संक्षेपेण द्विधा स्थितं षड्विधमध्वानं व्याप्य तदन्तर्वर्तिषु सर्वेष्विति देवयोन्यादिषु चतुर्दशसु भूतेषु भावेषु धर्मादिषु घटादिषु च तत्त्वेषु पृथिव्यादिषु भोगसाधनेषु चेन्द्रियेषु सामरस्येन स्थितः सर्वास्ववस्थासु अविलुप्तपरभैरवसमापत्तिः । एषैव च निर्व्युत्थानसमाध्यात्मा महारहस्यभूता ॥

अध्यासितसमाधिषु तु
प्रसह्य चञ्चलीत्येव
योगिनामपि यन्मनः ॥ ३११ ॥

१ ख० ग० ङ० पु० प्राप्येति पाठः ।

कुटिलं चलति भोगाभिलाषेण व्युत्थानमेव धावति नाभीष्टं पदमवष्टभ्नाति, यदिति यस्मादेवम् ॥ ३११ ॥

ततः

यस्य ज्ञेयमयो भावः
स्थिरः पूर्णः समन्ततः ।
मनो न चलते तस्य
सर्वावस्थागतस्य तु[1] ॥ ३१२ ॥

ज्ञेयं च यथा व्याख्यातं परतत्त्वं, भाव आशयः, स्थिरो निश्चलः; पूर्णो निराकाङ्क्षः, समन्ततः सर्वसार्विकया, तुरप्यर्थे ॥ ३१२ ॥

ईदृशस्य महायोगिनः

यत्र यत्र मनो याति
ज्ञेयं तत्रैव चिन्तयेत् ।
चलित्वा यास्यते कुत्र
सर्वं शिवमयं यतः ॥ ३१३ ॥

---

१ ग० पु० चेति पाठः ।

मन एव परतत्त्वैक्यभावनावासितं कर्तृ यथोक्तं ज्ञेयं सर्वत्र चिन्तयत्येव । तदुक्तं महागुरुभिः

'शिवभावनयौषध्या बद्धे मनसि संस्कृतेः ।
काष्ठकुड्यादिषु क्षिप्ते रसवच्छिवहेमता ॥'
(शि० दृ० ७।४८)

इति ॥ ३१३ ॥

एतदेव द्रढयति

विषयेषु च सर्वेषु
इन्द्रियार्थेषु च स्थितः ।
यत्र यत्र निरूप्येत
नाशिवं विद्यते क्वचित् ॥३१४॥

इन्द्रियाणि चार्थश्चैन्द्रियकं प्रयोजनं विषयोपभोगस्तेषु स्थितो योगिवरो यो निरूप्येत विचार्येत यत्र कुत्रापि नास्याशिवमस्ति सर्वस्यास्य प्रकाशमानतया प्रकाशघनशिवैकात्म्यात् ॥ ३१४ ॥

---

१ ख० पु० भावितमिति पाठः ।

एवं समरसं ज्ञात्वा
नासौ मुह्येत् कदाचन ।

मितयोगिनो व्युत्थाने मुह्यन्त्येवेति कदाचनपदस्याशयः॥

अतश्च

यस्यैवं सर्वतो भावः
सोऽपि सर्वगतो भवेत् ॥३१५॥

शिवस्तावत्सर्वगत इति नास्त्यत्र विमतिः, यस्य त्वेवं शिवैक्येन भाव आशयः सर्वगतः सोऽपि सर्वगतो भवेत् महाव्याप्तिमनुभवत्येव ॥

एतदुपसंहृत्य एतत्पूर्वकक्ष्याभावि अनुद्दिष्टमपि विषुवत्स्वरूपं निरूपयति

एवं समरसः प्रोक्तो
विषुवत्तु निबोध मे ।

तद्विभजति

प्रथमं प्राणविषुव-
न्मान्त्रं ज्ञेयं द्वितीयकम्॥३१६॥

तृतीयं नाडिविषुव-
त्प्रशान्तं च चतुर्थकम्।
पञ्चमं शक्तिविषुव-
त्षष्ठं वै काल उच्यते ॥३१७॥
सप्तम तत्त्वविषुवत्

विषुं साम्यरूपां व्याप्तिमर्हतीति विषुवत्॥

एवं विभक्तस्यास्य
प्रविभागस्त्वथोच्यते।

प्रकर्षेण विभज्यतेऽन्यपरिहारेण व्यवस्थाप्यते वस्तु येन स प्रविभागो लक्षणम्।

तत्र

आत्मानं च मनः प्राणे
संयोज्य विषुवद्भवेत्॥ ३१८॥

शिष्यसत्कमात्मानमात्मीयं च मनः प्राणे मध्यवाहिनि सम्यगित्युक्तवक्ष्यमाणकरणयुक्त्या योजयित्वा प्राणविषुवद्भवति ॥३१८॥

एवं

प्राणे विषुवदाख्यातं

अथ

मान्त्रं विषुवदुच्यते ।

मन्त्रमुच्चारयेत्ताव-

द्यावन्नान्यमना भवेत् ॥३१९॥

परापरविभागेन

मन्त्रात्मा तु तदुच्यते ।

मन्त्रं श्रीनिष्कलं, परापरेति नादान्तम-परम् उन्मनान्तं तु परम् ॥

मान्त्रं विषुवदित्युक्तं

मन्त्रोच्चाराश्रयो नाडिरतः

नाडिस्थं तन्निबोध मे ॥ ३२० ॥

सर्वासामेव नाडीनां

मध्ये या संव्यवस्थिता ।

सुषुम्ना नाम सा ज्ञेया

नाभेः शक्त्या शिवं गता ३२१

आ नाभेः नाभेरारभ्य शक्त्या शक्त्यनुभवानुप्रवेशेन शिवं गता परं तत्त्वं प्राप्ता[1] ॥

एवं स्थिते

तत्र प्रवाहयेन्नादम्

नादमव्यक्तध्वनिरूपं प्रकर्षेण वाहयेदकारादिसंयोगेन ऊर्ध्वं प्रापयेत् ॥

तदेतत्सर्वनाडीसाम्यात्मकम्
नाडीविषुवदुच्यते ।

उच्यते उक्तमित्यर्थः ॥

क्रमप्राप्तं तु

प्रशान्तं विषुवच्चैव-
मधुना कथयामि ते ॥ ३२२ ॥

तदाह

अयने[2] षडङ्गुलश्चारः
कारणान्यङ्गुलेऽङ्गुले ।
तान्यधस्तात्परित्यज्य
कारणानि षडेव तु ॥ ३२३ ॥

---

१ क० पु० व्याप्तेति पाठः । २ ख० पु० भयं षडिति पाठः ।

सप्तमे तु प्रशान्तं वै
प्रशान्तेन्द्रियगोचरम् ।

विषुवदिति शेषः । षट्त्रिंशदङ्गुले चारे कालाधिकारस्थित्या हृदयात्प्रभृति मकरादिराशिसंचाररूपेषु अयनेषु प्रत्येकं षडङ्गुलश्चारः, तत्र च प्रतिषट्कं षट्कारणान्यङ्गुलेऽङ्गुले इति षष्ठे षष्ठे इति यावत् । एवं यानि प्रपञ्चव्याप्त्या षट्कारणानि अधस्तात् स्थितानि तानि त्यक्त्वा सप्तमे परमकारणे कारणानां साम्यावस्थितिरूपात् प्रशमात्[1] प्रशान्तविषुवद्भवतीति विशेषः ॥

प्रशान्तं व्याचष्टे

प्रशान्तः स्तिमितो ज्ञेयः
स्तिमितो निश्चलः स्मृतः ३२४

निश्चलो निस्तरङ्गश्च
स्थिरः पूर्णः समन्ततः ।

भेदतरङ्गशान्त्या चिद्घनतैव प्रशान्त इति निस्तरङ्गपूर्णपदाशयः ॥

---

१ ख० पु० प्रथमादिति पाठः ।

एवंभावं समास्थाय
दीक्षा कार्या तु दैशिकैः ३२५

प्रशान्तविषुवति विश्रम्येत्यर्थः ।

एतत्प्रशान्तविषुवत्

अथ

शक्त्युपाधिं निबोध मे ।
शक्तिमध्यगतो नादो
नादोर्ध्वं च चरेद्यदा ॥ ३२६ ॥
तावत्तु शक्तिविषुवत्

शक्तिमध्यगतो मध्यधामारूढः नादोऽव्यक्तध्वनिः नादात्सदाशिवपदादूर्ध्वं शक्तिस्थानं यदा चरेत् यदा मध्यस्थस्तदा शक्तिविषुवत् ॥

कालाख्यं तु निबोध मे ।

तदर्थमाह

तुटिः षोडशका या तु
प्राणान्ते संव्यवस्थिता ॥३२७॥

कालो भ्रूक्षेपमात्रस्तु
तत्रान्ते कीर्तितो मया ।
तं परापरभागेन[1]
पुनरेव त्रिधा कुरु ॥ ३२८ ॥

प्राणस्यान्ते या षोडशी तुटिः तत्र तस्यामन्तेऽर्धतुटिरूपे भ्रूक्षेपमात्रोऽत्यन्तसूक्ष्मसाष्टभागाङ्गुलचारसंचारात्मा यः कालः तमेकं त्रिधा अपरेण परेण परापरेण[2] च भागेन कुरु तुटेरर्धीकृतायाः त्रिधा विभजनमिति पुनःशब्दार्थः ॥ ३२८ ॥

तत्र

अपरः षोडशो यावत्

षोडशः पूर्वोक्तो महाकल्पाख्यो यावदपरः स्थूलः ॥

कालः सप्तदशः परः ।

पराख्ययैव पूर्वं निर्दिष्टः ॥

---

१ ग० पु० भावेनेति पाठः । २ क० ग० पु० परात्परेति पाठः ।

परापरस्तु यः कालः

स प्रियेऽष्टादशः प्रभुः ॥३२९॥

परापर इति परादपि परः अष्टादशः परार्धाख्यः प्रभुः सर्वकालावयवव्यापी ॥३२९॥

तदित्थं

प्राण एवं त्रिधा कालं

कृत्वा चैव त्यजेत्पुनः ।

प्राणं प्राणीयोर्ध्वतुट्यर्धे पूर्वं वर्णैः कारणत्यागावसरेऽनुनिष्पादितयाष्टादशावयवकलात्यागो मन्त्रोच्चारयुक्त्योक्तः । इदानीं तु योगक्रमेण प्राणचारस्थित्या सप्तदशावयवं कालं यत्नेन त्यक्त्वाष्टादशे कालविषुवति विश्रमितव्यमिति पुनःशब्दार्थः ॥

त्रिधा विभक्तस्य कालस्य पूर्वोक्तं स्थानविभागं स्मारयति

अपरः शक्तिमूर्धस्थो

व्यापिन्यां च द्वितीयकः ॥३३०

तृतीयः समनास्थाने
तत्कालविषुवत्स्मृतम् ।

यस्तृतीयस्तत्कालविषुवदिति संबन्धः । तदूर्ध्वं हि

'.........न कालस्तत्र विद्यते ।'

इत्युक्तम् ॥ ३३० ॥

तदित्थम् ।

एतत्षष्ठं समाख्यातं

अथ

सप्तमं तात्त्वमुच्यते ॥ ३३१ ॥

तदाह

उन्मना परतो देवि
तत्रात्मानं नियोजयेत् ।
तस्मिन्युक्तस्ततो ह्यात्मा
तन्मयश्च प्रजायते ॥ ३३२ ॥

परत इति समनायाः य एवात्मन उन्मनायोगः ॥ ३३२ ॥

तदेव

तत्त्वाख्यं विषुवद्देवि
सर्वेषां परतः स्थितम्।

उपसंहरति

विषुवदेवंविधं ज्ञात्वा
को न मुच्येत बन्धनात् ३३३

विषुवत्ते समाख्यातं

इदानीं परम्पराविनाभूतान्पञ्चपदार्थांल्लक्ष[1]-
यितुमुद्दिशति

पदार्थभेदनं शृणु।
त्यागं चानुभवं चैव
योजनं च परे पदे ॥ ३३४ ॥

पदानि वक्ष्यमाणप्रमाणकानि हृदादि-
स्थानानि, तत्र तत्तत्कारणानुभवकारित्वेना-
र्थ्यन्त इति पदार्थाः अकारादिसमनान्ताः
एकादश, तेषामेव भेदनमनुभवयुक्त्या स्वव-
शीकरणं, यथा भेदिता माण्डलिका भूभुज

१ ख० पु० लक्षयितुमिति पाठः।

इति । अत्र चावश्यमधराधरत्यागे सति उत्तरोत्तरपदार्थानामनुभवोऽस्ति[1], स एव च पूर्वं सम्यग्योगरूपः संयोग इत्युद्दिष्टः, भेदनपर्यन्ते च परे पदे योजनमवश्यभावि, तच्च पूर्वं सर्वोर्ध्वभावनात्मत्वात्[2] पदेनोद्दिष्टम् ॥

तत्र

पदार्थैकादशी ज्ञेया

या च पूर्वं निर्णीता ।

तत ऊर्ध्वं तु

उन्मनान्तः परो भवेत् ।

पदार्थ इत्यर्थः ॥

अतस्तत्रावस्थितये तां पदार्थैकादशीम्

भेदयेज्ज्ञानशूलेन

समनन्तरनिर्णेष्यमाणपरशक्तिस्फारप्रकाशरूपं यज्ज्ञानं तदेव समरसीभूतेच्छादिशक्तित्रयसंवृता [रा]रूपतोन्मीलितातितैक्ष्ण्येन भेदकत्वात् शूलम् ॥

---

१ ख० ग० भवतीति पाठः । २ ख० पु० भवनात्मलपदेति पाठः । ग० पु० भवनार्थत्वादुद्भवपदेति पाठः ।

न केवलमेतद्भेदकं यावत्

ज्ञानं ज्ञेयस्य ज्ञापकम् ॥२३५॥

ज्ञेयमिह परं तत्त्वम् ॥

अत एवास्य

ज्ञापकं बोधमतुलं

परशक्तिप्रथात्मकं नतु विषयानुभवरूपं बोधमिति स्थिति[द्वितीया]निर्देशश्छान्दसः ॥

अत्र हेतुः

दीपवद्द्योतनं[1] यतः।

एतत् स्फुटयन् ज्ञानौपयिकं ज्ञेये विश्राम्येदित्याह

दीपहस्तो यथा कश्चि-

द्द्रव्यमालोक्य चाहरेत्॥२३६॥

एवं ज्ञानेन च ज्ञेयं

तस्मिन् कुर्यात्तु संस्थितिम्।

दीपज्ञानयोरंशमात्रेण दृष्टान्तदार्ष्टान्तिकभावः ॥

---

१ ख० पु० द्योतकमिति पाठः।

ननु दीपवत् ज्ञानं ज्ञेयाद्भिन्नमित्याह

ज्ञानं वै लक्षणं प्रोक्तं
ज्ञेयतत्त्वस्य सुव्रते ॥ ३३७ ॥

न च कमण्डलुनेव छात्रो ज्ञानेन परं तत्त्वं लक्ष्यते इत्याह

लक्षणं गुण आख्यातः

असाधारणस्तत्त्वव्यवस्थापको हि धर्मो लक्षणम् ॥

अत एव तत्

कला तत्त्वस्य सर्वदा ।

तत्त्वस्य प्रत्यभिज्ञेयस्य परमशिवस्य सर्वं ददाति द्यति चेति व्युत्पत्त्या विश्वसर्गसंहार-कारिणी स्वातन्त्र्याख्या सर्वदा च नित्या-वियुक्ता कला शक्तिरेव लक्षणम् । उक्तं च श्रीविज्ञानभैरवे

'यथालोकेन दीपस्य किरणैर्भास्करस्य वा ।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः श्रितः ॥
(वि० भै० श्लो० २१)

इति ॥

एतादृक्छक्त्यात्मना

न गुणेन विना तत्त्वं
न तत्त्वेन विना गुणः ॥३३८॥

शिवशक्त्योर्नित्यलोलीभाव इत्यर्थः ॥

एवमपि

गुणं गृह्णन्ति सर्वत्र
न तत्त्वं गृह्यते क्वचित् ।

धर्ममुखेनैव शिवो धर्मी प्रथते विशेषतः परमशिवात्मा तस्मिन्विश्वनिर्भरे शक्त्युपायं विना स्वतोऽनुप्रवेशायोगात् ॥

युक्तं चैतदित्याह

गृह्यते ह्यनुमानेन
प्रत्यक्षानुभवेन च ॥ ३३९ ॥

अर्थिप्रत्यर्थिभावेन
आगमेन तु लभ्यते ।

तत्त्वादेर्विश्वस्य संनिवेशविशेषवत्त्वात् तत्तत्कर्तुरनुमानं तावद्विश्वज्ञत्वकर्तृत्वमुखेनैव प्रत्य-

---

१ क० ख० सर्व इति पाठः ।

क्षानुभवोऽपि योगिनां प्रोक्तशक्तिद्वारक एव । यथोक्तम्

'तदास्याकृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षणः ।' (स्प० १।१०)

इति । अर्थी प्रष्टा प्रत्यर्थी संशयच्छेदको वक्ता तयोर्भावोऽनुग्राह्यानुग्राहकत्वात्मा तेन यः प्रवृत्त आगमस्तेनापि शब्दनरूपेण नियतशक्तिद्वारकमेव तत्त्वं लभ्यते ॥

उक्तयोगिप्रत्यक्षैकयोगक्षेमतामागमस्य कथयति

आगमो ज्ञानमित्युक्त-
मनन्ताः शास्त्रकोटयः ॥३४०॥

अनन्ताः शास्त्रकोटयो यः पारमेश्वर आगमस्तज्ज्ञानं परशक्तिस्फाररूपमित्युक्तम् । आ समन्ताद्गमयति अभेदेन विमृशति पारमेशं स्वरूपमिति कृत्वा परशक्तिरेवागमस्तत्प्रतिपादकस्तु शब्दसंदर्भस्तदुपायत्वात् शास्त्रस्य ॥ ३४० ॥

कथं परशक्त्यात्मत्वमित्याह

शास्त्रं शब्दात्मकं सर्वं
शब्दो हंसः प्रकीर्तितः ।

यत् किंचित् क्वचिच्छासनाच्छास्त्रं तच्छब्दात्मकं पञ्चाशद्वर्णशब्दराशिसतत्त्वं शब्दराशिश्च हंसोच्चारात्मा हंसोच्चारश्च परशक्त्यनुभवस्फारसार इति ॥

निर्णीतमेतदित्याह

हंसयोगः पुराख्यातः

तेन सर्वप्रमाणानां शक्तिविषयत्वात् शक्तिमद्रूपमप्रमेयमेवेति युक्तमुक्तं गुणं गृह्णन्ति सर्वत्र इति संगतिः ।

भेदयेत् ज्ञानशूलेनेत्युपक्रम्य भेदयेन्मन्त्रशूलेनेति प्रतिपादयिष्यति । अतो ज्ञानसतत्त्वं वर्णमन्त्रोच्चारकालं तेन च वाच्यवाचकयोर्वर्णदेवतयोः संबन्धं तद्वाच्यदेवताश्रयहृदयादिस्थानपरिमाणं च वक्तुमासूत्रयति

मात्रासंख्या त्वथोच्यते ॥३४१॥

मात्रायोगो यथा चास्य
प्रमाणं हृदयादिषु ।

मात्रा अकारादिवर्णोच्चारकालः । अस्येति भेदकस्य मन्त्रोच्चारात्मनो हंसोच्चारस्य यथा मात्राभिर्योगो यथा चोच्चारणास्पदानां हृदादीनां प्रमाणं तत्सर्वमुच्यत इत्यर्थः ॥

तत्र प्रमाणं तावदाह

नाभेरूर्ध्वं वितस्त्यन्ते
कण्ठाधस्तात्षडङ्गुले ॥ ३४२ ॥

हृदयं मध्यदेशे तु
चतुरङ्गुलसंमितम् ।

वितस्तिः द्वादशाङ्गुलानि तदन्ते कण्ठाधस्तात्षडङ्गुले अवधिभूते क्षेत्रद्वये यो मध्यदेशस्तत्र चतुरङ्गुलो हृद्ग्रन्थिः इति संबन्धः ॥

अत्राधिष्ठातारमाह

चतुर्विंशतितत्त्वैस्तु
ब्रह्मा तत्र व्यवस्थितः ॥३४३॥

सहार्थे तृतीया, प्रकृत्यन्तमधिष्ठाय ब्रह्मात्र स्थित इत्यर्थः ॥

तदूर्ध्वम्

कण्ठमष्टाङ्गुलं विद्धि
विष्णुस्तत्र व्यवस्थितः ।
तत्त्वषट्केन संयुक्तः

पुमादिकलान्तेन ॥

तदूर्ध्वं चतुरङ्गुलम् ॥ ३४४ ॥

तत्र च

मायातत्त्वं समाश्रित्य
रुद्रस्तालुतले स्थितः ॥

तदूर्ध्वं

अङ्गुलद्वयमानं तु
भ्रुवोर्मध्यं प्रकीर्तितम् ॥३४५॥
तत्रेश्वरः स्थितो देवि
तत्त्वद्वयसमन्वितः ।

तत्त्वद्वयं शुद्धविद्येश्वराख्यम् ।

ततोऽपि

एकादशाङ्गुले चैव-

मूर्ध्वं देवः सदाशिवः ॥३४६॥

तत्त्वद्वयसमायुक्तो

यावद्ब्रह्मबिलं गतः ।

सदाशिवतत्त्वशक्तितत्त्वाभ्यां युक्तः । एवं च वदन् अर्धचन्द्रादिनादान्ते श्रीसदाशिवोऽधिष्ठाता इति शिक्षयति, तत्त्वव्यवस्थया तु निरोध्यन्तमीश्वरतत्त्वस्य नादान्तान्तं सदाशिवतत्त्वस्येति वक्ष्यमाणनीत्या तत्त्वव्याप्तेरन्यैवेयमीश्वरसदाशिवाख्यदेवताव्याप्तिः ॥

तदूर्ध्वैकाङ्गुला शक्तिः

शक्तिग्रन्थिस्थानमित्यर्थः ।

शिवस्तत्र व्यवस्थितः ॥३४७॥

अनाश्रिताख्यः ॥ ३४७ ॥

अत्रैव चाङ्गुले

त्वक्छेषे व्यापिनी प्रोक्ता

समना च

सापि भूः शिवेनैवाधिष्ठितेत्यर्थः । शक्ति-

व्यापिनीसमनाख्याः शिवतत्त्वभूमयः शिवाख्यकारणाधिष्ठिता इत्यर्थः । एवं च वदन्नापादाद्बाह्यमानेन यत्षण्णवत्यङ्गुले मुण्डान्तस्थानं तदेवेह द्वादशान्तमान्तरव्याप्त्याहावधे[1]स्तावतः षट्त्रिंशदङ्गुलत्वेन विभजनादिति ध्वनति । अन्यत्र दृश्यमानोर्ध्ववाहिधूमलेखान्तं बाह्यमानेनाष्टोत्तरशताङ्गुलान्तं तदुच्यते मुण्डान्तात्प्रभृति च निरावरणता इत्युभयथा प्रतिपादनेऽपि न किंचित्प्रमेयवैषम्यं बिन्द्वादिसमनान्तप्रमेयसोपानमालिकायाः सर्वत्र स्थानसाम्येनाभिधानात् ॥

एवं कारणषट्कास्पदस्थानषट्कप्रमाणमुक्त्वा निष्प्रमाणकं सप्तमं पदं परमशिवाधिष्ठितमित्याह

उन्मना ततः ।

तत्परं तु परं तत्त्वं

प्रमाणपरिवर्जितम् ॥ ३४८ ॥

---

1 क० ग० पु० च वधेरिति पाठः ।

पदार्थभेदनाङ्गतया

मात्रासंख्या च योगश्चा-
धुना हंसस्य कथ्यते ।

हंसस्येति तदभिन्नस्य निष्कलस्य । यद्यपि

'मात्रासंख्या त्वथोच्यते ।
मात्रायोगो यथा चास्य.......... ।' (४।३४२)

इति पूर्वमेवोद्दिष्टं तथापि ब्रह्मादिकारणाधिष्ठितहृदादिप्रमाणमुक्त्वा यदिदानीं निर्णीयते तद्युक्तमेव स्थानाश्रयणक्रमेणैव हि वाचकवर्णकलाकालविश्रान्त्या वाच्यदेवताव्याप्त्यनुभवरूपं पदार्थभेदनं भवति ।

तत्र

अकारश्च हकारश्च
द्वावेतावेकतः स्थितौ ॥३४९॥
विभक्तिर्नानयोरस्ति
मारुताम्बरयोरिव ।

अकारोऽनुत्तरशक्तिविमर्शात्मा हकारश्च

शांभवविमर्शनस्वरूपः[1] शिवशक्त्योश्चाभेदात् एतौ खवायुवदेकत्र ऐक्येन स्थितौ विश्रामशिनः स्वयमुच्चरतोऽनच्कहकारस्य शिरोरेखारूपाकारकलानुप्रवेशात् ॥

एकमात्रः स विज्ञेयो
हृदयात्संप्रवर्तते ॥३५०॥

स इत्यकारयुक्तो हकारः केवलस्त्वनुच्चार्यत्वादकालकलित एव ॥ ३५० ॥

ऊकारस्तु द्विमात्रो वै
कण्ठस्थाने समुच्चरेत् ।
त्रिमात्रस्तु मकारो वै
तालुमध्यगतश्चरेत् ॥ ३५१ ॥

त्रिमात्रत्वं गीतिकाक्षरस्वरमध्येऽक्षरशून्यपदोच्चारवत् ॥ ३५१ ॥

प्लुतोच्चारयुक्त्या मात्राभेदं स्थूलस्थित्योक्त्वा, सूक्ष्मस्थित्याप्याह

बिन्दुश्चैवार्धमात्रस्तु

---

१ ख० ग० घ० ङ० पु० स्वरूपविमर्शनेति पाठः ।

अनुस्वारोच्चाररूपः ॥

कुत इत्याह

मात्रार्धं हि स उच्यते ।

वक्ष्यमाणयुक्त्या भेदितग्रन्थेर्योगिनो मात्रार्धमेव तदुच्चारो भवतीति ॥

अस्य स्थानमाह

भ्रुवोर्मध्ये स उच्चार-

स्तस्य देवि विधीयते ॥३५२॥

भेदितग्रन्थिभिर्योगिभिः ॥ ३५२ ॥

अथास्यैव विगलद्विभागध्वन्यात्मनोऽनुनिर्हादरूपः

तच्छेषाच्चार्धचन्द्रस्तु

पादमात्रस्त्वसौ भवेत् ।

मात्राया इत्यर्थात्

निरोधी चार्धपादस्तु

सोऽयमर्धचन्द्रो निरोधीयमत्रैकदेशः ।

ललाटान्ते समुच्चरेत् ॥३५३॥

ललाटाग्रतदग्रभागात्मन्यन्तद्वये द्वावुच्चरत इत्यर्थः ॥ ३५३ ॥

अत ऊर्ध्वम्

नादः षोडशकांशस्तु
मूर्धान्तं यावदुच्चरेत् ।

नादस्य नादान्तः पल्लवप्राय इति पृथङ्नोक्तः ॥

अत ऊर्ध्वम्

द्वात्रिंशदंशा शक्तिस्तु
षट्त्रिंशान्ते समुच्चरेत् ॥३५४॥

प्राणचारस्य यत्षट्त्रिंशदङ्गुलं तल्लक्षणान्ते सम्यक् शान्तभेदस्पर्शमात्रानुभवात्मतया उच्चरेत् । इह एकत्रैव षट्त्रिंशदङ्गुलरन्ध्रान्ते शक्तिः, त्वक्शेषे व्यापिनी, केशदेशे समनेति स्थितिः ॥ ३५४ ॥

तत्र शक्तेर्मानमुक्तं व्यापिनीसमनयोराह

व्यापिनी चतुःषष्ट्यंशा
शक्तेस्तु परतःस्थिता ।

समना च

चतुष्षष्ट्यंशैव, एवं चेमौ चतुष्षष्ट्यंशावेकी-

क्तौ द्वात्रिंशांशः सोऽपि शक्त्यात्मद्वात्रिंशांशेन सह मिलितः षोडशांशो जायते, सोऽपि नादीयश्च षोडशांशोऽष्टांशो जातः सोऽपि निरोध्यष्टांशेन सह चतुर्थांशः स्थितोऽर्धचन्द्रः, अपरश्चतुर्थांशो बिन्दुरर्धमात्रेत्येष मात्रा मकारान्ताश्च षण्मात्रा इति समनान्तमात्रासप्तकक्रोडीकृताशेषाक्षेपिभाविदेवीसप्तकोऽयममात्रोन्मनापरतत्त्वसतत्त्वः श्रीनिष्कलनाथः । यत्तु

'............परार्धः परतः स्थितः ।
सोऽष्टादशस्तु तं देवि समनान्ते परित्यजेत् ॥'

इत्युक्तं तद्वाच्यदेवतात्वाधिभूतबाह्यस्थूलकालप्रशमनपरमिदं तु मन्त्रावयवगतातिसूक्ष्मोच्चारकालप्रतिपादनपरमिति न काचिद्धानिः । अतश्च सूक्ष्ममन्त्रकलोच्चारकालेनैव बाह्यतत्त्वगतसंभाव्यमानविततविततमपि कलाध्वानं वटधानिकादलनेन वटदलनवद्योगीन्द्रः प्रशमयेदिति निरूपितं भवति । अत्र च मन्त्रावयवविमर्शकाले तत्तद्वाच्यदेवतानुभवोऽधराधरानुभावस्य चोर्ध्वोर्ध्वपदानुभावात्मसाद्भावो भवतीति मन्तव्यम् ॥

समनाया अपि

उन्मना चोर्ध्व-
ममात्रः परमोऽव्ययः ॥ ३५५ ॥

उन्मनया सह परमशक्तिमान् व्ययहीन-त्वादमात्रो मात्रार्धमात्रादिकालस्पर्शरहित इ-त्यर्थः ॥ ३५५ ॥

एतदुपसंहरति

मात्रासंख्या च योगश्च
प्रमाणं परिकीर्तितम् ।

तदेतत्सर्वम्

एवं ज्ञात्वा वरारोहे
पदार्थान् भेदयेत्ततः ॥ ३५६ ॥

वरारोहे इति प्राग्वत् ॥ ३५६ ॥

कथम्

भेदयेन्मन्त्रशूलेन
मुद्राभावयुतेन च ।

प्राङ्निर्णीतज्ञानशूलसतत्त्वेन मन्त्रशूलेन मु-

द्रया वक्ष्यमाणकरणरूपया भावेन जिज्ञासा-जिज्ञासितानुभवात्मना युक्तेन ।

त्रयमेतत् ज्ञानक्रियेच्छाशक्तिस्फारसारमत एतच्छक्तिमयमहेश्वरैकात्मा गुरुर्भेदनं कुर्यादिति प्रकाशयति[1]

मन्त्रो वै[2] ज्ञानशक्तिश्च
मुद्रा चैव क्रियात्मिका ॥३५७॥
भावश्च मन इत्युक्तं
तन्मनो बुद्धिपूर्वकम् ।

मनः सततं मननमनुभवो बुद्धिपूर्वकमिति निश्चित्य प्रवृत्तस्य तत्तदनुभवलाभात् भेदनं चैतत्परतत्त्वव्याप्त्यर्थम् ॥

परतत्त्वव्याप्तिश्च जिज्ञासाप्रमुखकरणबन्धे मन्त्रोच्चारोन्मिषत्पूर्णस्वसंवेदनत इत्याह

परश्च मनसा गम्य
इच्छाशक्त्या त्वधिष्ठितः ३५८

मनसा स्वसंवेदनेनेच्छाशक्त्या तत्परमार्थ-

---

१ ख० पु० प्रकटयति इति पाठः । २ ख० ग० विज्ञानेति पाठः ।

तया जिज्ञासयाधिष्ठितः प्रथमं विषयीकृत इत्यर्थः ॥ ३५८ ॥

युक्तं चैतत् यतः

यत्र यत्र भवेदिच्छा
ज्ञानं तत्र प्रवर्तते ।
क्रियाकरणसंबन्धात्

योगात् क्रियाया व्यापारस्य करणस्य च तद्व्यापारोचितशरीरसंनिवेशस्य सम्यक् बन्धात् जिज्ञासितेऽर्थे ज्ञानं भवतीत्यर्थः ॥

तदित्थं शक्तित्रयात्मशिवावेशज्ञस्य गुरोः

तत्त्वस्योच्चारणं भवेत् ॥३५९॥

तत्त्वं वीर्यसारो मन्त्रः ॥ ३५९ ॥

अत्रैव भरं दर्शयितुमपि अर्थलब्धं व्यतिरेकमाह

क्रियाकरणहीनस्य
न चैवोच्चारणं भवेत् ।

करणभेदेन क्रियाभेदं सम्यक् मन्त्रोच्चारसिद्ध्यर्थं दर्शयितुमुपक्रमते

क्रिया करणभेदेन
सा चैव त्रिविधा स्मृता॥३६०॥

तत्र

एकेनोच्चारयेत्तत्त्वं
करणेन विचक्षणः ।

ऊर्ध्वरेचकेन

नाडीश्चाथ द्वितीयेन
द्वाराणि च निरोधयेत् ॥३६१॥

कुम्भकेन

तृतीयं करणं दिव्यं
कृत्वा वै तत्त्वमुच्चरेत् ।

तत्त्वं निष्कलं तेन कुम्भकेन द्वाराणि निरोध्य दिव्यं करणं बद्ध्वा ऊर्ध्वरेचकेन मन्त्रमुच्चारयेत् इत्ययमत्र क्रमः ॥

तमेव स्फुटयितुमुपक्रमते

पूरकं कुम्भकं कृत्वा
सर्वद्वाराणि रोधयेत् ॥ ३६२ ॥

कुम्भकावसर एव ॥ ३६२ ॥

तानि

गुदद्वारेण रुद्धेन
रुद्धान्यत्र भवन्ति हि ।

रोधश्चास्य संकोचविकासाभ्यामावेशवशेन कार्यः ।

एवं कृत्वा

द्वारमेकं ततश्चोर्ध्वे
प्रवहत्तद्विचिन्तयेत् ॥ ३६३ ॥

मध्यनाडिरूपं विचिन्तयेत् नतु संप्रत्येव वाहयेत् ॥ ३६३ ॥

तथा सति हि

नाड्यो ग्रन्थिपद्माश्च
येऽधोमुखगताः प्रिये ।
ते कुम्भकेन संरुद्धा
विकसन्ति समन्ततः ॥ ३६४ ॥

प्राणशक्तिकौटिल्यधामानि हृदयादीनि ग्रन्थयः । संकोचविकासधर्मत्वात् पद्मानि तानि चापानशक्तिप्रवाहवशादधोमुखानि विकसन्तीत्यूर्ध्ववाहोन्मुखीभवन्ति ॥ ३६४ ॥

इत्थं कुम्भकादनन्तरम्

करणं तु ततः कृत्वा

अत्र च 'तत्त्वस्योच्चारणं कुरु' इति दूरेण संगतिः । मध्ये तु करणलक्षणम् ॥

तदाह

लक्षणं तस्य वै शृणु ।
जिह्वा तु तालुके योज्या
किंचिदूर्ध्वं न संस्पृशेत् ॥३६५॥
ईषत्प्रसार्य वक्त्रं तु
किंचिदोष्ठौ न संस्पृशेत् ।
दन्तपङ्क्ती तथैवेह
दृष्टिश्चाधोर्ध्ववर्जिता ॥ ३६६ ॥
कायं समुन्नतं कृत्वा
करणं दिव्यमुच्यते ।

अत्र जिह्वायास्तालुयोजने कुञ्चितत्वमर्थलब्धं किंचिदोष्ठौ नेति न किंचिदपि स्पृशेदिति योज्यम्, तथैवेति प्रसार्य न संस्पृशेदित्यर्थः ।

दृष्टेरध ऊर्ध्वं वर्जनं निश्चलतारकत्वेन विकल्पहानये समुन्नतामिति सम्यगविकृततयोन्नतं दिवि परसंविल्लाभे उपायतया भवं दिव्यम् ॥

तदित्थम्

दिव्यं च करणं कृत्वा
तत्त्वस्योच्चारणं कुरु ॥ ३६७ ॥

चकारात् कुम्भकमूर्ध्वरेचकं च तत्त्वं मूलमन्त्रः ॥ ३६७ ॥

अत्र दिव्यकरणावसरे ऊर्ध्वरेचकमपि कुर्वीतेत्याह

कुम्भितश्चैव यः प्राणो
रेचयेत्तं शनैः शनैः ।

ऊर्ध्वमित्यर्थात् ॥

तथा सति हि

नाड्यो ग्रन्थिपद्माश्च
देहे याः संव्यवस्थिताः ॥३६८॥
रेचकेन समाक्षिप्ता
ऊर्ध्वस्रोतो भवन्ति ते ।

मध्यवाहरूपतां यान्तीत्यर्थः । अत्र च रोमाञ्चोद्गमोऽभिज्ञानम् ।

एवं करणत्रयबन्धावहितः

ततो वै ज्ञानशूलेन

ग्रन्थीन्भिन्दन् समुच्चरेत् ३६९

ज्ञानशूलं पूर्वं निर्णीतं ग्रन्थीनां भेदो हृदयादिपदेषु प्राणशक्तेः स्पष्टीभावेन तत्तदनुभवलाभः सम्यगविकल्पमुच्चरेत् स्वयमेवमूर्ध्वं प्रसरेत् ॥ ३६९ ॥

मन्त्र इति अर्थादत्र भेदेन घटमानस्य योगिनः भावप्राप्तिवशादिति यः पूर्वं हेतुरुक्तः तन्निर्णयानुभवभेदान्निरूपयति

भित्त्वा हृत्पद्मग्रन्थिं तु

ततः शब्दः प्रजायते ।

यदाकाशसमायोगात्

सम्यगासमन्ताद्योगात् मन्त्राद्यकलोच्चारैकाग्रतारूपात् । शब्द इति उपांशुरूपतयान्तरकारादिकलात्मा स्फुटं श्रूयमाणः ॥

स च

घोषशब्दोपमो भवेत् ॥३७०॥

'श्रवणाङ्गुलिसंयोगाद्यः शब्दः संप्रवर्तते ।
दीप्तवह्निस्वनाभोगः स नादो घोष उच्यते ॥'

इति लक्षितो घोषो दीप्ताग्नेः यो धकधकाकृतिशब्दतुल्याकारश्रुतिरुच्चरतीत्यर्थः ॥ ३७० ॥

कण्ठस्थो विरमेच्छब्दः
कण्ठं प्राप्य वरानने ।

मन्त्रो विमर्शः कण्ठं प्राप्य यदा तत्स्थो भवति तदा घोषः शाम्येदित्यर्थः ॥

तत्र तु

भिन्दतः कण्ठदेशं तु
शब्दो घुगघुगायते ॥ ३७१ ॥

तद्रूपाकार उच्चरतीत्यर्थः ॥ ३७१ ॥

अत ऊर्ध्वम्

तालुमध्यगतः प्राणो
यदा भवति सुव्रते ।
भिन्दतस्तालुग्रन्थिं तु
शब्दो घुमघुमायते ॥ ३७२ ॥

शोभनं व्रतं मध्यधामनिभालननियमरूपं यस्याः सा सुव्रता तत्संबोधनं, घुमघुमायते

इति तदनुकृतिर्मकारकलोच्चरतीत्यर्थः ॥३७२॥

तदत्र ग्रन्थित्रयभेदेन

एवं तेऽनुभवाः प्रोक्ताः
प्राणे चरति सुव्रते ।

प्रोक्तशब्दविषयाः

त्रयस्तेऽष्टकलाः प्रोक्ता
उपर्युपरितः क्रमात् ॥ ३७३ ॥

इह एकादशे पटले

'अष्टधा तु स देवेशि व्यक्तः शब्दः प्रकीर्तितः ।
घोषो रावः स्वनः शब्दः स्फोटाख्यो ध्वनिरेव च
झांकारो ध्वंकृतश्चैव अष्टौ शब्दाः प्रकीर्तिताः ॥'
(स्व० ११ । ७)

इत्युक्त्या व्यक्तस्य शब्दस्याष्टविधत्वं वक्ष्यति । अकारोकारमकाराश्च त्रयो व्यक्ता इति तदुच्चारस्थानेषु ग्रन्थिभेदानुभवविषयाणां शब्दानां घोषाद्यष्टकलत्वं, यत्तु घोषोपम इत्युक्तं तन्न घोषैकरूपत्वमपितु घोषसमानत्वमिति, तत्रापि रावादिशब्दाः सन्त्येव॥३७३॥

---

१ ख० पु० शब्दप्रभेदत इति पाठः । २ ग० पु० शक्य इति पाठः ।

तदित्थम्

तिष्ठेत्स यत्र वै प्राण
आत्मा तद्गतिमाप्नुयात् ।

प्राणाश्रया संवित् तद्द्वारेणैव तत्तत्स्थानमाप्नोति ॥

तत्र

तत्तद्रूपं भवेत्तस्य
स्थानभावानुरूपतः ॥ ३७४ ॥

स्थाने हृदादौ भावस्तत्तत्कारणान्तर्भावः । एवं हृत्कण्ठतालुषु ब्रह्मविष्णुरुद्राधिष्ठितेषु सृष्टिस्थितिसंहाररूपतां प्राणावस्थितिक्रमेणात्मा भजते

भ्रुवोर्मध्यं यदा गच्छे-
त्स्फोटशब्दस्तु जायते ।

अनभिव्यक्तवर्णरूपस्फुटत्वादशब्दकल्पः[1] स्फोटः ।

एष च

---

१ ख० पु० स्फुटद्वंशशब्देति पाठः ।

बिन्दुं भेदयतो देवि
शब्दो धुमधुमायते ॥ ३७५ ॥

बिन्दुमिति बिन्दुग्रन्थिं भिन्दतो बिन्दुकलाख्य एव मन्त्रावयवबोधो धुमधुमानुकृति[1]रुच्चरति बिन्दुग्रन्थिभेदश्चायमपवर्गपदाधिरोहे प्रथमसोपानकल्प इत्यत्र भरः कर्तव्यो योगिभिः तद्भेदे[2] हि उल्लङ्घित एव भेदमयः संसारः ॥ ३७५ ॥

अन्यथा तु

कपिर्वै नारिकीलेन
आचार्यः सह बिन्दुना ।
अभिन्नेन कुतो मोक्षं
सबाह्याभ्यन्तरं प्रिये ॥ ३७६ ॥

भजते इति वाक्यशेषः । दृष्टान्तदार्ष्टान्तिकभावोऽत्रार्थलभ्यः, तेन यथा कपिर्नारिकेलेनाभिन्नेन कुतो मोक्षं भजते न भजते नारिकीलं[3] रसास्वादायाभङ्क्त्वा न मुञ्चति, तथैवाचार्यो

१ क० ग० कृतिमिति पाठः । २ ख० पु० एतदिति पाठः ।
३ ख० ग० आन्तरमास्वादायेति पाठः ।

बिन्दुग्रन्थिना अभिन्नेन सहेति साकं दीक्ष्येण शिष्येणेत्यर्थात् कुतः सबाह्याभ्यन्तरं कृत्वा मोक्षं भजते बाह्यात् स्थूलात् भावभूतशरीरा-दाभ्यन्तराच्च सूक्ष्मात् पुर्यष्टकशून्यशरीरान्न मुच्यते बिन्दुभेदात्तु मुच्यते एवेत्यर्थः। 'कपेर्वैं नारिकेलेन तथाचार्यस्य बिन्दुना' इति स्पष्टः पाठः ॥ ३७६ ॥

अतश्च

भित्त्वा बिन्दुं ततो देवि
अर्धचन्द्रं विभेदयेत्।
भिद्यतश्चार्धचन्द्रस्य
ललाटे झिमिझिमायते ॥३७७॥

अर्धचन्द्रग्रन्थिं भिन्दतस्तत्स्थान एवार्ध-चन्द्राख्यो मन्त्रावयवो झिमिझिमानुकारो जायते इत्यर्थः। इत्थमुत्तरत्रापि योजना कार्या ॥ ३७७ ॥

अथ

अर्धचन्द्रं तु भित्त्वा वै
भेदयेत्तु निरोधिनीम्।

तस्यास्तु भिद्यमानायाः
शब्दः सिमिसिमायते ॥३७८॥

बिन्द्वादौ प्राग्वत्कलाव्याप्तिमाह

स्थानत्रयमिदं देवि
पञ्चपञ्चकलान्वितम् ।

तत्र बिन्दोः

'निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।'
(स्व० १० । १२१५)

इत्युपक्रम्य

'एतस्य वामदिग्भागे शान्त्यतीता ।'(स्व० १० । १२१६)

इति कलापञ्चकं वक्ष्यति । एवमर्धचन्द्रस्य

'ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमला शिवा ॥'
(स्व० १० । १२१८)

इति निरोधिन्या अपि

'रुन्धनी रोधिनी रौद्री ज्ञान[1]बोधा तमोपहा ।'
(स्व० १० । १२१९)

इति कलापञ्चकं स्थानत्रयमिति वर्गीकरणमाद्यग्रन्थिभेदादेवापरग्रन्थिभेद इत्याशयात् । एवमुत्तरत्र ॥

तदित्थम्

---

१ ख० ग० पु० जातेति पाठः ।

प्राणस्य चरतस्तत्र
यस्मिन्स्थाने स तिष्ठति ॥३७९॥
तत्तद्रूपो भवेदात्मा
तां तां गतिमवाप्नुयात्।

तत्रेति तेषु त्रिषु ईश्वरतत्त्वाधिष्ठितेषु स्थानेषु चरतः प्राणस्येति चरन्तं प्राणमनादृत्य संवित्प्रधानतया प्राणभूमिकां गुणीकृत्य यस्मिन्यस्मिन् स्थाने स योग्यात्मा तिष्ठति तत्तद्रूपतामनुभूय तत्तन्मयत्वमाप्नोतीत्यर्थः ॥

अथ

निरोधिनीं भेदयित्वा
ततो नादं व्रजेद्बुधः ॥ ३८० ॥
वंशशब्दसमः शब्द-
स्तत्र सूक्ष्मः प्रजायते।

सूक्ष्मत्वं पूर्वापेक्षमीश्वरतत्त्वम् ॥

ततोऽपि

भेदयेन्नादसंस्थानं
ब्रह्मरन्ध्रं सुदुर्भिदम् ॥ ३८१ ॥

भिद्यतो ब्रह्मरन्ध्रस्य
शब्दः शुमशुमायते ।

नादस्य सम्यक् स्थानं विश्रान्तिर्यत्र तन्नादसंस्थानं ब्रह्मरन्ध्रं सुदुर्भिदं नादान्तपदं तदेव च ब्रह्मरन्ध्रमूर्ध्वकवाटच्छिद्रं सुदुर्भिदं सा[1]तिशयावधानैरेव भेत्तुं शक्यम् ॥

एवं नादनादान्तस्थानं सदाशिवाधिष्ठितं भित्त्वा

शक्तिमध्यगतः प्राणो
वंशनादान्तसंनिभः ॥ ३८२ ॥

शक्तिभेदस्पर्शाद्वंशनादान्ततुल्यो भवति नतु शक्तिस्थानभेदाद्वंशनादस्य मधुरध्वनिरूपस्यान्तोऽनुरणनरूपः सूक्ष्म[2]स्तत्तुल्यो भवति ॥ ३८२ ॥

अथ

तां वै तु भेदयेच्छक्तिं
दुर्भेद्यां सर्वयोगिनाम् ।

---

१ ख० पु० चातिशयेति पाठः । २ ख० ग० पु० सूक्ष्मतुल्य इति पाठः ।

भिद्यते च यदा शक्तिः
शान्तः शुभशुभस्ततः ॥३८३॥

दुर्भेदत्वं चास्याः तदनुभवाह्लादस्य स्पृहणीयतमत्वेन त्यक्तुमशक्यत्वात् शान्त इति प्रवृत्तिस्थानकरणाभिघातादेव शब्दवृत्तिः शाम्यति, इह तु शमित्वा आनन्दस्पर्शात्मतामेतीत्यर्थः ॥ ३८३ ॥

किंच

शक्तिं भित्त्वा ततो देवि
यच्छेषं व्यापिनी भवेत्।
अनुभावो भवेत्तत्र
स्पर्शो यद्वत्पिपीलिका ॥३८४॥

शक्तिभेदानन्तरं यन्मन्त्रावयवरूपं वस्तु शेषमिति शिष्यमाणं तद्व्यापिनी भवेत् शक्त्यन्तसर्वाध्वव्यापनात् व्यापिन्याख्यो मन्त्रावयवः सः। 'तच्छेषे व्यापिनी भवेत्' इति तु स्पष्टः पाठः। तत्र चानुभवः प्रशान्तशब्दव्याप्तिकत्वात् स्पर्शप्रथारूपः यद्वत्पिपीलिकेति संचर-

न्तीनां पिपीलिकानामिवेत्यर्थः । पिपीलिका इत्यत्र नांशब्दस्य लोप ऐश्वरः ॥ ३८४ ॥

अत्रापि कलाविभागमाह

स्थानत्रयमिदं देवि
पञ्चपञ्चकलान्वितम् ।

तत्र नादस्थाने श्रीसदाशिवाधिष्ठिते

'इन्धिका दीपिका चैव रोचिका मोचिका तथा ।
ऊर्ध्वगा........................ ॥' (स्व० १० । १२२६)

इति वक्ष्यमाणाः पञ्च कलाः, शक्तितत्त्वे व्यापिनीपदे च श्रीशिवनाथाधिष्ठिते, क्रमेण

'सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृतामिता ।
व्यापिनी.................... ॥' (स्व०१० । २१३९)

इति पञ्च कलाः

'व्यापिनी व्योमरूपा चानन्तानाथा त्वनाश्रिता ।'
(स्व०१० । १२५०)

इति पञ्चैताश्च सर्वाः स्वावसरे निर्वक्ष्यामः ॥

यत एवं ततः

यत्र यत्र चरेत्प्राण-
स्तत्तद्रूपमवाप्नुयात् ॥ ३८५ ॥

प्राणो जीवस्तत्तदनुभवं प्राप्नोतीत्यर्थः ।

तदनुभवाभ्यासप्रकर्षात् तु

यत्र यत्रावतिष्ठेत
तां तां गतिमवाप्नुयात् ।

तत्तदात्मैव भवतीत्यर्थः ।

एवं च

'समनान्तं वरारोहे पाशजालमनन्तकम् ।'(स्व० ४।४३०)

इति वक्ष्यमाणमेतत्सर्वम्

तस्माद्वै सुप्रयत्नेन
भित्त्वा याति परां गतिम्॥३८६

शोभनः प्रयत्नो दिव्यकरणधाराधिरोह-रूपः ॥ ३८६ ॥

अत्र क्रममाह

भित्त्वा वै व्यापिनीं देवि
समनायां मनस्त्यजेत् ।
मनसा तु मनस्त्यक्त्वा
जीवः केवलतां व्रजेत् ॥३८७॥

मन इत्यविकल्पं चेतः । मनसेति स्पर्श-पर्यन्तस्य मन्तव्यस्य क्षीणत्वात् अविकल्पमन-

नमात्ररूपेण चिन्तेनैव[1] तादृशमेव च मन एकाग्रताप्रकर्षात् त्यक्त्वा वेद्याभासजिघृक्षासंकोचरूपं स्वं वेदनं प्रशमय्य जीव आत्मा केवलत्वमेति शुद्धो वेदितृमात्ररूपो भवतीत्यर्थः ॥ ३८७ ॥

एवं भेदनं च पदार्थानां भावप्राप्तिवशादित्युपक्रान्तं निर्वाह्य क्रमप्राप्तामात्मव्याप्तिमाह

जीवो वै केवलस्तत्र
आत्मज्ञानक्रियान्वितः ।
बन्धनाशेषनिर्मुक्तः
सत्तामात्रस्वरूपकः ॥ ३८८ ॥
समस्ताध्वपदातीतः
शुद्धविज्ञानकेवलः ।
गृह्णाति नापरं भावं
न परं च शिवात्मकम् ॥३८९॥
परापरविनिर्मुक्तः
स्वात्मन्यात्मा व्यवस्थितः ।

---

१ ख० पु० चिन्तनेनेति पाठः ।

यो जीवः प्राणनात्मा स तत्र समनोर्ध्वे यतः समस्तमध्वपद्मतीतोऽत एवाशेषेण मलत्रयरूपेण बन्धेन निःशेषेण वासनापर्यन्तेन मुक्तस्ततश्च सत्तामात्रस्वरूपो भावाप्रतियोगि-प्रकाशमात्रतत्त्वो य आत्मा आत्मीयाभ्यां स्वोचिताभ्यां ज्ञानक्रियाभ्यां नतु परमशिव-संबन्धिनीभ्यां सामरस्यावस्थितिसतत्त्वाभ्या-मन्वितो व्याप्तो न तु सांख्यादिमुक्तरूपः। एष च मायोर्ध्ववर्त्याणवमलयुक्तविज्ञानकेवल-वैलक्षण्यात् शुद्धो विशिष्टेन चाशेषाध्ववेद्यी-करणात्मना नतु मायापुंवि[1]षयकरूपेण ज्ञा-नेन तेनैव च केवलो नतु मन्त्रमन्त्रेश्वरवद्विज्ञे-येनापि संपृक्तः अत एवापरं शिवं सदाशिवरूपं स्वभावं न गृह्णाति नच परं परमशिवरूपं स्वच्छस्वच्छन्दचिदानन्दघनम् अतश्च अयं व्याख्यातपरापररूपात् विनिर्मुक्तस्त्य[2]क्तापररू-पोऽपि अप्राप्तपरस्वभावः स्वात्मन्येव बोद्धृता-मात्ररूपे व्यवस्थितः ॥

---

१ ग० पु० प्रविवेकरूपेति पाठः । २ ख० पु० व्यक्तेति पाठः ।

न चैवात्र संतोषः कार्य इत्युपसंहारादिशा दिशन्नन्यदवतितारयिषुराह

आत्मव्याप्तिर्भवेदेषा
शिवव्याप्तिरतः परम् ॥ ३९०॥
बन्धनाशेषभावेन
सर्वाध्वोपाधिवर्जिता ।

एषेति समनान्तस्थिता नतु[1] सांख्यपातञ्जलाद्युक्ता अस्यैव स्वात्मन उन्मनापदारोहेण चिदानन्दघनपरतत्त्वव्याप्तिरूपा शिवव्याप्तिर्यतः सा बन्धनानामाणवादीनां मलानामशेषभावेन

'समनावधिपर्यन्तः कलङ्काधार उच्यते ।' (स्व०७।२२७)

इति भाविनीत्या समनान्तेन प्रसरेण ये पूर्वोक्ताः सर्वेऽध्वरूपा उपाधयोऽवच्छेदकास्तैर्विशेषेण समस्तबन्धनप्रशमसंस्कारात्मनापि वर्जिता शुद्धविज्ञानकेवलतायां समनान्तसमस्तबन्धनप्रशमेऽपि तन्निवृत्तिसंस्कारभावेनावच्छेदकत्वात्[2] सोपाधित्वं परमशिवता तु

---

१ ख०पु० न त्वनन्तसांख्येति पाठः । २ ख० पु० च्छेदवत्त्वादिति पाठः ।

विश्वोत्तीर्णविश्वमयस्वतन्त्रचिदानन्दघनानव-च्छिन्नदेव ॥

यत ईदृशी शिवव्याप्तिस्ततः

अविदित्वा परं तत्त्वं
शिवत्वं कल्पितं तु यैः॥३९१॥
त आत्मोपासकाः शैवे
न गच्छन्ति परं शिवम् ।

यैरिति शैवपाशुपतलाकुलादिभिर्नानात्मवादिभिः शिवत्वं कल्पितमात्मनां व्यापकत्वनित्यत्वामूर्तत्वचित्त्वस्रष्टृत्वाद्यनन्तधर्मसाम्येन शिवैकरूपाणामपि केनचित्कल्पना[1]मात्रेण निर्युक्तिकेन भिन्नशिवरूपत्वमुच्यते ते सर्वे व्याख्यातव्याप्तिकात्मोपासकाः शैवेऽस्मिन्नद्वयनये परं शिवं व्याख्यातस्वरूपं न गच्छन्ति न तन्मयीभवन्ति सांख्ययोगवेदान्तवाद्यादयस्तु अपरपदस्था एवेति केन तेषामियत्पदप्राप्तिसंभावनापि । अथ च सर्वे एवात्मोपासकाः शैवेन पारमेश्वराद्वयदर्शनोक्तेन ज्ञानेन परं

1 घ० पु० मात्ररूपेणेति पाठः ।

शिवं गच्छन्तीति तन्त्रेण सप्तमीतृतीये योज्ये । उक्तं च श्रीमृत्युजिति

'ये वदन्ति न चैवान्यं विन्दन्ति परमं शिवम् ।
त आत्मोपसकाः शैवे न गच्छन्ति परं पदम् ॥'
(ने० त० ८।३०)

इति अत्र हि परमशिवमन्यं वदन्ति केवलं न चैव विन्दन्ति न पुनः केनापि प्रमाणेन लभन्ते साधयितुं शक्नुवन्तीत्यर्थः ॥

ते तु सर्वे

आत्मतत्त्वगतिं यान्ति
आत्मतत्त्वानुरञ्जिताः ॥ ३९२ ॥

आत्मतत्त्वरूपतायां तत्त्वं परमशिवाभेदाख्यात्यात्मा संकोचः तेन येऽनुरञ्जितास्तदाश्वस्ताः पाशुपताद्याः त आत्मनो यत्तत्त्वं शुद्धविज्ञानकेवलतारूपं तद्गतिं लभन्ते नतु तात्त्विकीं मुक्तिं भेदस्यापरित्यागादिति॥३९२॥

मुक्तशिवसंसारं परिजिहीर्षुणा

तस्मादात्मा परित्याज्यो
यदीच्छेच्छिवमात्मनः ।

१ ख० पु० नचैतन्यमिति पाठः ।

आत्मेति मुक्ताणुरूपता, शिवमिति मुक्त-विकसितपरमशिवैकताम् ॥

तदित्थम्

आत्मतत्त्वं ततस्त्याज्यं
विद्यातत्त्वे नियोजयेत् ॥३९३॥

आत्मानमिति शेषः ॥ ३९३ ॥

कात्र विद्येत्याह

उन्मना सा तु विज्ञेया

तां व्याचष्टे

मनः संकल्प उच्यते ।
संकल्पः क्रमतो ज्ञान-
मुन्मनं युगपत्स्थितम् ॥ ३९४॥

संकल्प इच्छा सा चेशितव्यविश्वक्रमासूत्रणात्मत्वात् क्रमतो ज्ञानमित्युक्तम् । उन्मनमुत्क्रान्तमुत्कर्षं च मनः प्राप्तं यत्र तदुन्मनं, युगपदिति विश्वस्यासूत्रणावभासननिर्माणाद्यनन्तशाखाशतभिन्नस्यापि अत्र नित्योदितानन्दघनस्वातन्त्र्यशक्त्याभासात्मत्वेनावस्थानात् ३९४

यत ईदृगुन्मनं ज्ञानमेवोन्मनाशक्तिः

तस्मात् सा तु परा विद्या

मायान्तावधिकात्मतत्त्वोर्ध्वस्थशुद्धविद्यादि-शक्त्यन्ताध्वव्यापकात् विद्यातत्त्वादियमन्यैव विद्या ॥

यस्मादन्या न विद्यते ।

ईदृशीत्यर्थात् एतयैव अशेषविश्वक्रोडी-कारात् ॥

तदाह

विन्दते ह्यत्र युगप-
त्सार्वज्ञ्यादिगुणान् परान् ३९५

परानित्यभेदरूपान् सर्वज्ञत्वादीन् यतो युगपदत्रोन्मनायां योगिवरो लभते तत इयं परा विद्या 'विद्लृ लाभे' इति धात्वर्थानु-गमात् ॥ ३९५ ॥

किंच

वेदनानादिधर्मस्य
परमात्मत्वबोधना ।

वर्जना परमात्मत्वे

तस्माद्विद्येति सोच्यते ॥३९६॥

अनादिधर्मः स्वातन्त्र्यशक्त्यात्मा स्वभाव तस्य वेदना विचारणा, आत्मनश्च यत्परमात्मत्वं शिवरूपत्वमस्ति तस्य बोधना अवगमहेतुः, अत एवापरमात्मत्वेऽतद्विषये इयं वर्जना संपद्यते । तस्मात् 'विद् विचारणे' 'विद ज्ञाने' इति धात्वर्थानुगमादियं विद्योच्यते ॥ ३९६ ॥

एवं च

तत्रस्थो व्यञ्जयेत्तेजः

परं परमकारणम् ।

परस्मिंस्तेजसि व्यक्ते

तत्रस्थः शिवतां व्रजेत् ॥३९७॥

तत्रेति उन्मनाख्यायां विद्यायां व्यञ्जयेदात्मीयमेवोन्मीलयेत् प्रत्यभिजानीयात् तेजः चिज्ज्योतिः परमसंकुचितं परमकारणं परमशिवरूपम् अतश्च शिवतां व्रजेत् तदैकात्म्यमियात् ॥ ३९७ ॥

एतद्दृष्टान्तेनोपपादयति

सुप्रदीप्ते यथा वह्नौ
शिखा दृश्येत चाम्बरे ।
देहप्राणस्थितो ह्यात्मा
तद्वल्लीयेत तत्पदे ॥ ३९८ ॥

देहमन्त्रप्राणात्मशिवपदानामौचित्यात् काष्ठारणिवह्नितच्छिखाम्बराणि दृष्टान्तः । तेनारणिमन्थनयुक्त्या सुप्रदीप्ते प्रज्वलिते वह्नौ सति यथा शिखा ज्वाला दाह्यं दग्ध्वाम्बरे दृश्यते तत्र लयात् तदात्मभावं प्राप्तावलोक्यते, तद्वद्दिव्यकरणमन्त्रारणिसमुत्तेजनेन देहे यः प्राणस्तस्मिन् सुप्रदीप्ते मध्योर्ध्ववाह्युदानाग्नितामायाति देहे स्थितो य आत्मा प्रोक्तशुद्धविज्ञानकेवलरूपो वह्निशिखातुल्यः समनान्तं समस्तं देहदारुं दग्ध्वा तस्मिन्पदे लीयते निरुपाधिपरमशिवैकात्म्यमेत्येवेत्यर्थः ॥ ३९८ ॥

इत्थमुक्तयुक्त्या परतत्त्वलीने

तद्वद्देवाभिमानस्तु
कर्तव्यो दैशिकोत्तमैः ।

तद्वत्परमपदवदभिमानः पूर्णाहंविमर्शः कर्तव्यः स्वीकार्यो नतु पाशवे शरीराद्यहंभावे वर्तितव्यमेतदर्थमेवोत्तमपदम् ॥

तमभिमानं स्फुटयति

अहमेव परो हंसः
शिवः परमकारणम् ॥ ३९९ ॥

एतत्पूर्वव्याख्याभिर्गतार्थम् ॥ ३९९ ॥

अतश्च

मत्प्राणे स तु पश्वात्मा
लीनः समरसीगतः ।

एवंविधस्य मम प्राणे प्रोक्तषडध्वव्याप्तिमये ॥

तं पूर्वोक्तयुक्त्या समरसीकृतम्

मन्त्रकरणक्रियायोगा-
द्योजयामि परे शिवे ॥४००॥

मन्त्रो निष्कलः, करणं दिव्यं, क्रियायोगो द्वाररोधोर्ध्ववाहाधरपदत्यागग्रन्थिभेदनाद्यात्मा ॥ ४०० ॥

नचैतद्वचनमात्रेण घटते, अपितु

एवं यो वेत्ति तत्त्वेन
अग्निवद्देहमध्यतः ।
यद्वद्वह्निशिखातीता
तद्वद्योजयते परे ॥ ४०१ ॥

तत्त्वेनानुभवरूढ्या[1] य एवमिति शिवाभेदं वेत्ति स इन्धनकल्पस्य देहस्य मध्येऽग्निवत्पाशानुत्प्लोषयति दीप्तभास्वज्ज्योतिर्मात्ररूपतया[2] स्थितः शिष्यात्मानं परे शिवे योजयते तदैकात्म्यमासादयति । कथम् वह्निशिखा अतिशयेन इता व्योम्नि लीना तदैक्यमाप्ता यद्वत्[3] ॥ ४०१ ॥

अतश्च

तस्मिन्[4]युक्तः परे तत्त्वे
सार्वज्ञ्यादिगुणान्वितः ।
शिव एको भवेद्देवि
अविभागेन सर्वतः ॥ ४०२ ॥

---

१ ख० ग० पु० निरूढ्येति पाठः । २ ख० पु० तायामिति पाठः ।
३ ख० पु० तद्वदिति पाठः । ४ ख० पु० अस्मिन्निति पाठः ।

युक्त इति योग ऐक्यम् । यथोक्तम्

'योगमेकत्वमिच्छन्ति.........।' (मा० वि० ४।४)

इति । एक इत्यविभागेन, सर्वत इत्यनेन चाभिन्नशिववादस्य वास्तवत्वं ध्वनति । सर्वज्ञत्वादिकमिहाभेदसारं मन्तव्यं नतु मन्त्रादिवद्भेदविषयम् ॥ ४०२ ॥

भावित्रितत्त्वदीक्षायां

'ज्ञात्वा तत्त्वे नियोजयेत् ।' (स्व० ४ । ४०४)

इति यद्वक्ष्यति तत्राप्येतदेव मन्तव्यमित्याह[1]

तत्त्वत्रयं परं ख्यात-
मपरं चाध्वमध्यगम् ।
भेदनं तु पदार्थानां
त्यागानुभवयोजनम् ॥ ४०३ ॥
पूर्वोक्तं च इदं सर्वं
ज्ञात्वा तत्त्वे नियोजयेत् ।

परं शुद्धात्मोन्मनापरशिवरूपं[2] यत्तत्त्वत्रयं प्रकाशितं, यच्चापरं स्थूलम् अध्वमध्यगमिति

१ ख० पु० अनुमन्तव्यमिति पाठः । २ ख० ग० पु० त्वोन्मेति पाठः ।

पञ्चमपटलभावितत्त्वभुवनाध्वदीक्षामध्ये[1] मायासदाशिवशिवान्तव्याप्त्या आत्मविद्याशिवाख्यं तत्त्वत्रयं पूर्वं प्रायश्चित्तशुद्धावपि निर्णीतमेतत् त्रितत्त्वदीक्षायां प्रधानरूपं, तथा पूर्वोक्तं भेदनादि चकाराच्चारं प्रमाणादिकं च ज्ञात्वा एतज्ज्ञानप्राधान्येनैव तत्त्वे परस्मिन् योजयेत् शिष्यमित्यर्थः । एतच्च दीक्षान्तरविषयमपीति मन्तव्यम् ॥ ४०३ ॥

अथेह परतत्त्वस्वरूपं निश्चिन्वन् भाविचतुर्भेदतत्त्वदीक्षामध्ये असंगृहीतामपि एकतत्त्वदीक्षां प्रसङ्गेन सूचयितुमाह

संक्षेपेण तु तत्त्वस्य
व्याप्तिं शृणु सुरेश्वरि ॥४०४॥

सुराणां ब्रह्मादिशिवान्तानां कारणानामीश्वरि परस्वातन्त्र्यशक्तिरूपे ॥ ४०४ ॥

विद्यातत्त्वास्पदं बद्ध्वा
बिन्दुतत्त्वासने स्थितः ।

---

१ ग० पु० भुवनादीति पाठः ।

नादशक्तितनुश्चैव
व्यापिनीकरणान्वितः ॥४०५॥

विद्यातत्त्वे शुद्धविद्यायां प्रोक्तकरणावष्टम्भलभ्यमध्यविकासेनास्पदमवस्थितिं बद्ध्वा; अथ च विद्याया मातृकायास्तत्त्वे मूलमन्त्रे वा स्थितिं बद्ध्वा तदुच्चारावहितो भूत्वा, मान्त्रे बिन्दुतत्त्वे अभिन्नवेद्यज्योतीरूपेऽशेषविश्वविश्रान्तिस्थानत्वादासने स्थितोऽधिरूढः, नादो विमर्शमात्ररूपो ह्लादानुभवात्मकः शक्त्यन्तस्तनुः शरीरं यस्य, व्यापिनी शक्त्यन्ताध्वव्यापिका करणमान्तरमुपलब्धिसाधनं यस्य गुरोः स सर्वं ज्ञात्वा तत्त्वे नियोजयेदिति पूर्वोक्तेन संबन्धः ॥ ४०५ ॥

अस्य करणरूपा या व्यापिनी

सर्वज्ञत्वावबोधेन
समना

सैवेत्यर्थः ॥

अन्तश्चरा तु सा ।

---

१ ख० पु० आश्रित इति पाठः ।

सैवास्यान्तःकरणमित्यर्थः ॥

एवमीदृशे तत्त्वासने शरीरान्तर्बहिष्करणस्यास्य

त्रितत्त्वं यत्परं प्रोक्तं
तेन चापूरिता तनुः ॥४०६॥

परादिशक्तित्रयमयेन[1] आत्मकल्पेनेत्यर्थः॥४०६

एतच्च त्रितत्त्वं[2] यस्माद्ध्वातीतं समनान्तमतिक्रम्य स्थितं तस्मात्परं तत्त्वं, यत्तु मायासदाशिवशिवव्याप्त्या तदपरं यस्माद्ध्वमध्यगम्, अत एवापरेणात्मादितत्त्वत्रयेण धरादेः शिवान्तस्यान्तःकृतत्वात् तदारब्धा

अपरा सा तनुः स्थूला
षट्त्रिंशत्तत्त्वकल्पिता ।

इयं पुनः

तत्त्वत्रयं परं यच्च
सर्वतत्त्वाध्ववर्जितम् ॥ ४०७ ॥
तेन चापूरिताशेषं
सा तत्त्वाध्वपरा तनुः ।

---

१ ख० पु० कल्पेनेति पाठः । २ ख० पु० त्रितयमिति पाठः ।

समस्ताध्वातिक्रान्तं यत् शुद्धात्मादितत्त्व-[1]त्रयं तेनोक्तसतत्त्वेनाशेषं कृत्वा आपूरिता सर्वात्मताभासनेन व्याप्ता या प्रक्रान्ता नाद-शक्त्यात्मा तनुः सा तत्त्वाध्वनः सकाशात्परा प्रकृष्टा ॥ ४०७ ॥

एवमीदृक्शिवाभेदविमर्शमय एव यथार्थ आचार्यो भवतीत्याह

एवमाचरते यस्तु
आचारं तु शिवात्मकम् ॥४०८॥
शिवेन सहचारित्वा-
दाचार्यस्तेन चोच्यते ।

आचारः प्रोक्तस्फारानुप्रवेशः । सहचारित्वं तदभेदविमर्शपरमार्थम् ॥ ४०८ ॥

अस्य माहात्म्यमाह

तस्य दर्शनसंभाषा-
स्पर्शनात्स्मरणादपि ॥ ४०९ ॥
भवत्येवैश्वरी व्याप्ति-
र्न भवेत्तदधोगतिः ।

१ ख० पु० शुद्धविद्यादीति पाठः ।

यतोऽस्य करणानि प्रोक्तव्यापिनीसमनाव्याप्तिमयानि ततस्तत्सङ्गादीश्वरस्य शिवतत्त्वस्य व्याप्तिर्भवत्येव देहान्ते नतु शिवादधः प्रवृत्तिः कदाचिदपि, योऽपि तं तथारूपं भक्त्या पश्यति सोऽप्येवं, तेन तस्येति कर्तरि कर्मणि च षष्ठी ॥ ४०९ ॥

यस्तु अनुत्तरशक्तिपातवशात्

तेन संयोजितो जन्तुः

स

ब्रह्महापि शिवो भवेत् ॥४१०॥

परमशिव एव ॥ ४१० ॥

तदेवं भवति

ततस्तेन समो नास्ति
जगत्यस्मिंश्चराचरे ।

तेन शिवैकात्मनाचार्येण कः समः तस्यैकत्वात्[1] ॥

अतश्च

1 ख० पु० शिष्यस्यैकत्वादिति पाठः ।

शिव आचार्यरूपेण
लोकानुग्रहकारकः ॥ ४११ ॥

अनुजिघृक्षापरो हि परमशिव आचार्यदेहमास्थाय पशूनां पाशान्निकृन्तति ॥ ४११ ॥

यत एवम्

तस्मान्न मानवीं बुद्धिं
कारयेद्देशकं प्रति ।

दिशत्युपदेशमिति देशकः उपदेष्टा, तस्मिन् दौरात्म्यान्मानवीं बुद्धिं कुर्वन्तं निवर्तयेदित्यर्थः ॥

यतो येऽप्येते मायोर्ध्ववर्तिनोऽनन्तभट्टारकाद्यास्तेऽपि

आचार्यस्य च मन्त्रस्य
शिवज्ञाने शिवस्य च ॥४१२॥
नानात्वं नैव कुर्वन्ति
विद्येशाश्चक्रनायकाः ।

चक्रस्य विद्याग्रामस्य नायकाः प्रभवः स्वस्वरूपज्ञापकाश्च, शिवज्ञाने[1] पारमेशे शास्त्रे

१ ख० पु० शैवे इति पाठः ।

आचार्यस्योपदेष्टुर्मन्त्रस्य शिववाचिनो निष्कलादेस्तद्वाच्यस्य च शिवस्य भेदं न कुर्वन्ति नैतद्भिन्नं पश्यन्तीत्यर्थः, आचार्यादेव शिवशास्त्रमन्त्रशिवानामवगमात्। यत्र च विद्येश्वरा अप्येवमभेदं मन्यन्ते तत्र तदनुगृहीतैः कथं भेदधीः कार्या॥ एवं च ये आचार्यशिवमन्त्रानैक्येन जानन्ति ते विद्येश्वरा इति मन्त्रेश्वरस्फारमेव विशन्ति॥ ४१२॥

युक्तं चैतत्, यतः

ब्राह्मणाः क्षत्रिया वैश्याः
शूद्रा वै वीरवन्दिते॥ ४१३॥
आचार्यत्वे नियुक्ता ये
ते सर्वे तु शिवाः स्मृताः।

शिवाचार्य एव हि आचार्यो युक्तः॥ ४१३॥

ये तु आचार्यमित्थं न मन्यन्ते ते प्रत्यवायिन इत्याह

अन्यथा प्राक्स्वरूपेण
ये पश्यन्ति नराधमाः॥४१४॥

नरके ते प्रपंच्यन्ते[1]
सादाख्यं वत्सरत्रयम् ।

अधमत्वं गृहीतदीक्षाणामपि गुरुद्वेषेण विलयशक्त्याघ्रातत्वात् । सादाख्यवत्सरमानमेकादशे पटले भविष्यति ॥ ४१५ ॥

पातकिसंगतिरपि पापायेत्याह

न तेन सह संभाषा
कर्तव्या तु शिवार्थिना ॥४१५॥
कृत्वा संभाषणं तेन
नरकं सोऽपि गच्छति ।

यत एवम्

तस्माच्छिवसमाः सर्वे
द्रष्टव्या मुक्तिमिच्छता ॥४१६॥

यस्मात्

भुक्तिमुक्तिफलावाप्ति-
र्भवत्येव तदाज्ञया ।

अस्य चेयान् प्रभावो यदयम्

---

१ क० पु० प्रपद्यन्ते इति पाठः ।

आचार्यः स्वजनानां च
कुलकोटि[टीः]सहस्रशः ४१७
ज्ञानज्ञेयपरिज्ञानात्
समस्तांस्तारयिष्यति[1] ।

स्वे आत्मीया विद्यासंबन्धिनो जनाः शिष्याः तेषां चकारादात्मनश्च सहस्रशः कुलकोटि[टीः]ज्ञानस्य तावदनुग्राह्यानुग्रहाभिसंधिपूर्वं परशक्तिस्फारानुप्रवेशस्योपायरूपस्य, ज्ञेयस्य चोपादेयस्य परतत्त्वस्य, परितः समन्तादविकल्पसविकल्पसमापत्तिभ्यां परतत्त्वविश्रान्त्यात्मकात् शिष्यप्रशिष्यादिक्रमेणानन्तकालव्यापिनश्च ज्ञानात्तारयिष्यति संसाराब्धेरुद्धरिष्यति। ज्ञानज्ञेयपरिज्ञानमेव गुरोर्मुख्यं रूपम्। यथोक्तं प्राक्

'ज्ञानज्ञेयविशारदम्।' (१।१६)

इति ॥ ४१७ ॥

एतदुपसंहरन् प्रकृतमाह

एवमुक्तविधानज्ञो
भावज्ञश्चापि दैशिकः ॥ ४१८॥

---

१ ख० पु० समस्तानिति क० पु० सर्वांस्तानिति पाठः ।

पूर्णाहुत्यैकयैवासौ
पशून्योजयते परे ।

उक्तं प्राणचारादिविधानं, भावः परतत्त्वभावनात्मा ॥

पूर्णाहुतौ प्रयोगं जिज्ञासुं देवीं प्रति आह

पूर्णाहुतिप्रयोगं तु
कथयाम्यधुना तव ॥ ४१९ ॥

पूर्णत्वार्थमाहुतिप्रयोगमाह

ऊर्ध्वकाय ऋजुग्रीवः
समपादो व्यवस्थितः ।
नाभिस्थाने स्रुचो मूल-
मुत्तानाग्रमुखं समम् ॥ ४२० ॥
स्रुच्युपरि स्रुवं देवि
कृत्वा चैवमधोमुखम् ।
पुष्पं दत्त्वा स्रुगग्रे तु
दर्भेण सहितौ करौ ॥ ४२१ ॥
मुष्टिना चैव हस्ताभ्यां
गृहीत्वा यत्नतोऽपि च ।

१ ग० पु० प्रयत इति पाठः ।

अग्रतो दक्षिणं हस्तं
वामं वै पृष्ठतः प्रिये ॥ ४२२ ॥
मुष्टिभ्यां संगृहीत्वा वै
उत्तानकरयोगतः ।
ततो घृतेन संप्लाव्य
अभिमानं तु कारयेत् ॥ ४२३ ॥
अहमेव परं तत्त्वं
परापरविभागतः ।

ऊर्ध्वकाय उत्थितः, उत्तानमग्रस्थितवेदिकापुष्करादिरूपं मुखं यत्र, सममृजुतया स्थितं, स्रुच्युपरि स्रुवमिति शिवशक्तिव्यापकौ स्रुक्स्रुवौ परस्परोन्मुखौ कृत्वा, अत एव च पुष्पदानम् अतश्च शिष्यस्य शक्तिस्त्यक्ताधःप्रसरा शिवोन्मुखा शिवेन संमुखेन [1]स्पृष्टेति भावनीयम् । करावित्यत्र कृत्वेति शेषः, हस्ताभ्यामूर्ध्वाधःस्थिताभ्यां दक्षवामाभ्यां कृतो यः प्रत्येकं मुष्टिस्तेन अत एव मुष्टिभ्यामित्युक्तिः । यत्नत इत्यनवलिप्ततया, अग्रत इति स्रुङ्-

१ ख० पु० ऊर्ध्वं तिष्ठेति पाठः ।

मूलगतवामापेक्षया, दक्षिणमिति स्रुववदधोमुखं शिवव्याप्त्या, वाममिति स्रुग्वदुत्तानं च शक्तिव्याप्त्या, यदाह उत्तानेन करेण यो योग इत्यर्थादधोमुखस्य दक्षिणस्य वामेन । संप्लाव्येति संपूरितां स्रुचं कारयित्वा, अहमेव परं तत्त्वं[1] परापरेति प्राग्वत्परसूक्ष्मस्थूलरूपतया स्थितमित्यभिमानं निश्चितां प्रतिपत्तिं कारयेत् कुर्यात् ॥ ४२३ ॥

नचैतदभिमानमात्रं यतः

तत्त्वमेकं हि सर्वत्र

सर्वं हि चेत्यमानत्वात्[2] चिन्मात्रपरमार्थमेव॥

अतश्च

नान्यं भावं तु कारयेत्॥४२४॥

कारयेदिति प्राग्वत् मायाप्रमातृतासुलभं भेदाभिमानं त्यजेदित्यर्थः ॥ ४२४ ॥

किंच

यत्कुम्भेऽध्वात्र विन्यस्तः
षट्प्रकारो वरानने ।

---

१ क० पु० शिवतत्त्वमिति पाठः । २ क० पु० वेद्येति पाठः ।

मण्डलेऽग्नौ शिशोरन्तः
साधारणविकल्पितः ॥ ४२५ ॥
स्रुच्यध्वानं तमारोप्य
प्राणस्थं नाडिमध्यगम्[1] ।
प्राणधारे समीकृत्य
स्रुचा धारां विनिक्षिपेत् ४२६

कुम्भमण्डलाग्निशिशुगतं षड्विधमध्वानमाज्यरूपतया स्रुचि मध्यनाडिप्रतिच्छन्दकरूपायामारोप्य पूर्वोक्तयुक्त्या प्राणस्थितं च तं मध्यनाडिगतं कृत्वा अत एव मध्यमं प्राणं धारां चाज्यसंबन्धिनीं स्रुग्गतां समीकृत्येति मात्रवह्निद्रावितषडध्वरसमयतया भावयित्वा तां धारां क्षिपेत् ॥ ४२६ ॥

कथं क्व चेत्याह

वसुधाराप्रयोगेण
प्रक्षिपेज्जातवेदसि ।

अविच्छिन्नसंतत्या शिवाग्नौ द्वादशान्तस्थे बाह्ये च प्राणमाज्यधारां चाविभागभावनया[2]

---

१ पु० नाडीति पाठः । २ क० पु० भावभावनेति ग० पु० भागभावनेति पाठः ।

जुहुयादित्यर्थः वसवेऽभीष्टफलायात्युच्चैर्धारा-प्रयोगेन ॥

अत्रेतिकर्तव्यतामाह

नाभिस्थाने स्रुचो मूलं
नयेन्नासान्तगोचरम् ॥ ४२७ ॥
यथा यथा त्यजेद्धारां
तथा प्राणं समुच्चरेत् ।

नाभिस्थाने यत्स्रुङ्मूलं स्थितं तन्नासाग्रं प्रापयेत् धारापातानुसाराय मध्यप्राणं सम्यगभ्यस्तवाहचारेण ऊर्ध्वं चरेत् द्वादशान्तविश्रान्तं कुर्यात् ॥ ४२७ ॥

एवं सति न केवलं हुतषडध्वरसमयी धारा यावत्

प्राणोऽपि वर्णतां याति
षड्विधाध्वमयस्तु सः ॥ ४२८ ॥

यः षडध्वमयः प्राणः सोऽपि वर्णतां मात्रपरामर्शतां याति ॥ ४२८ ॥

एवं च सति

षड्विधेऽध्वनि नातोऽन्यः
प्रमेयो विद्यते क्वचित् ।

षड्विधेऽध्वनि यः कश्चित्प्रमेयः सोऽस्मिन्नवसरे अत इति मात्रात्परामर्शात् नान्यः क्वचिदपि जागरादौ विश्वत्र सर्वस्य मात्रपरामर्शशेषीकृतत्वात् ॥

यत एवं

तस्मान्मान्त्रे परामर्शे
हेयोपादेयतः स्थिताः ॥४२९॥

ये हेयतया स्थिताः समनान्ताः पदार्था ये चोपादेयतया शुद्धात्मोन्मनापरमशिवाः स्थितास्ते मन्त्र एव वाचकेऽन्तरभिन्नवाच्यात्मतया स्थिताः ॥ ४२९ ॥

[1]यस्मान्मन्त्रैरकारादिध्वनिरूपैः

वर्णैः कारणषट्कं तु

पूर्वोक्तं तत्तत्तत्त्वाधिष्ठातृरूपं व्याप्तम्, अतस्तद्व्या[2]प्त्यैव विश्वं स्वीकृतमेभिः ॥

---

१ ख० पु० तस्मादिति पाठः । २ क० ग० पु० तद्व्याप्त्येति पाठः ।

अतश्च

षट्त्यागात्सप्तमे लयः ।

कार्य इति शेषः ॥

यदवधिकं कारणषट्कं यावद्भिर्मात्रैर्ध्वनिभिर्व्याप्तं तद्धेयत्वेन दर्शयति

अकारश्च उकारश्च
मकारो बिन्दुरेव च ॥ ४३० ॥
अर्धचन्द्रो निरोधी च
नादश्चैवोर्ध्वगामिनी ।
शक्तिश्च व्यापिनी ह्येताः
समना च ततः परम् ॥ ४३१ ॥
समनान्तं वरारोहे
पाशजालमनन्तकम् ।
कारणैः षड्भिराक्रान्तं
मन्त्रस्थं हेयलक्षणम् ॥ ४३२ ॥

पूर्वमेव व्याख्यातमेतत् । ऊर्ध्वगामिनी नादान्तदशा । अस्य मात्रस्य प्रमेयैकादशकस्य भेदकल्पनामयत्वेन हेयत्वमभेदविमर्शात्मत्वे तु उपादेयतेति प्राग्विभक्तमेव ॥ ४३२ ॥

मन्त्रस्थं हेयमुक्त्वा उपादेयं प्रस्तौति

अत्र पाशोपरि ह्यात्मा
व्योमवह्निन्दु[च्चित्सु]निर्मलः ।
शिवतत्त्वगुणामोदा-
च्छिवधर्मावलोककः ॥ ४३३ ॥

समनान्तपाशातिक्रमादेव चिता सुष्ठु निर्मलः शिवतत्त्वस्य सदाशिवस्य संबन्धिभिरभेदसर्वज्ञत्वादिभिर्गुणैरभिलक्ष्यमाणैर्जनितादामोदात् प्रहर्षादेव शिवस्य धर्मं पूर्णपञ्चविधकृत्यस्वातन्त्र्यं प्राप्यत्वेनावलोकयति नत्वद्यापि प्राप्ततद्रूपः ॥ ४३३ ॥

यतः

पाशावलोकनं त्यक्त्वा
स्वरूपालोकनं हि यत् ।
आत्मव्याप्तिर्भवेदेषा

पाशानां समनान्तानामवलोकनमात्मत्वेनाभिमननं स्वरूपं पाशोत्तीर्णचिन्मात्रत्वं यदेतावत्पर्यन्तात्मव्याप्तिः ॥

शिवव्याप्तिस्ततोऽन्यथा ॥४३४

तां प्रतिपादयति

सार्वज्ञ्यादिगुणा येऽर्था
व्यापकान्भावयेद्यदा ।
शिवव्याप्तिर्भवेदेषा
चैतन्ये हेतुरूपिणी ॥ ४३५ ॥

ये वक्ष्यमाणाः सर्वज्ञत्वसर्वकर्तृत्वादिगुणा[1] धर्माः परमोपादेयत्वेनार्थ्यमानत्वादर्थाः तान्व्यापकानिति अशेषमन्तरभेदेन क्रोडीकुर्वतो यदा स्वात्मनि[3] भावयेत् तदा तद्भावनापरिनिष्पत्तिरात्मनः शिवव्याप्तिः, सा च भावके चैतन्ये हेतुरूपिणी प्रयोजिका, तत्प्रसादादेव शुद्धात्मनः तद्भावनाप्ररूढेः ॥ ४३५ ॥

यतोऽयमेवं सर्वज्ञत्वादिगुणयुक्तः

अतो धर्मिस्वभावो हि
शिवः शान्तश्च पठ्यते ।

विश्वस्य भित्तिलग्नत्वेनैव स्फुरणाद्धर्मकल्पस्यासौ धर्मिकल्पो, निःशेषभेदोपशमात् शान्तः,

---

१ ग० पु० परमशिवस्येति पाठः । २ ग० पु० दिरूपा इति पाठः ।
३ ख० ग० स्वात्मन इति पाठः । ४ ख० पु० मयत्वेनेति पाठः ।

अभेदसार्वज्ञ्यादियोगेन श्रेयोरूपतया शिवः, पठ्यते इत्यागमेषु ॥

एवं पठ्यमानोऽप्यसौ वस्तुतो न शब्दगोचर इत्याह

उन्मनाश्च मनोग्राह्यः

उन्मनाः शक्त्यभेदात्मनो विषयत्वाभावात् वस्तुतो न शब्दवाच्य इत्यर्थः ।

न केवलमीदृक् शिवो यावत्

आत्मबोधे स्थितोन्मनाः ४३६

शिववदात्मापि मन उत्क्रम्य मनोभूमिमुज्झित्वा बोधे संविन्मात्रे पूर्णत्वसर्वज्ञत्वसर्वकर्तृत्वाद्यात्मनि स्थितः । स्थितश्चासौ उन्मनाश्चेति समासः ॥ ४३६ ॥

यतश्चात्मा शिवश्च न मनोगोचरस्ततः

व्यापारं मानसं त्यक्त्वा
बोधरूपेण योजयेत् ।
तदा शिवत्वमायाति
पशुर्मुक्तो भवार्णवात् ॥४३७॥

'तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ।' (स्प० ३।१) इति स्पन्ददृशा[1] आदौ शिष्यात्मानं स्वात्मनि समरसीकृत्य समनान्तमतिक्रम्य शुद्धात्मनि स्थितिं बद्ध्वा बोधरूपेणेति अविकल्पसंवित्स्पर्शेनैव उन्मनाशक्त्यनुप्रवेशप्रमुखं शिवे योजयेत् ॥ ४३७ ॥

अत्र चावसरे

परे चैव नियुक्तस्य
स्रुवमापूरयेत्पुनः ।
स्रुचो रन्ध्रेण तद्द्रव्यं
यावद्वह्नौ प्रयुज्यते ॥ ४३८ ॥
बहिःस्थं कुम्भकं ताव-
त्परे तत्त्वे तु भावयेत् ।

बहिरिति ऊर्ध्वरेचकान्ते द्वादशान्ते ॥

एवं च यत्

बहिर्निरोधभावेन
सामरस्यं शिवेन च ॥ ४३९ ॥

चशब्दाच्च तच्छक्त्यापि ॥ ४३९ ॥

[1] ख० पु० दिशेति पाठः ।

तत्

अन्यथा न भवेद्देवि

न कदाचिदेतस्याशिवीभावहेतुरित्यर्थः ॥

अत्र दृष्टान्तः

नदीवेग इवार्णवे ।

एतत्स्फुटयति

स्थितः स सागरेऽद्भिस्तु
सिन्धुः समरसीभवेत् ॥४४०॥
पुनर्विभागं नाप्नोति
तथात्मा तु शिवार्णवे ।

अद्भिरिति सागर[1]संगताभिः । सिन्धुर्नदी ॥

बहिःस्थकुम्भकभावनाया अवधिमाह

स्रुचस्तु पूरणं याव-
त्तावत्कालं समादिशेत्॥४४१॥

स्रुचः सकाशादाज्येन यावत्पूरणमिति वह्नौ पूर्णाहुतिर्यावद्भवति तावद्बहिः कुम्भकं सम्यगा समन्तात् दिशेत्प्रापयेत् ॥ ४४१ ॥

---

1 घ० पु० सागरसत्काभिरिति पाठः ।

तदित्थं पूर्णाहुतौ

अनेनैव तु कालेन
बहिः कुम्भकवृत्तिना ।
आत्मा समरसत्वेन
शिवीभवति सर्वगः ॥ ४४२ ॥

एवं शिष्यशिवीकरणानन्तरम्

गुणानापादयेत्पश्चात्

षट्

वक्ष्यमाणान् सर्वज्ञत्वादीन् गुणान् ॥

कीदृशान्

अङ्गपरिमाहुतीन् ।

अङ्गैर्नैष्कलैरङ्गमन्त्रैरेव अङ्गपरिमा अङ्गसंख्याकाः षडेवाहुतयो येषां तान् ॥

शिवत्वे प्राप्ते यद्यपि तदभिन्ना गुणा अपि प्राप्ताः तथापि तेऽस्य स्पष्टमात्रप्रत्यवमर्शपूर्वकस्वनादोदीरणेनापि [1]स्पष्टीकार्या एवेति दृष्टान्तपूर्वं निर्दिशति

---

१ ख० ग० स्फुटीकाया इति पाठः ।

यथा नृपत्वे संप्राप्ते
कलशैश्चाभिषिच्यते ॥ ४४३ ॥
वन्दिभिश्च गुणास्तेऽपि
ख्याप्यन्ते वसुधातले ।
तथा शिवत्वे संप्राप्ते
गुणानापादयेद्बुधः ॥ ४४४ ॥

दार्ष्टान्तिके कलशाभिषेकं
'दद्यात् ततोऽभिषेकं तु ……………। (।४४८)
इत्यत्र वक्ष्यति । वन्दितुल्या अङ्गमन्त्राः ॥
गुणापादने प्रयोगमाह

सर्वज्ञो वै भव स्वाहा
परितृप्तस्तथैव च ।
अनादिबोधो भव च
ततः स्वातन्त्र्यशक्तिकः॥४४५॥
तथा त्वलुप्तशक्तिश्चा-
नन्तशक्तिस्ततः पुनः ।

अत्र च प्रणवपूर्वा हृदादिमन्त्राः षट् क्रमेण पूर्वं योज्याः। सर्वज्ञा अपि कपिलादयो निर्विमर्शचिन्मात्रत्वेनानन्दशक्तिरूपतृप्तिरहिताः ।

केचित्तु आनन्दशक्तियुक्तत्वेऽपि भावनया तद्रूपतां प्राप्ताः नतु अनादिबोधाः। दीक्ष्यस्य तु अनादिबोधत्वं स्थितमेव सदभिव्यज्यते नतु अपूर्वं जन्यते । केचित्तु सदा सर्वज्ञतया अनादिबोधा अपि निर्माणशक्तिविकलत्वात् स्वातन्त्र्यहीनाः सृष्ट्यादिकर्मणि स्वतन्त्रा अपि ब्रह्मादयो न नित्यमलुप्तशक्तिकाः निजासु रात्रिषु व्यामूढत्वात्। मन्त्रमन्त्रेश्वरादयस्तु अव्यामूढत्वेऽपि नानन्तशक्तिकाः तदपेक्षया विश्वस्य भिन्नत्वेन शक्तिरूपत्वाभावादित्येकस्यापि शिवनाथस्येत्थं व्यावृत्तिभेदेन सर्वज्ञत्वादयः षट् गुणा व्याख्येयाः ॥

गुणानां गुणविश्रान्तिसारतां स्फुटयितुं मूलविश्रान्तिपूर्वं मूलेनैव षडाहुतीर्दद्यादित्याह

गुणानापाद्य सर्वांस्ता-
न्मूलमन्त्रमनुस्मरेत् ॥ ४४६ ॥
ओंहूमात्मपदोपेतं
सर्वज्ञायेत्यपश्चिमम् ।

स्वाहाकारप्रयोगेण
आहुतीः प्रतिपादयेत् ॥४४७॥

आत्मपदं दीक्ष्यनामपूर्वं चतुर्थ्यन्तं यतः

अनिर्दिष्टसमाख्यं च यत्कृतं तत्तथा भवेत् ।
तदुद्दिश्य कृतं कर्म..........संशयः ।'

इत्युक्तमन्यत्र। सर्वज्ञायेत्युपलक्षणं तेन तृप्तायेत्याद्यपि। तच्च अपश्चिमामिति एतावदन्तं पूर्वमुच्चार्य स्वाहाकारेणाहुतीर्दद्यात् ॥ ४४७ ॥

ताश्च संभवव्यवसायानुसारम्

तिस्रः पञ्च दशैका वा

अत्यन्तमसंभवे चैकाहुतावपि न क्षतिः ॥

द्रव्यविषयेऽपि अत्र विकल्प एवेत्याह

तिलैर्वाथ घृतेन वा ।

दीक्षान्ते शिष्यस्यावभृथस्नानमाह

दद्यात् ततोऽभिषेकं तु
मूलमन्त्रेण सुव्रते ॥ ४४८ ॥

मूलमन्त्रमन्त्रितेन शिवकुम्भेन मूलमन्त्रोच्चारेण वा इत्यर्थः ॥ ४४८ ॥

---

१ ग० पु० मोक्षं चतुरेति पाठः ।

कथम्

परं शक्त्यमृतं क्षोभ्य
शिष्यमूर्ध्नि निपातयेत् ।
तुर्यद्वारं विशेत्तद्धि
सबाह्याभ्यन्तरं स्मरेत्॥४४९॥

द्वादशान्ते विश्रम्य तत्स्थानमानन्दस्पर्शात्मकं परं शक्त्यमृतं क्षोभयित्वा विमृश्य शिष्यस्य द्वादशान्तान्मूर्ध्नि पतितं भावयन् कलशाद्धारां पातयेदित्यर्थः । तुर्यद्वारं तुर्यानुभवप्रधानं ब्रह्मरन्ध्रम् ॥ ४४९ ॥

अभिषेके प्रयोजनमाह

मन्त्रशक्तिभिरुग्राभिः
शोषनिर्दहनादिभिः ।
शरीरं शोष्यते ताभि-
स्तदर्थमभिषेचनम् ॥ ४५० ॥

ताभिः पूर्वोक्ताभिर्मन्त्रशक्तिभिः । शोषनिर्दहनादिभिरिति करणे तृतीया । तदर्थमिति शोषनिवृत्तये ॥ ४५० ॥

अथ

दीक्षानिर्वर्तनात्पूर्वं
पुष्पं पाणौ प्रदापयेत् ।
दर्भं विमोचयित्वा च

पूर्वं .... कल्पनाय दत्तं दर्भं विमुञ्चेति शिष्यं प्रयुज्य पारितोषिकं पुष्पमस्य हस्ते दद्यात् । यद्वा णिच् विवक्षितस्तेन गुरुरात्मनः पाणौ प्रदापयेत् देहीति शिष्यं प्रयुञ्जीत विधिर्दक्षिणाहीनो मा भूदित्यभिप्रायात् । एवं च वदन् गुरोः निःस्पृहत्वं सूचयति । शिष्यस्तत्कालं वित्तशाठ्यहीनो यद्ददाति ददातु तत्, गुरुणा तु निःस्पृहेणैव भाव्यमित्यर्थः ॥

अथ शिष्यः

शिवाग्नौ कलशे गुरौ ॥४५१॥

प्रत्येकम्

प्रदक्षिणत्रयं कृत्वा
दण्डवन्निपतेद्भुवि ।

---

१ क० ग० पु० पश्चादिति पाठः ।

चतुरधिकरणः शिवो मम प्रकर्षेण दक्षिणोऽनुकूलः सर्वदशासु आदिमध्यान्तपदेष्वस्त्वित्याशयेन त्रिः प्रदक्षिणीकरणं, दण्डवन्निपतनं शरीरादित्रिगुणीकरणेन शिवसमावेशाय ॥

अत एव

कृतकृत्यः प्रहृष्टात्मा
भवोत्तीर्णः सुनिर्मलः ॥ ४५२ ॥
प्रोत्फुल्लनयनः शान्त-
स्तृप्तात्मानं तु भावयेत् ।

कृतं पाशक्षपणशिवत्वव्यक्तिरूपं कृत्यं यस्य, अत एव प्रहृष्टात्मा पूर्णचिदानन्दानुभवोऽतश्च भवादुत्तीर्णः परमशिवत्वव्यक्त्या सुष्ठु निर्मलः तथाभूतः सन् अपि व्युत्थानाद्यवसरेषु तृप्तात्मानमिति गुरूपदेशादिसमये पूर्णानन्दघनमात्मानमनुभूतचरं भावयेत् येन सदैव तन्मयीभवति । अत्रोपायप्रकटनाय विशेषणद्वारकं हेतुमाह प्रोत्फुल्लनयनः शान्त इति

'कैवल्यं जायते सद्यो नेत्रयोः स्तब्धमात्रयोः ।'
(वि० भै० श्लो० ११३)

इति रहस्यदृष्ट्यनुसारेण निर्लक्ष्यस्तब्धदृष्टिबन्धः शान्तो विगलिताभिलाषप्रक्षीणसकलविकल्पजालश्च ॥

उपसंहरति

इयं नैर्वाणिकी दीक्षा
निर्बीजा वा सबीजिका॥४५३॥

'अथ दीक्षाध्वशुद्ध्यर्थं...............' (स्व० ४।७९)

इत्युपक्रम्य

'पाशसूत्रं समादाय शिष्यदेहेऽवलम्बयेत् ।' (स्व०४।९१)

इत्यतः प्रभृति

'...............दण्डवन्निपतेद्भुवि ।' (स्व० ४।४५२)

इत्यन्तं या निर्बीजा वा सबीजा वा दीक्षोक्ता सा उभय्यपि निर्वाणप्रयोजना । वाग्रहणेनेदमाह द्वयोरपि दीक्षयोः प्रोक्तो यः पाशक्षपणशिवयोजनात्मा विधिः स तुल्यः, केवलं निर्बीजायां मायीयपाशशुद्धिभावनावसरे समयपाशमपि अन्तःशुद्धं भावयेत् नतु तेषां शुद्धौ विध्यन्तरमस्ति । पूर्वं हि

'समयाचारपाशं तु निर्बीजायां विशोधयेत् ।'(स्व० ४।१४७)

इत्येतावन्मात्रमुक्त्वा

'एवं भावानुसारेण शिष्याणां गुरुणा सदा ।
फलं तु विविधाकारं निष्पाद्येत सुदीक्षया' (स्व०४।१५०)

इत्युक्तम् । तथा

'............मुख्याः पाशा इमे स्मृताः ।
सूक्ष्मपाशाननेकांश्च तदन्तर्भावयेत्.........।।'

इत्यप्युक्तम् । अतो निर्बीजायां समयपाशा मायीयपाशान्तर्भूता एव शोध्यत्वेन भाव्याः तेषां क्रव्यादभोगप्रदत्वश्रुतेः मायीयपाशान्तर्भावस्यैवोदितत्वात् । अत एव श्रीपूर्वशास्त्रे कण्ठगतमायीयपाशशुद्ध्यन्ते समयपाशशुद्धि-रुक्तेत्येतावतैव तन्त्र[1]भेदः । एवं दीक्षाद्वय-विधेरेकरूपत्वेनोपसंहृतत्वात् यत् पूर्वं[2] पुर्य-ष्टकांशार्पणं निर्बीजैकविषयमुक्तं तदयुक्तमेव मन्तव्यम् ।। ४५३ ।।

एवं समयपुत्रकयोर्दीक्षामुक्त्वा आचार्य-साधकयोः प्रक्रमते ताम्

येषां सबीजिका दीक्षा
कुर्यात्तेष्वभिषेचनम् ।

विद्वद्द्वन्द्वसहानां तु सबीजेत्युक्तत्वात्

---

१ ख० पु० तन्त्रेति पाठः । २ ख० ग० घ० ङ० पु० पूर्वपुर्यष्टकानां तर्पणमिति पाठः ।

तानेवाचार्यत्वे[1] साधकत्वे वाभिषिञ्चेदित्यर्थः ॥

तत्र

श्रुतशीलसमाचारा-
न्देशकत्वे नियोजयेत् ॥ ४५४ ॥

श्रुतं पारमेश्वरसंहितायां गुरुतस्तात्त्विकार्थपरिज्ञानं, शीलं वाङ्मनःकायविषया यमनियमाः, सम्यगाचारः शास्त्रानुष्ठानात्मा, एते विद्यन्ते येषां तान्; दिशतीति देशकः उपदेष्टा आचार्यः; तद्रूपत्वे नियुञ्जीतेत्यर्थः ॥

अथाभिषेक आचार्ये
शिवयोगादनन्तरम् ।

शिवयोगो योजनान्तो दीक्षाविधिस्तस्य पश्चात् ॥

केन कार्य इत्याह

पञ्चभिः कलशैर्भद्रे
सितचन्दनलेपितैः ॥ ४५५ ॥
शिवकुम्भवदभ्यर्च्य
[2]रत्नगर्भाम्बुपूरितैः ।

१ ख० ग० पु० त्वेनेति पाठः । २ ख० पु० रत्नगन्धेति पाठः ।

ऋद्धिवृद्ध्यादिभिः पूतै-
रोषध्यक्षतपूरितैः ॥ ४५६ ॥
सितपद्ममुखोद्गारै-
श्चूतपल्लवसंयुतैः ।

ऋद्धिवृद्धी आयुर्वेदप्रसिद्धे ओषध्यौ । पृथगोषधीशब्दः सहदेव्यादौ । सितपद्मान्येव मुखानि तैरुद्गार उल्लासो भोगमोक्षलक्ष्मीपरामर्शश्च विद्यते येषां । चूतपल्लवादीनि सच्छायपत्रान्तराद्युपलक्षणाय ॥

अथैतेषु

पृथिव्यादीनि तत्त्वानि
पञ्च पञ्चसु विन्यसेत् ॥४५७॥
कलशेषु महादेवि
पुनश्चैव कला न्यसेत् ।

ताश्च

निवृत्त्याद्याः कलाः पञ्च
तेषु चैवात्र विन्यसेत् ॥४५८॥

तेष्विति पृथिव्यादिषु व्यापकत्वेन चकारः

सहक्रमं[1] सूचयति ॥ ४५८ ॥

तेष्वेवासनपक्षे

एकैककलशे[2] व्याप्यो

ह्यनन्तादिशिवान्तकः ।

भुवनेशपुञ्जः ॥

तत्र च

पूजयेद्भैरवं देवं

सर्वसंभारकैः क्रमात् ॥ ४५९ ॥

षडङ्गावरणोपेतं

मन्त्रसंधानसंयुतम् ।

क्रमो निवृत्तिकलशः पूर्वमित्यादिरूपः, आवरणानि श्मशानवर्जानि इति केचित् ॥

एवं संपूज्य

भैरवेणाभिमन्त्रेत

एकैकं कलशं प्रिये ॥ ४६० ॥

अष्टोत्तरशतेनैव

परतत्त्वमनुस्मरन् ।

---

१ क० पु० चकार एव सहेति पाठः । २ ख० पु० तेष्वेकेति पाठः ।

एषां कलानुसारां दिक्स्थितिमाह

वारुण्यां सौम्ययाम्याया-
मैन्द्यामैश्यां तथैव च ॥४६१॥

संपूज्यैवं विधाने[1]न
अभिषेकं समाचेरत्[2]।

तत्र

यागहर्म्यस्य ऐशान्यां
पीठं संकल्पयेद्बुधः ॥ ४६२ ॥

पीठमासनम् ॥ ४६२ ॥

कथं

तत्र मण्डलकं कृत्वा
स्वस्तिकादिविभूषितम्।

वितानोपरिसंछन्नं
ध्वजैश्च परिशोभितम् ॥४६३॥

तत्रासनं न्यसेद्देवि
श्रीपर्णीचन्दनोद्भवम्।

---

1 ख० पु० विधिनानेनेति पाठः। 2 क० पु० समारभेदिति पाठः।

श्रीपर्णीचन्दने प्रशस्तपदत्वोपलक्षणे[1] ॥

तत्रानन्तासनं न्यस्य
मूर्तिभूतं शिशुं न्यसेत् ॥४६४॥
पूर्ववत्सकलीकृत्य
ऐशान्यभिमुखं स्थितम् ।

तत्रेति श्रीपर्ण्याद्यासने शिशुमाचार्यो चिकीर्षितम् ॥

अथ

गन्धपुष्पादिनाभ्यर्च्य
निर्भर्त्स्यः काञ्जिकौदनैः॥४६५॥
मृद्भस्मगोमयैः पिण्डै-
र्दूर्वाङ्कुरसमाश्रितैः ।
सिद्धार्थदधितोयैश्च
नीराजनसमन्वितैः[2] ॥ ४६६ ॥

काञ्जिकादिद्रव्यपूर्णेन कुम्भेनोपरि निःशेषराजनात्मतया नीराजनादिदीपयुक्तेन निर्भर्त्स्यः प्रशान्तविघ्नः शिशुः कार्य इत्यर्थः ॥

---

१ ग० पु० प्रशस्ततारूपलक्षणे इति पाठः । २ ख० पु० समन्वितैरिति पाठः ।

अथ

निर्भत्स्यैवं विधानेन
अभिषेकं प्रदापयेत्।
पृथिव्यादिघटास्यैर्वा
धामानुस्मृत्य सेचयेत् ॥४६७॥

ईशानान्तैः[1] पृथिव्यादिकलशानामास्यैर्वक्त्रैः सिञ्चेत्। णिजविवक्षितोऽत्रैवमन्यत्र। घटाद्यै-रिति त्वपपाठः ॥ ४६७ ॥

किंच

क्रमाद्ध्यात्वा कलशेषु

निवृत्त्यादिव्याप्तिक्रमेण चिन्तयित्वा— इत्यर्थः ॥

कः

आचार्यः सुसमाहितः।

शिवावेशशालीत्यर्थः ॥

अथायं यथायथम्

अभिषिक्तोऽन्यवासस्तु
परिधाप्याचमेत्ततः ॥ ४६८ ॥

---

१ ख० पु० ईशान्तैरिति पाठः।

मायीयकञ्चुकप्रक्षेपव्याख्यया पूर्ववस्त्रत्यागः । परमशिवप्रकाशपरीतताव्याख्यया अन्यद्वासः परिदधीत ॥ ४६८ ॥

आचान्तजलं शिष्यं

प्रविश्य दक्षिणां मूर्त्तिं

तत्रास्य व्याख्यातव्याख्यानन्तासनरूपं

योगपीठं प्रकल्पयेत् ।

तत्रैवं

संस्थाप्य सकलीकृत्य

अस्मै

अधिकारं प्रकल्पयेत् ॥ ४६९ ॥

कथमित्याह

उष्णीषं मुकुटाद्यांश्च

छत्रं पादुकमासनम् ।

हस्त्यश्वशिविकाद्यांश्च

राजाङ्गानि ह्यशेषतः ॥ ४७० ॥

करणीं कर्तरीं खटिकां

स्रुक्स्रुवौ दर्भपुस्तकम् ।

अक्षसूत्रादिकं दत्त्वा

उष्णीषश्च शिरसि बन्धनाय पटः, मुकुटादिकमाभरणजातं भूषणार्थं, शिविका युग्यं, राजाङ्गानि तूर्यभेर्यादीनि, करण्याद्याचार्यतोपयोगि आदिग्रहणात् दूत्यर्घपात्रादिकम् ॥

अधिकारं व्याचष्टे

चतुराश्रमसंस्थिताः ॥ ४७१ ॥
दीक्ष्यानुग्रहमार्गेण
दीक्षा व्याख्या त्वया सदा ।
अद्यप्रभृति कर्तव्ये-
त्यधिकारः शिवाज्ञया ॥४७२॥

चतुर्ष्वपि आश्रमेषु ये स्थिताः तेषां त्वया दीक्षा व्याख्या च कार्या, कथं दीक्ष्याणामायातशक्तिपातत्वात् दीक्षार्हाणामनुग्रहमार्गेणानुजिघृक्षया नतु स्नेहलोभादिना, सदेति न कदाचिदपि परानुग्राहितां विना स्थेयमित्यर्थः । इत्ययमसौ शिवाज्ञयैव तवाधिकार आयातो नत्वत्रान्यस्य कस्यापि शक्तिरित्याज्ञा देयेत्यर्थः ॥ ४७२ ॥

अथ तं

उत्थाप्य हस्तौ संगृह्य
मण्डले तु प्रवेशयेत् ।

किंच

जानुभ्यां धरणीं गत्वा
संपूज्य भैरवं ततः ॥ ४७३ ॥

विज्ञाप्य

किम्

भगवन्नेवम-
भिषिक्तस्त्वदाज्ञया ।[1]
आचार्यपदसंस्थेन
तवानुज्ञाविधायिना ॥ ४७४ ॥

त्वदाज्ञयैवमाचार्यपथे स्थितः ॥ ४७४ ॥
तवाज्ञयैव चायमभिषिक्त इति विज्ञाप्य

कर्तव्यं यत्तदायात-
मधिकारं तु देशके ।

---

१ ग० पु० तवाज्ञयेति पाठः ।

शिवतत्त्वार्थकथनं

शिवस्य पुरतः स्थितः ॥४७५॥

यत् गुरुपारम्पर्येणायातं शिवतत्त्वार्थकथनमवश्यकर्तव्यं तदहं तवैव शिवस्य पुरतः स्थितोऽस्य करोमीति विशेषकथनं; कीदृगधिक्रियतेऽनुगृहीतस्त्वद्रूपः संपद्यते येन तादृक् ॥ ४७५॥

अथ

निर्गत्य भवनादग्नौ

कलाध्वानं तु होमयेत्।

तत्रादौ मूलमन्त्रक्रमेण

मन्त्रतर्पणकं कृत्वा

प्रत्येकम्

कलानां पञ्च चाहुतीः ॥४७६॥

दद्यात् ॥ ४७६ ॥

तदित्थम्

पञ्च पञ्चसु सर्वासु

हुत्वा पूर्णाहुतिं गुरुः।

१ क० पु० अनुगृहीतृरूप इति पाठः।

अर्थान्मूलेन दद्यात् ॥

अथ

अर्घपूजादिकं कृत्वा
प्रणम्य ख्यापयेत्प्रभोः॥४७७॥

किम्

अभिषिक्तो मयाचार्य-
स्तदर्थं मन्त्रतर्पणम् ।

वह्नौ कृतमित्येतद्वस्तु ख्याप्यमित्यर्थः ॥

अथास्य

हृदाद्यैः पञ्चभिश्चाङ्गै-
र्दक्षिणं लाञ्छयेत्करम्॥४७८॥

नेत्रस्य मूलाभिन्नव्याप्तिकत्वात्तद्वर्जितैः ॥

कथम्

दर्भोल्मुकं शिवाग्नौ तु

कृत्वा ॥

तेनैव

कनीयस्यादि लाञ्छयेत् ।

कनीयस्याद्यङ्गुलीः हृदादिमन्त्रैः क्रमेण

दर्भोल्मुकेन स्पृशेत्; येनास्य मन्त्रा दीप्ताः करणरूपा झटिति तत्तत्कार्यशक्ता भवन्ति एतत्करस्पर्शात्पाशा दग्धबीजकल्पा यान्तीत्यर्थः ॥

इत्थं समुत्पन्नाभिषेकस्य विधिरयं फलत्विति धिया पारितोषिकम्

पुष्पं पाणौ प्रदद्यात्तु

तं च

मण्डलाग्नौ प्रपातयेत् ॥४७९॥

शिष्यं दण्डवत्प्रणामार्थम् ।

स च

भैरवं कलशं चाग्निं
नमस्कृत्य तु दण्डवत् ।
लब्धाधिकारो हृष्टात्मा
दृष्टादृष्टफलान्वितः ॥ ४८० ॥
स गुरुः शिवतुल्यस्तु
शिवधामफलप्रदः ।

दण्डवदित्यादावभिप्राय उक्त एव; हृष्टं

फलं जीवन्मुक्तिः, अदृष्टं तु परमशिवतत्त्वम् ॥

एवं पुत्रकाचार्यविषयं विधिं निर्वाह्य साधकविषयं तमुपक्रमते

शान्त्यन्ते भूतिदीक्षा च
सदाशिवपदात्मिका ॥ ४८१ ॥

भूतिदीक्षा सदाशिवान्ताणिमादिभोगदीक्षा, शान्त्यन्ते शान्त्यन्तपदे योजनान्ते इत्यर्थः; चकारात् शिवयोजनिकारूपापि यतो

'येषां सबीजिका दीक्षा कुर्यात्तेष्वभिषेचनम् ।' (४।४५४)

इत्युपक्रान्तं। सबीजिका च शिवयोजनिकात्मैवोक्ता । अत एवोक्तमन्यत्र

'अप्रसादाद्भवेत्सिद्धिः प्रसादाच्छांकरं पदम् ।'

इति, यदि सिद्धिविषयेषु माद्यति तदस्य शांकरे पदे विघ्नो मा भूदित्येवमर्थं साधकस्य शिवयोजनिकां कृत्वा सदाशिवे योजना कार्या ॥ ४८१ ॥

तदित्थम्

शिवधर्मिण्यसौ ज्ञेया

साधकदीक्षेति शेषः; यत्र सदाशिवतत्त्वे योजनमस्ति ॥

सा च

लोकधर्मिण्यतोऽन्यथा ।

अशुभैकक्षपणात् तत्तद्भुवनेशादिपदयोजनात्मिका ॥

अतश्च

शिवधर्मिण्यसौ येषां
साधकानां प्रकीर्तिता ॥ ४८२ ॥
तेषां कृत्वाभिषेकं तु

वक्ष्यमाणरूपम् ॥

तानेव

साधकत्वे नियोजयेत् ।

तत्र

साधकस्याभिषेकोऽयं
विद्यादीक्षात उत्तरः ॥ ४८३ ॥

विद्या सकलमन्त्रस्तत्कृता विद्यात्मकसदाशिवपदयोजनात्मा शिवपदयोजनादनन्तरभा-

विनी या दीक्षा तत उत्तरः साधकस्याय-मितीदानीमेव कथ्यमानप्रकारोऽभिषेकः कार्यः ॥ ४८३ ॥

यद्यपि सकलमन्त्रस्यापि परपदप्राप्तिहेतुत्व-मस्ति तथापि

विद्यादीक्षा भवेत्सा तु
वासनाभेदतः स्थिता ।

उक्तं हि 'मन्त्रमुद्राद्रव्याणां होमः साधा-रणः' इत्यादि ॥

अत एव

कर्मभेदो न विद्येत
सर्वत्राध्वनि संस्थितः ॥४८४॥

कर्म पाशक्षपणम् ॥ ४८४ ॥

अतश्च

कृतानि यानि कर्माणि
सर्वाण्यध्वगतानि तु ।
तानि संशोध्य विधिव-
त्कलापञ्चस्थितानि तु ॥४८५॥

योजन्यवसरे भेदो
विमर्शः साधकस्य तु ।

पूर्वं च कलात्रये कार्ममलस्थितिः स्थूलतयोक्ता इह तु सूक्ष्मतया कलापञ्चकेपि— इति न कश्चिद्व्याघातः; प्रथमस्तुशब्दश्चार्थे भावीन्यपि कर्माणि समुच्चिनोति ॥

अत्र पूर्वोक्तं विधिं स्मारयति

प्रारब्धं कर्म पाश्चात्यं
नचैकस्थं तु भावयेत् ॥४८६॥

वर्तमानदेहे मन्त्राराधनादि यत्प्रारब्धं कर्म पाश्चात्यं च यत्तदेकत्र क्षपणीयत्वे स्थितं न भावयेत्, नास्य मन्त्राराधनादि कर्मापि क्षपयेदित्यर्थः ॥ ४८६ ॥

निर्णीतं चैतत्

साधकस्य तु भूत्यर्थं
प्राक् कर्मैकं तु शोधयेत् ।

प्राक् कर्म आगामि चैकस्थं भावयित्वेत्यर्थः ॥

---

१ क० ख० पु० मन्त्रसंधानादीति पाठः ।

अतश्च

धाम प्रोच्चार्य सकलं
सदाशिवतनौ न्यसेत् ॥४८७॥

सकलं द्वात्रिंशदक्षरम् ॥

कथं

विद्यादेहस्वरूपेण
ध्यात्वा देवं सदाशिवम् ।
पूर्णाहुतिप्रयोगेन
अणिमादिगुणैर्युतम्[1] ॥४८८॥

विद्यादेहोऽष्टादशभुजः सकलभट्टारकः ॥

अथ

अणिमादिगुणावाप्तौ
मूलमन्त्रस्वसंज्ञया ।
अष्टावेवाहुतीर्दत्त्वा
अभिषिञ्चेत्तु साधकम् ॥४८९॥

यथा निष्कलयोजनानन्तरं तद्गुणापादनं कृतमेवं सकलयोजनानन्तरमस्याणिमादि-

---

१ ख० पु० गुणान्वितमिति पाठः ।

गुणात्मतापत्तिः कार्या । अत्र सकलमन्त्रपूर्वं साधकनामाणिमा भवेत्युच्चार्य पुनः सकलोच्चारपूर्वमणिमादिगुणाय दीक्षात्मने स्वाहेत्यादिप्रयोगः। अणिमादिगुणावाप्ताविति तन्निमित्तम् ॥ ४८९ ॥

तदभिषेकं प्राग्वत्

कलशैः पञ्चभिः कुर्यात्

कथमित्याह

निवृत्त्याद्यास्त्रिषु न्यसेत् ।
शान्त्यतीतां पञ्चमे च
शान्तिं पश्चाच्चतुर्थके ॥ ४९० ॥

त्रिष्विति दक्षिणोत्तरवारुणदिग्गतेषु प्राग्वक्त्रादिपूर्णेषु पञ्चसु, पञ्चम इति चेशाने, पश्चादिति शान्त्यतीतान्यासादनन्तरं, चतुर्थक इति प्राच्यकलशे, अत्र चाभिप्रायो यत्साधकस्य शिवदशाविश्रान्तिपूर्वमविघ्नं सादाशिवी सिद्धिरस्त्वित्येवं भुक्त्वा भोगानयं शिवो भवत्विति ॥ ४९० ॥

---

१ ख० पु० वारुणोत्तरदक्षिणादिग्गष्विति पाठः । २ क० पु० रित्येवमिति पाठः ।

तदित्थम्

शान्त्या तु संपुटीकृत्य

शान्त्यतीताकलशानन्तरं शान्ताकलशान्यासात् शान्त्या संपुटीकारो भवति शान्त्यतीतायाः कलात्रयेण शान्त्या च गर्भीकृतत्वात् ॥

किंच

पृथिव्याद्यैश्च[1] पञ्चभिः ।

कलाक्रमेणैव कलशेषु न्यासं कुर्यादिति शेषः । पृथिव्यादयोऽत्र क्रोडीकृताशेषतत्त्वतत्त्वेश्वरस्फारा ब्रह्मपञ्चकपरमार्था[2] नतु स्थूलभूतमात्रात्मकाः ॥

अथ

एकैककलशे पश्चा-
त्साध्यमन्त्रं तु विन्यसेत् ४९१

विद्याङ्गैः सकलीकृत्य

साध्यमन्त्रः सकलभट्टारक इह मुख्यः, अन्योऽपि वा पुष्पपातानुसारं, विद्याङ्गैरिति सक-

---

१ ख० पु० स्तु इति पाठः । २ ख० पु० पदार्था इति पाठः ।

लाङ्गैः सर्वज्ञत्वादिरूपैस्तत्तत्साध्यमन्त्राङ्गैर्वा ॥

पश्चात्तत्र

विद्याङ्गावरणं न्यसेत् ।

विद्याङ्गानां सर्वज्ञत्वादिरूपाणामेव सिद्धिसाधनानुगुण्यान्नावरणान्तरन्यास उक्तः ॥

अथ साध्यमन्त्रेणैव

संमन्त्र्याष्टशतेनैव
एकैकं कलशं ततः ॥ ४९२ ॥
बहिर्मण्डलके न्यस्य
आसनं प्रणवेन तु ।
साधकं तत्र संस्थाप्य
सकलीकरणं ततः ॥ ४९३ ॥
निर्भर्त्स्य पूर्ववत्सर्वैः
साध्यमन्त्रेण सेचयेत् ।

निवृत्त्याद्येकैककलशस्य साध्यमन्त्रेण मन्त्रणं सर्वभूमयोऽस्य मन्त्रप्रसादात् सिद्धिप्रदा भवन्त्विति, बहिरिति यागात् मण्डले स्वस्ति-

कादिरूपे, आसनं श्रीपर्ण्यादिरूपं, सकलीकरणमिति तस्य कुर्यादिति शेषः । सर्वैरिति पूर्वोक्तैः काञ्चिकादिद्रव्यैः ॥

तत्र

निवृत्त्यादित्रिभिः कुम्भैः
स्नापयेत्पूर्वदिङ्मुखम् ॥ ४९४ ॥
शान्त्यतीतं घटं पश्चा-
द्गृहीत्वा सेचयेच्छिशुम् ।
शान्तिं पश्चात्तु गृह्णीयात्

शान्तिमिति शान्तिघटम् ।

तदित्थम्

संपुटेनाभिषेचयेत् ॥ ४९५ ॥

संपुटार्थस्तदभिप्रायश्च व्याकृत एव ॥

तदेवम्

साधकस्याभिषेकोऽय-
मनुलोमविलोमतः ।

आनुलोम्यं निवृत्त्यादित्रये, शान्तिशान्त्यतीतयोस्तु प्रातिलोम्यम् ॥

किंच

अभिषिच्य प्रवेश्यैनं
दक्षिणां मूर्तिमास्थितम् ॥४९६

परिवर्तितवस्त्र इत्यर्थात्, दक्षिणमूर्त्याश्रयणं विघ्नप्रशमाय ॥ ४९६ ॥

तत्रास्य च

प्रणवेनासनं दत्त्वा
सकलीकरणं भवेत् ।

अथास्य सिद्ध्युपकरणम्

साधकस्याधिकारार्थ-
मक्षमालादि कल्पयेत् ॥४९७॥

समुचितं ढौकयेत् ॥ ४९७ ॥

कल्पयित्वैतत्

मन्त्रकल्पाक्षसूत्रं च
खंटिकां छत्रपादुके ।
उष्णीषरहितं दत्त्वा

कल्पः साध्यमन्त्रपुस्तिका, उष्णीष आचार्यायैव देयः ॥

१ ग० पु० पेटिकामिति पाठः ।

अथ

प्रविश्य शिवसंनिधौ ॥ ४९८ ॥

विज्ञाप्य परमेशानं
साधकोऽयं मया कृतः ।
भूयात्सिद्धिस्त्वदाज्ञात-
स्त्रिप्रकारास्य भक्तितः ॥४९९॥
साध्यमन्त्रं ददेत्पश्चा-
त्पुष्पोदकसमन्वितम् ।

शिवसंनिधाननिमित्तं प्रविश्यान्तर्मुखीभूय[1] तदवष्टम्भेनैव देवं विज्ञाप्य साध्यमन्त्रं दद्यात्, साधकोऽयमित्यादि विज्ञप्तेः स्वरूपं, विज्ञप्तेः पश्चात् पूर्ववल्लब्धानुज्ञत्वं भाव्यं शिवसंनिधावेव च पुष्पं फलोत्पादनधिया, उदकं सिद्ध्याप्यायनाय ॥

तदाह

तस्य हस्ते समर्प्यैत
सिद्ध्यर्थं साधकस्य तु ॥५००॥

---

१ ख० पु० इति संमुखीभूयेति पाठः ।

परशक्तित उद्धृतं तच्छक्तिसंमुखीभूतमेतदित्यभिप्रायात् हस्तेन हस्ते समर्पणम् ॥

साधकस्तु

प्रणम्योभौ गृहीत्वा तु
मन्त्रं हृदि निवेशयेत् ।

उभौ गुरुमन्त्रौ, हृदीति स्वात्मानं तत्तद्विमर्शमयं कुर्वीतेत्यर्थः ॥

तदेवमुभयोर्योग्यसंबन्धलाभात्

प्रहृष्टवदनः शिष्यो
गुरुश्चापि प्रहर्षवान् ॥ ५०१ ॥

उभौ निर्गत्य[1] च

अग्न्यागारे सावधानौ

स्यातामिति शेषः ॥

ततो गुरुरग्नौ तु
तर्पयेन्मन्त्रसंहिताम् ।

ततोऽपि यथासंभवम्

सहस्रं वा शतं वापि
साध्यमन्त्रस्य तर्पणम् ॥५०२॥

---

१ ख० पु० निःसृत्येति पाठः ।

कुर्यात् ॥

एवं संतर्पयित्वा तु
पुष्पं पाणौ प्रदापयेत् ।

प्राग्वत् गुरुः साधकाय, तेन वात्मन इत्यर्थः ॥

ततः साधकः

त्रिस्थं संपूज्य देवं तु

स्थण्डिलवह्निगुरुमूर्तिषु दण्डवन्निपतेत् ॥

ततोऽपि त्रिःप्रदक्षिणम्॥५०३॥

कृत्वा ॥

प्रणम्य भक्तियुक्तात्मा
अणिमादिफलं लभेत् ।

तद्योग्यतामेति ॥

गुरुस्तु

उत्थाप्य साधकं ब्रूया-
त्समयान्पाहि यत्नतः ॥५०४॥

तेऽग्रे भविष्यन्ति ॥

किंच निर्बीजदीक्षादीक्षितवर्जं सर्वे शिष्याः
समयान् श्राव्या इत्यादिशति

१ क० पु० योगात्समतामिति पाठः ।

दीक्षावसाने ते देवि
श्रावणीया विपश्चिता ।

समयज्ञेन ॥

उपसंहरन्नन्यदवतारयति

एवं दीक्षां तु निर्वर्त्य
सर्वदैव वरानने ॥ ५०५ ॥
आत्मयागः प्रकर्तव्यो
यथा भवति तच्छृणु ।

दीक्षां समय्यादीनाम् । आत्मनो यागः परतत्त्वयोजनात्मा समुच्छेद्यपाशसंस्पर्शविधिन्यूनतादिसंभावनाशङ्काशान्तये कर्तव्यः ॥

तदित्थम्

वैज्ञानिकी प्राकृती वा
आचार्यस्य यदृच्छया ॥५०६॥

दीक्षा भवति । विज्ञानहेतुका वैज्ञानिकी । तिलाज्याहुतिहेतुका प्राकृती ॥ ५०६ ॥

तत्र

वैज्ञानिकीं सुसूक्ष्मां तु
विधिनानेन कारयेत् ।

सुसूक्ष्मां पूर्णज्ञानसंपाद्याम् । अनेन वक्ष्यमाणेन ॥

तत्र प्राकृतीं तावत्पूर्वोक्तप्रकारात् किंचिद्वैलक्षण्येनाह

तिलाज्यादिसमायुक्ता
अध्ववागीशिकल्पना ॥ ५०७ ॥

प्राकृत्यां[1] कार्येति शेषः ॥ ५०७ ॥

तत्र च

कलाभिः पञ्चभिर्व्याप्त-
मध्वानं युगपन्न्यसेत् ।

नतु प्राग्वत् ॥

क्रमेण च तद्व्यनक्ति

पूजाहोमोपचाराद्यान्
कृत्वात्मानं नियोजयेत् ॥ ५०८ ॥
शिष्यचैतन्यवत्

वागीश्यां युगपदशेषकलाव्याप्तिकायामा[2]ह्वानार्चादिपूर्वं पुर्यष्टकरूपमात्मानं योजयेत्

१ ख० पु० प्राकृतेति पाठः । २ ख० पु० व्यापिकेति पाठः ।

ततोऽपि

योगादध्वानं युगपन्न्यसेत् ।

गर्भयोजनादनन्तरं दीक्ष्यमध्वानं युगपन्न्यसेत् ॥

न्यस्तं च

पुष्पाद्यैः पूजयित्वा तं

तत्रैव

योगार्थमाहुतित्रयम् ॥ ५०९ ॥

प्रणवमूलहंसबीजपूर्वमात्मानं सर्वाध्वव्यापकं वागीशीगर्भे युगपद्योजयामि स्वाहा इत्यत्र प्रयोगः ॥ ५०९ ॥

अथ

गर्भधारित्वजनने

अर्जने भोगतल्लये ।

युगपद्धोमयेद्देवि

मूलमन्त्रेण सुव्रतः ॥ ५१० ॥

प्रत्येकं युगपदिति सर्वाध्वव्याप्तिभावनया त्रिर्होमः ॥ ५१० ॥

तदाह

आहुतीनां त्रयं होम्यं
प्रतिकर्म वरानने ।

निष्कृतेः प्राधान्यात् पृथग्घोममाह

होतव्या निष्कृतिर्भिन्ना
पञ्चस्थानकलात्मसु ॥ ५११ ॥
शतमेकं तदर्धं वा

पञ्च पृथिव्यादीनि स्थानानि यासां कलानां तदात्मसु तद्विषये, तेन निवृत्तौ मच्चैतन्यस्य गर्भाधानादिकर्मपञ्चके निष्कृतिरस्तु स्वाहा इति प्रयोगः । एवमन्यत्र ॥

एषा च

निष्कृतिः परिकीर्तिता ।

पूर्वमेव निर्णीता

अथ

विश्लेषपाशच्छेदाद्ये
धाम्नैव युगपद्धुतिः ॥ ५१२ ॥
उद्धारे चात्मतत्त्वस्थे

आदिपदाद्विधिपूरणे पाशदाहे च युगपदेव पूर्णाहोमः । अत्र च ताडनच्छेदनग्रहणैकचैतन्यभावनकारणाह्वानपुर्यष्टकांशार्पणं पूर्वत उपजीव्यम् । पुर्यष्टकांशार्पणं सबीजायामपि भवतीति निर्णीतत्वात् ॥

अथ

पूर्णाहुतिं तु पातयेत् ।

तयैव च

आत्मानं योजयेत्तत्त्वे
शिवे परमकारणे ॥ ५१३ ॥

ततोऽपि

गुणान् पूर्ववदापाद्य

अवभृथस्नानेन ॥

तानेव

अमृतान्पूर्ववत् कुरु ।

अमृतान् अविनश्वरान् ॥

सेयं प्राकृती

आत्मदीक्षा

पुत्रकादिदीक्ष्याणाम्

समाप्तौ तु

प्रायश्चित्तनिवृत्तये ॥ ५१४ ॥

पशुसंसर्गन्यूनातिरिक्तविधिसंभावनाशङ्काशान्त्यर्थमित्यर्थः ॥ ५१४ ॥

नन्वात्मनोऽशुद्धस्य यो दीक्षया शुद्धिमादत्ते सोऽपि यद्यशुद्धस्तदन्धेनान्धस्य हस्तग्रहणम्, अथ प्राणादिविलक्षणतया प्रत्यभिज्ञातोऽसौ शुद्धः तर्हि तत्परामर्शादेव सर्वं संपन्नमिति किं प्राकृत्या दीक्षया । सत्यमेतत्, यदि शक्तिपातवशादेव रूढिः स्यात् तदा प्राकृती नैव कार्या । तदा तु कुशलैकसंपाद्यां विज्ञानदीक्षामाह

अथ विज्ञानरूपेण

सकृदुच्चारलक्षणा ।

दीक्षा भवति । मध्यधामसमनुप्रवेशेन यः स्वपूर्णाहंपरामर्शमयस्य मूलमन्त्रस्य सकृदुच्चारः स एव लक्षणं यस्याः ॥

यतः

हेयोपादेयपाशानां

युगपद्भैरवेण तु ॥ ५१५ ॥

भैरवेण निष्कलेन सकृ[1]दुच्चारितेन मायान्तानां भेदैकरसत्वेन हेयानां, समनान्तानां भेदाभेदरूपतयोपादेयानां तथापि भेदांशसंबन्धात् पाशव्यपदे[2]श्यानां युगपत् शुद्धिर्भवतीति शेषः । उक्तं च प्राक्

'सकृदुच्चारितो देवि नाशयेत्सर्वकिल्बिषम् ।' (१।४४)

इति ॥ ५१५ ॥

न केवलं युगपत्पाशक्षपणं मन्त्रेण क्रियते यावत्परमशिवपदे

शाश्वती संस्थितिः पश्चात्

एषा च

सूक्ष्मदीक्षा प्रकीर्तिता ।

इत्थमात्मदीक्षान्ते

विशेषपूजनं होमं

यथा[3]शक्ति प्रकल्पयेत् ॥५१६॥

---

१ क० पु० सम्यगिति पाठः । २ क० ग० पु० देशानामिति पाठः । ३ ख० पु० यावदिति पाठः ।

वाद्यगीतसुनृत्याद्यैः
स्तुतिभिः पूजयेद्वरम् ।
त्रिः प्रदक्षिणमावर्त्य
कलशाग्निसमण्डलम् ॥५१७॥
अष्टाङ्गपतनं कृत्वा
विज्ञपेत्परमेश्वरम् ।

त्र्यधिकरणं देवं प्रदक्षिणीकृत्य ॥

किं विज्ञापयेदित्याह

भगवन्पशुहेत्वर्थं
येन्मयावाहितो भवान् ॥ ५१८ ॥
तत्क्षन्तव्यं सदा देव
विधिस्थस्य मम प्रभो ।

विधिर्दीक्षाकर्म, ममेति त्वयैव दत्ताधिकारस्य ॥

यदपि

विधिन्यूनमकामस्य

प्रामादिकं विधिन्यूनत्वमपि क्षन्तव्यमित्यर्थः ॥

यस्मात्

पूजा शास्त्रोदिता यथा ॥५१९॥

न भवेदतिभूयिष्ठा[1]

प्राकृतैर्द्रव्यसंचयैः ।

यथा शास्त्रे पूजा भूयिष्ठा विततपरिपाटीकोदिता तथा प्रकृतिपरिणामरूपैर्मितैर्द्रव्यैर्न भवेदिति विनयपरा उक्तिः, अन्यथार्घपात्रविप्रुट्संस्कृतानां द्रव्याणां शिवीकृतत्वात् कथं प्राकृतत्वं वित्तशाठ्यविवर्जनाच्च मितत्वमस्य प्रयोजकम् ॥

यत एवं ततः

अवलम्ब्य भक्तिमात्रं

विधानं यत्कृतं मया ॥ ५२० ॥

तत्सर्वं सफलं मेऽस्तु

सुप्रसन्ने विभो त्वयि ।

सुष्ठु प्रसादो मायाकालुष्यप्रशमनेन पूर्णचिद्रसमयत्वेन स्फुरणम् ॥

---

१ ख० पु० इतिभूयिष्ठेति पाठः ।

एवं विज्ञप्तिसमनन्तरम्

प्रसन्नवदनो हृष्टो
वरं दत्तं विभावयेत् ॥ ५२१ ॥

अथ

उपविश्य ततो यागं
संहरेत क्रमात् प्रिये ।

तत्रादौ

अग्रं संप्रार्थ्य गृह्णीया-
त्स्थापयेच्चास्त्ररक्षितम् ॥५२२॥

अग्रवर्ति चर्वादि अग्रं

'देवदेवस्य नैवेद्यं चान्द्रायणशतादिकम् ।'

इति अन्यत्रोक्तत्वात् परं पवित्रमेतन्मा कश्चिद्भ्रूतादिरदीक्षित आहार्षीदित्यस्त्रेणास्य रक्षणम् ॥

एवं कृत्वा

विशेषपूजनं चार्घं
प्रणिपातं ततः पुनः ।

निरोधार्घं ततो गृह्य
अर्घं सव्यापसव्यतः ॥५२३॥

दत्त्वा विसर्जयेद्देवं
धाममन्त्रमनुस्मरन् ।

अर्घमिति

'पश्चादर्घः प्रदातव्यः सुरया ········।' (२।१३६)

इत्युक्तपूर्वं दत्त्वा प्रणिपातं कृत्वा निरोधप्रयोजनोऽर्घः प्रसृतस्तं परिसमाप्ते विधौ स्वरूपविश्रान्त्यर्थं सव्यापसव्यत इति ज्ञानक्रियाशक्तिव्याप्तिभ्यां दक्षवामकराभ्यां दत्त्वा विसर्जयेत् ॥

विसर्जनविधिमेव प्रदर्शयति

आत्मनो रेचकं कृत्वा
पुष्पं देवाय निक्षिपेत् ॥५२४॥

निष्कलेनेत्यर्थात् ॥ ५२४ ॥

संहारिण्या च संगृह्य
मन्त्रान् पार्श्वव्यवस्थितान् ।
विद्युद्वच्चलितान्ध्यात्वा
धामदेहे तु विन्यसेत् ॥५२५॥

कनिष्ठादिक्रमेण दक्षकरशाखासंवर्तनात्मा संहारिणी मुद्रा । धामदेहे सकलभट्टारके । विन्यसेत्तदेकलीनान् भावयेत् ॥ ५२५ ॥

तमपि

विद्यादेहं भैरवस्य

निष्कलस्य उपलीनं चिन्तयेत् ॥

तल्लीनं बिन्दुविग्रहे ।

तन्निष्कलरूपमकारादिप्रशमयुक्त्या ज्योतिर्मात्रात्मनि बिन्दौ लीनम् ॥

तमपि

बिन्दुं तु नादशक्तिस्थं

शक्तिरूपं तु ग्राहयेत् ॥५२६॥

अर्धचन्द्रनिरोधिकाप्रशमयुक्त्या विमर्शप्रधाननादनादान्तरूपतां गमितमानन्दस्पर्शप्रधानशक्तिरूपं संपादयेत् ॥ ५२६ ॥

तदपि

शक्तिरूपं व्यापकेन

स्वरूपेण स्थितं सत् ॥

प्रणवोभयसंपुटम् ।

प्रकर्षेण नूयते स्तूयते सर्वैरिति प्रणवः परं तत्त्वं, तेन उभयतः संपुटितमित्यन्तःकृतं सर्वतो व्याप्तमित्यर्थः ॥

तथा भावितम्

संहारिण्या तु संगृह्य
द्वादशान्ते तु योजयेत् ॥५२७

ततोऽपि

पूरकेण हृदि न्यस्य
स्वस्थानस्थं तु भावयेत् ।

स्वस्थानं निरुपाधिप्रकाशानन्दघनमेव तत् ॥

सकलं निष्कलं रूपं
तथा सकलनिष्कलम् ॥५२८॥

भिन्नावस्थं तु मन्त्रेषु
हृत्स्थं तत्संस्मरेत्प्रिये ।

सकलं द्वात्रिंशदर्णं, निष्कलं च मन्त्रविरामे प्रकाशविमर्शमात्रतत्त्वं, सकलनिष्कलं तु चतुष्कलनाथात्मकं यदेकमपि अनुजिघृक्षया त्रिधैव भूत्वा पुनर्वक्त्राङ्गादिभूमिषु भिन्नावस्थं तदेवंव्यास्तिकमेतदेकमेव मान्त्रं रूपं हृत्स्थं स्मरेत् ॥

---

१ ख० पु० द्वात्रिंशदक्षरमिति पाठः । पं. २४ ग० घ० ङ० पु० अभि॰मेवमिति पाठः ।

उपसंहरति

विसर्जनविधिर्ह्येवं

यथा मण्डले तथान्यत्राप्याह

अग्नावेवं

तत्रादावग्निं

प्रपूजयेत् ॥ ५२९ ॥

ततोऽपि मूलेन

अष्टोत्तरशतं हुत्वा

पूर्णाहुतिं प्रपातयेत् ।

तं च

अर्घमाचमनं दत्त्वा

प्रणिपत्य क्षमापयेत् ॥ ५३० ॥

क्षमयेदित्यत्रार्थेऽयमैशः पाठः ॥ ५३० ॥

कथं क्षमयेदित्याह

मण्डलस्थप्रयोगेन

रेचकापूरकेण तु ।

संगृह्य मन्त्रसंघातं

यथास्थानं प्रकल्पयेत् ॥५३१॥

स्वात्मनो मन्त्रोच्चारानन्तरं नासिक्यरेचकेन निर्गत्य लोकपालादिक्रमेण धामान्तमापूर्य रेचयित्वा स्वात्मानमेव पूरयेत् । तत्र लोकपालमन्त्राणां भैरवाः, तेषामङ्गवक्त्राणि, तेषां सकलः, तस्यापि सकलनिष्कलः, तस्यापि व्याख्यातरूपनिष्कलनाथः स्थानमित्ययमेवात्र क्रमः ॥ ५३१ ॥

इत्थमग्निस्थं देवं विसृज्य
जागरयेत्तदाग्निं तु
नित्यकर्मनिमित्ततः ।

मा भूत् प्रतिदिनं संस्करणमित्याशयः ॥

अथ

निर्माल्यनयनं कुर्या-
द्रजांस्यपहरेत्प्रिये[1] ॥ ५३२ ॥
ततः प्रविश्य वसुधां
प्रोक्षयेत्तां शिवाम्भसा ।

निर्गतं माल्यं निर्माल्यं नतु चण्डेशकल्पनया तस्या इह विशेषनयेष्वचोदितत्वात्[2] ॥

---

१ ख० पु० अपनयेदिति पाठः । २ क० ग० पु० चोदितेति पाठः ।

अथ

बहिर्निर्गत्य भूतानां
बलिकर्म तु पूर्ववत् ॥५३३॥

प्रागुक्तेनैव मन्त्रेण कार्यम् ॥ ५३३ ॥

अथ

आचम्य सकलीकृत्य
लिङ्गिनस्तर्पयेत्ततः ।

लिङ्गिनो जटाभस्मादियुक्तान् । उक्तं च

'शिवस्य परिपूर्णस्य किं नाम क्रियते नरैः ।
यत्कृतं शिवभक्तेषु तत्कृतं तु शिवे भवेत् ॥'

इति शिवधर्मेषु ॥

अनन्तरम्

गुरुं संपूजयेच्छिष्यो
यथाविभवविस्तरैः ॥ ५३४ ॥

अथास्मै स्वात्मानमनृणीकर्तुम्

देशाध्यक्षो ग्रामशतं
मण्डलेशस्तदर्धकम् ।
शतभुक्पञ्च वै दद्या-
द्ग्रामं विंशतिभुक्तथा ॥५३५॥

दद्यात्तु ग्रामभुक् क्षेत्रं
क्षेत्रभोक्ता तु विंशतिम् ।

विंशतितमं भागमित्यर्थः । एतच्चोपलक्षणम् ॥

वस्तुतस्तु

येन येन गुरुस्तुष्ये-
त्तत्सर्वं विनिवेदयेत् ॥ ५३६ ॥
ततस्त्वनृणतां याति
वित्तशाठ्यविवर्जितः ।

वित्तशाठ्ये सति लोभादियुक्तस्य शरीरादिप्रमातृत्वानुग[त्वं न]मनाद[ग]पि मि[ग]लितमिति दीक्षासंस्कारोऽस्य न सम्यग्वृत्त इत्यनुमीयते । यत्र च शिष्यस्येदृग्वृत्तं तत्र गुरुर्दण्डापूपिकयैव निर्लोभः सिद्धः । अत एव प्राक्

'पुष्पं पाणौ प्रदापयेत् ।' (४।५०१)

इत्युक्तम् ॥

एवं विदितयोग्यभावः शिष्यः

ततस्तु समयाञ्श्राव्य-
स्तन्त्रे भैरवनिर्गते ॥ ५३७ ॥

ते चाग्रे भविष्यन्ति ॥

अथ च

चरुकं प्राशयेत्पश्चा-
च्चुम्बकः साधकैः सह ।
वाग्निरुद्धः प्रसन्नात्मा
पृथक् पात्रव्यवस्थितः ॥५३८॥

चरुकमिति प्रार्थितनैवेद्यं । साधकैरित्युपलक्षणम् । चुम्बति परम्परायातेन गुरुवक्त्रेण संयोज्यते संयोजयति च शिष्यमिति निरुक्त्या चुम्बको गुरुः । परमपवित्रचरुभोजने वाग्निरुद्धत्वं चित्तैकाग्र्याय, अत एव प्रसन्नात्मा ॥

स च चरुः साधकादीनां ज्येष्ठादिक्रमेण देय इत्याह

अनुक्रमेण दातव्यः

एवं हि सति स स चरुभोजी

ततः सिद्धिमवाप्नुयात् ।

एष च दीक्षाविधिरसामान्यरूप इत्याह

अनेनैव विधानेन
दीक्षिता ये वरानने ॥ ५३९ ॥

ब्राह्मणाः क्षत्रिया वैश्याः
शूद्राश्चान्येऽथवा प्रिये ।
सर्वे ते समधर्माणः
शिवधर्मे नियोजिताः ॥५४०॥
सर्वे जटाधराः प्रोक्ता
भस्मोद्धूलितविग्रहाः ।

नात्र अन्यतन्त्र इव दीक्षितानां प्राग्जातिसंस्कारः कोऽपि, केवलं समयादिभेदादेव भेदः ॥

अत एव

एकपङ्क्तिभुजः सर्वे
समयिनस्तु वरानने ॥ ५४१ ॥

सर्वे इति ब्राह्मणाद्याः संकीर्णाश्च ॥५४१॥

किंच

पुत्रकाणां भवेदेका
साधकानां तथा भवेत् ।

१ ग० पु० सर्वेधर्माण इति ।

चुम्बकानां भवेदेका

पङ्क्तिरित्यर्थात् ॥

न प्राग्जातिविभेदतः ॥५४२॥

यतः

एकैव सा स्मृता जाति-

र्भैरवीया शिवाख्यया ।

उक्तं हि प्राक्

'तस्मिन्युक्तः परे तत्त्वे सार्वज्ञ्यादिगुणान्वितः ।
शिव एको भवेद्देवि अविभागेन सर्वतः ॥'(४०२)

इति । यत एषा भैरवसंबन्धिनी जातिस्तत एव श्रेयोरूपा च नित्या च ॥

अत्रायमेवागमः प्रमाणमित्याह

तन्त्रमेतत्समाश्रित्य

प्राग्जातिं न ह्युदीरयेत्॥५४३॥

पुत्रकाणां साधकानां

तथा समयिनामपि ।

किं पुनराचार्याणामेतत्तन्त्राश्रितानामेव

---

१ ख० पु० ज्ञयेति पाठः ।

अयं नियमो न लौकिकानां तन्त्रमेतत्समाश्रि-
त्येत्येतदावृत्त्या योज्यम् ॥

अतश्च एतत्तन्त्रदीक्षितः

प्राग्जात्युदीरणाद्देवि
प्रायश्चित्ती भवेन्नरः ॥ ५४४ ॥

नर इत्यात्तदेहादिग्रहः ॥

अतश्च

दिनत्रयं तु रुद्रस्य
पञ्चाहं केशवस्य च ।
पितामहस्य पक्षैकं
नरके पच्यते तु सः ॥ ५४५ ॥

यत एवम्

अविवेकी भवेत्तस्मा-
द्यदीच्छेदुत्तमां गतिम् ।

अविवेकी स्वात्मानमिव दीक्षितान् शिवै-
क्येन पश्यन् ॥

यतः

अविवेकेन देवेशि
सिद्धिर्मुक्तिर्ध्रुवं भवेत् ॥५४६॥

शिवैक्यदार्ढ्यमेव सर्वश्रेयःसाधनमिति शिवम् ॥

तन्त्रार्थप्रतिजागरात्प्रतिपदं सद्व्याप्तिसंदर्शनात्
सम्यक्संकलनाक्रमात्प्रकटितो दीक्षाविधिर्यो मया ।
उद्द्योतेऽत्र तमामृशन्तु गुरवः श्रीशंकराज्ञाधरा
दीक्षां दीक्ष्यजनस्य कर्तुमभितो भोगापवर्गप्रदाम् ॥

इति श्रीमहामाहेश्वराचार्यवर्यविपश्चिच्चक्रचक्रवर्तिश्रीक्षेमराज-विरचिते श्रीमत्स्वच्छन्दोद्द्योते दीक्षाभिषेकप्रकाशनं नाम चतुर्थः पटलः संपूर्णः समाप्तः ॥

श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन संपाद्यायं प्रकाशितः ॥